G. Bühler – Received as a present
Surat 16th July 1873 from the Director of Public Instruction.

Note. The author calls this grammar Siddhahemachandra. Siddha was the name of his patron king Siddharāj, & Hemachandra his own. The fact is important as showing how authors preserve the names of their patrons by interweaving them as it were in the title of their works. I am of opinion that the title Vikramorvaśī is derived from Vikrama the patron of Kālidāsa & Urvaśī the heroine of the play. G.B. 4/1/74.

॥ अथ प्राकृत बालभाषा (मागधी) व्याकरण प्रारंभः ॥

(अजीमगंजना रहेनार रायबहादुर श्री धनपतसिंगजीना सहायथी छाप्युं छे.)

संवत् १९२९ ना मिति महा वद १० शनीवारने मुकाम मुंबई बाहुरकोट पांजरापोल अंदर ११९ नंबरनी निर्माल्य लालबागनामे पोषधशालामां निवास करनार ४ चार वर्ण ८४ चौराशी प्रकारना तथा ८४ गच्छोना मारवाडी गुजराती कच्छीयोना पूजनीक (यंगम युगप्रधान परम आचार्य अग्नीवेश्यायन गोत्री संवेगी श्री सुधर्मास्वामीजी महाराजना परंपराना) कोटीकगणी चंद्रकुल वज्रशाखाना भारद्वाजगोत्री संवेगीश्रीचारित्रप्रधानस्वामीए ४ चार पुस्तको मेलावीने श्री कृष्णशास्त्री महाबल नाशिककर पासे शोधावीने विद्वानलोकोने सम्यक् बोधबीजनी प्राप्ती थवासारू "ज्ञानदीपक छापखाना" मां छपावी प्रगट करयूं छेजी. भूलचूक रही होयतो विद्वान लोकोए क्षमाभाव राखीने सम्यक् उपयोग करी लेजो. ॥ ॥ ॥ ॥ ॥ ॥ ॥

संवत् १९१४ ना सालथी संवत् १९२९ ना महावद १० ने मुकाम मुंबइ बारकोट लालबागमां निवास करनार संवेगी श्रीचारित्र प्रधानस्वामीजी आ प्राकृत बालाभाषामयी मागधी व्याकर्णनो छपावानो हक्क सरकारना सन् १८६७ ना २६ आक्ट प्रमाणें मालके पोताना स्वाधीनमां राख्यूंछे ॥

ध्य—हें अक्षर यकार उच्चारण करण्याचें समजावें ॥

ए—हें चिन्ह जा अक्षराला जोडलें आहे तेथें अर्धा एकार समजावा ॥

॥ श्रीगणेशायनमः ॥ अथप्राकृतम् ॥ १ ॥ अथशब्दआनंतर्यार्थोऽधिकारार्थश्च ॥ प्रकृतिःसंस्कृतंतत्रभवंत तआगतंवाप्राकृतं ॥ संस्कृतानंतरंप्राकृतमधिक्रियते ॥ संस्कृतानंतरंप्राकृतस्यानुशासनंसिद्धसाध्यमानभेदसंस्कृ तयोनेरिवतस्यलक्षणंनदेश्यस्येतिज्ञापनार्थं ॥ संस्कृतसमंतुसंस्कृतलक्षणेनैवगतार्थं ॥ प्राकृतेचप्रकृतिप्रत्ययलिंग कारकसमाससंज्ञादयःसंस्कृतवद्वेदितव्याः ॥ लोकादितिचवर्तते ॥ तेनऋॠऌॡऐऔङञशषविसर्जनीयप्लुतव र्ज्योवर्णसमाम्नायोलोकादवगंतव्यः ॥ ङञौस्ववर्गसंयुक्तौभवतएव ॥ ऐदौतौचकेषांचित् ॥ कैतवम् ॥ कैअवं ॥ सौं दर्यं । सौअरिअं ॥ कौरवाः । कौरवा ॥ तथाचअस्वरंव्यंजनंद्विवचनंचतुर्थीबहुवचनंचनभवति ॥ बहुलं ॥ २ ॥ बहुलमित्यधिकृतंवेदितव्यमाशास्त्रपरिसमाप्तेः ॥ ततश्च । क्वचित्प्रवृत्तिःक्वचिदप्रवृत्तिःक्वचिद्विभाषाक्वचिदन्यदे वभवति । तच्चयथास्थानंदर्शयिष्यामः ॥ आर्षम् ॥ ३ ॥ ऋषीणामिदमार्षं । आर्षंप्राकृतंबहुलंभवति ॥ तद पियथास्थानंदर्शयिष्यामः ॥ आर्षेहिसर्वेविधयोविकल्प्यंते ॥ दीर्घह्रस्वौमिथोवृत्तौ ॥ ४ ॥ वृत्तौसमासेस्वरा णांदीर्घह्रस्वौबहुलंभवतः । मिथःपरस्परं । तत्रह्रस्वस्यदीर्घः ॥ अंतर्वेदिः । अंतावेई ॥ सप्तविंशतिः । सत्तावी

सा ॥ क्वचिन्नभवति । जुवइअणो । क्वचिद्विकल्पः । वारीमई । वारिमई ॥ भुजयंतं । भुआयंतं । भुअयंतं ॥ पति गृहं । पईहरं । पइहरं ॥ वेणुवनं । वेलूवणं । वेलुवणं ॥ दीर्घस्यन्ह्रस्वः ॥ निअंबसिलखलिअवीइमालस्स ॥ क्वचिद्विकल्पः ॥ जउणअडं । जउणाअडं ॥ नइसोत्तं । नईसोत्तं ॥ गौरिहरं । गौरीहरं ॥ वहुमुहं । वहूमुहं ॥ पदयोःसंधिर्वा ॥ ५ ॥ संस्कृतोक्तःसंधिःसर्वःप्राकृतेपदयोर्व्यवस्थितविभाषयाभवति ॥ वासेसी । वासइसी ॥ विसमाअवो । विसमआयवो ॥ दहिईसरो । दहीसरो ॥ साऊअयं । साउउअयं ॥ पदयोरितिकिं ॥ पाओ । पई । वत्थाओ । मुद्धाइ । मुद्धाए ॥ महइ । महए ॥ बहुलाधिकारात् क्वचिदेकपदेपि ॥ काहिइ । काही ॥ बिइओ । बीओ ॥ नयुवर्णस्याऽस्वे ॥ ६ ॥ इवर्णस्यउवर्णस्यचास्ववर्णेपरेसंधिर्नभवति ॥ नवेरिवग्गेविअवआसो । वंदामि अज्जवइरं ॥ दणुइंदरुहिरलित्तो सहइउइंदोनहप्पहावलिअरुणो ॥ संज्झावहुअवऊढो नववारिहरव्वविज्जुलापडिभिन्नो ॥ युवर्णस्येतिकिं ॥ गूढोअरतामरसानुसारिणीभमरपंतिव्व ॥ अस्वइतिकिं ॥ पुहवीसो ॥ एदोतोः स्वरे ॥ ७ ॥ एकारओकारयोःस्वरेपरेसंधिर्नभवति ॥ वहुआएनहुल्लिहणे आवंधंतीइकंचुअंअंगे ॥ मअरद्ध

सरधोरणि धाराछेअव्वदीसंति ॥ १ ॥ उवमासुअपज्जत्तेभ कलभदंतावहासमूरुजुअं ॥ तंचेअमलिअविसदंड विरसमालक्खिमोएण्हिं ॥ २ ॥ अहोअच्छरिअं ॥ एदोतोरितिकिं ॥ अत्थालोअणतरला इयरकईणंभमंतिबुद्धीओ ॥ अच्छच्चिअनिरारंभ मितिहिअयंकइंदाणं ॥ १ ॥ स्वरस्योद्वृत्ते ॥ ८ ॥ व्यञ्जनसंपृक्तःस्वरोव्यञ्जनेलुप्ते योऽवशिष्यते सउद्वृत्तइहोच्यते ॥ स्वरस्यउद्वृत्तेस्वरेपरेसंधिर्नभवति ॥ गयणेच्चिअगंधउडिंकुणंति ॥ निसाअरो । निसिअरो ॥ रयणिअरो । मणुअत्तं ॥ बहुलाधिकारात् क्वचिद्विकल्पः ॥ कुम्भयारो । कुम्भारो ॥ सुउरिसो । सूरिसो ॥ क्वचित्संधिरेव ॥ सालाहणो । चक्काओ ॥ अतएवप्रतिषेधात्समासेपिस्वरस्यसंधौभिन्नपदत्वम् ॥ त्यादेः ॥ ९ ॥ तिवादीनांस्वरस्यस्वरेपरेसंधिर्नभवति ॥ भवतिइह । होइइह ॥ लुक् ॥ १० ॥ स्वरस्यस्वरेपरेबहुलंलुग्भवति ॥ त्रिदशेशः । तिअसीसो । निश्वासोच्छ्वासौ । नीसासूसासा ॥ अंत्यव्यंजनस्य ॥ ११ ॥ शब्दानांयदंत्यव्यंजनंतस्यलुग्भवति ॥ जाव । ताव । जसो । तमो । जम्मो ॥ समासेतुवाक्यविभक्त्यपेक्षायामंत्यत्वमनंत्यत्वंचतेनोभयमपिभवति ॥ सद्भिक्षुः । सभिक्खू ॥ सज्जनः । सज्जणो ॥ एतद्गुणाः । एअगुणा ॥ तद्गुणाः । तग्गुणाः ॥ नश्रदुदोः ॥ १२ ॥

श्रद्उद्इत्येतयोरंत्यव्यंजनस्यलुग्नभवति ॥ सद्दहिअं । सद्धा । उग्गयं । उन्नयं ॥ निर्दुरोर्वा ॥ १३ ॥ निर्दुरइत्येतयोरंत्यव्यंजनस्यवालुग्नभवति ॥ निस्सहं । नीसहं ॥ दुस्सहो । दूसहो ॥ दुक्खिओ । दुहिओ ॥ स्वरेऽन्तरश्च ॥ १४ ॥ अन्तरोनिर्दुरोश्चान्त्यव्यंजनस्यस्वरेपरेलुग्नभवति ॥ अंतरप्पा ॥ निरंतरं ॥ निरवसेसं ॥ दुरुत्तरं ॥ दुरवगाहं ॥ क्वचिद्भवत्यपि ॥ अंतोवरि ॥ स्त्रियामादविद्युतः ॥ १५ ॥ स्त्रियांवर्त्तमानस्यशब्दस्यांत्यव्यंजनस्यात्वंभवति विद्युच्छब्दंवर्जयित्वा ॥ लुगपवादः ॥ सरित् । सरिआ ॥ प्रतिपद् । पाडिवआ ॥ संपद् । संपआ । बहुलाधिकारादीषत्स्पृष्टतरयश्रुतिरपि ॥ सरिया ॥ पाडिवया ॥ संपया ॥ अविद्युतइतिकिं ॥ वीहू ॥ रोरा ॥ १६ ॥ स्त्रियांवर्त्तमानस्यांत्यस्यरेफस्यराइत्यादेशोभवति ॥ आत्वापवादः ॥ गिरा ॥ धुरा ॥ पुरा ॥ क्षुधोहा ॥ १७ ॥ क्षुध्शब्दस्यांत्यव्यंजनस्यहादेशोभवति ॥ छुहा ॥ शरदादेरत् ॥ १८ ॥ शरदादेरंत्यव्यंजनस्याद्भवति ॥ शरद् । सरओ ॥ भिषक् । भिसओ ॥ दिक्प्रावृषोःसः ॥ १९ ॥ एतयोरंत्यव्यंजनस्यसोभवति ॥ दिसा ॥ पाउसो ॥ आयुरप्सरसोर्वा ॥ २० ॥ एतयोरंत्यव्यंजनस्यसोवाभवति ॥ दीहाउसो । दीहाऊ ॥

अच्छरसा । अच्छरा ॥ ककुभोहः ॥ २१ ॥ ककुभशब्दस्यांत्यव्यंजनस्यहोभवति ॥ कउहा ॥ धनुषोवा ॥ २२ ॥ धनुःशब्दस्यांत्यव्यंजनस्यहोवाभवति ॥ धणुहं । धणू ॥ मोनुस्वारः ॥ २३ ॥ अंत्यमकारस्यानुस्वारो भवति ॥ जलं फलं वच्छं गिरिं पेच्छ ॥ क्वचिदनंत्यस्यापि ॥ वणम्मि । वणंमि ॥ वास्वरेमश्च ॥ २४ ॥ अंत्यमकारस्यस्वरेपरेऽनुस्वारोवाभवति पक्षेलुगपवादोमस्यमकारश्चभवति ॥ वंदेउसभंअजिअं ॥ उसभमजिअं चवंदे ॥ बहुलाधिकारादन्यस्यापिव्यंजनस्यमकारः ॥ साक्षात् । सक्खं ॥ यत् । जं ॥ तत् । तं ॥ विष्वक् । वीसुं ॥ पृथक् । पिहं ॥ सम्यक् । सम्मं ॥ इहं । इहयं ॥ आलेट्ठुयमित्यादि ॥ ङञणनोव्यंजने ॥ २५ ॥ ङ ञ ण न इत्येषांस्थानेव्यंजनेपरेअनुस्वारोभवति ॥ ङ । पङ्क्तिः । पंती ॥ पराङ्मुखः । परंमुहो ॥ ञ ॥ कञ्चुकः । कंचुओ ॥ लाञ्छनं । लंछनं ॥ ण । षण्मुखः । छंमुहो ॥ उत्कण्ठा । उक्कंठा ॥ न । सन्ध्या । संझा ॥ विन्ध्यः । विंझो ॥ वक्रादावंतः ॥ २६ ॥ वक्रादिषुयथादर्शनंप्रथमादेःस्वरस्यांतआगमरूपोऽनुस्वारोभवति । वंकं । तंसं । अंसू । मंसू पुंछं गुंछं मुंढा पंसू बुंधं कंकोडो कुंपलं दंसणं विंछिओ गिंठी मंजारो एष्वाद्यस्यासीत् ॥ वयंसो मणंसी मणं

सिणी मणंसिला पडंसुआ एषुद्वितीयस्य ॥ अवरिं । अणिउंतयं । अइमुंतयं । अनयोस्तृतीयस्य ॥ वक्र त्र्यस्त्र अश्रु श्मश्रु पुच्छ गुच्छ मूर्द्धन् पर्शु बुध्न कर्कोट कुड्मल दर्शन वृश्चिक गृष्टि मार्जार वयस्य मनस्विन् मनस्विनी मनःशिला प्रतिश्रुत् उपरि अतिमुक्तक इत्यादि ॥ क्वचिच्छंदःपूरणेपि ॥ देवंनागसुवण्णं ॥ क्वचिन्नभवति ॥ गिट्ठी। मज्जारो । मणसिला ॥ आर्षेमणोसिला। अइमुत्तयं ॥ क्त्वास्यादेर्णस्वोर्वा ॥ २७ ॥ क्त्वायाःस्यादीनांचयौ णसू तयोरनुस्वारोऽन्तोवाभवति ॥ क्त्वा ॥ काऊणं । काऊण ॥ काउआणं । काउआण ॥ स्यादि ॥ वच्छेणं । वच्छेण ॥ वच्छेसुं । वच्छेसु ॥ णस्वोरितिकिं ॥ करिअ । अग्गिणो ॥ विंशत्यादेर्लुक् ॥ २८ ॥ विंशत्यादीनामनुस्वारस्यलुग्भवति ॥ विंशतिः । वीसा ॥ त्रिंशत् । तीसा ॥ संस्कृतं । सक्कयं ॥ संस्कारः । सक्कारो इत्यादि ॥ मांसादेर्वा ॥ २९ ॥ मांसादेरनुस्वारस्यलुग्वाभवति ॥ मासं । मंसं ॥ मासलं । मंसलं ॥ कासं । कंसं ॥ पासू । पंसू ॥ कह । कहं ॥ एव । एवं । नूण । नूणं ॥ इयाणि । इयाणिं ॥ दाणि । दाणिं ॥ कि करेमि । किं करेमि ॥ समुहं । संमुहं ॥ किसुअं । किंसुअं ॥ सीहो । सिंघो ॥ मांस । मांसल । कांस्य । पांसु । कथं । एवं । नूनं । इदानीं । दानीं ।

किं । सन्मुख । किंशुक । सिंह इत्यादि ॥ वर्गेऽन्त्योवा ॥ ३० ॥ अनुस्वारस्यवर्गेपरेप्रत्यासत्तेस्तस्यैववर्गस्यांत्योवाभवति ॥ पङ्को । पंको ॥ सङ्खो । संखो ॥ अङ्गणं । अंगणं ॥ लङ्घणं । लंघणं ॥ कञ्चुओ । कंचुओ ॥ लञ्छणं । लंछणं ॥ अञ्जिअं । अंजिअं ॥ सञ्झा । संझा ॥ कण्ठओ । कंठओ ॥ उक्कण्ठा । उक्कंठा ॥ कण्डं । कंडं ॥ सण्ढो । संढो ॥ अन्तरं । अंतरं ॥ पन्थो । पंथो ॥ चन्दो । चंदो ॥ बन्धवो । बंधवो ॥ कम्पइ । कंपइ ॥ वम्फइ । वंफइ ॥ कलम्बो । कलंबो ॥ आरम्भो । आरंभो ॥ वर्गइति किं ॥ संसओ ॥ संहरइ ॥ नित्यमिच्छंत्यन्ये ॥ प्रावृट्शरत्तरणयःपुंसि ॥ ३१ ॥ प्रावृट् शरद् तरणि इत्येतेशब्दाःपुंसिपुल्लिंगेप्रयोक्तव्याः ॥ पाउसो । सरओ । एसतरणी ॥ तरणिशब्दस्यपुंस्त्रीलिंगत्वेननियमार्थमुपादानं ॥ स्नमदामशिरोनभः ॥ ३२ ॥ दामन् शिरस् नभस् वर्जितंसकारांतंनकारांतंचशब्दरूपंपुंसिप्रयोक्तव्यं ॥ सांतं ॥ जसो । पओ । तमो । तेओ । उरो ॥ नांतं । जम्मो । नम्मो । मम्मो । अदामशिरोनभइतिकिं ॥ दामं । सिरं । नहं ॥ यच्च सेयं । वयं । सुमणं । सम्मं । चम्ममितिदृश्यते तद्बहुलाधिकारात् ॥ वाक्ष्यर्थवचनाद्याः ॥ ३३ ॥ अक्षिपर्यायावचनादयश्चशब्दाःपुंसि वा प्र

योक्तव्याः ॥ अक्ष्यर्थाः ॥ अज्जविसालवइ ते अच्छी ॥ नच्चाविआइंतेणम्हअच्छीइं ॥ अंजल्यादिपाठादक्षिशब्दःस्त्रीलिंगेपि ॥ एसाअच्छी । चक्खू । चक्खूइं ॥ नयणा । नयणाइं ॥ लोअणा । लोअणाइं ॥ वचनादिः॥वअणा । वअणाइं ॥ विज्जुणा । विज्जुए ॥ कुलो । कुलं ॥ छंदो । छंदं ॥ माहप्पं । माहप्पो । दुक्खा । दुक्खाइं ॥ भाअणा । भाअणाइं इत्यादि वचनादयः ॥ नेत्ता । नेत्ताइं ॥ कमला । कमलाइं इत्यादितुसंस्कृतवदेवसिद्धं ॥ **गुणाद्याःक्लीबेवा ॥ ३४ ॥** गुणादयःक्लीबेवाप्रयोक्तव्याः ॥ गुणाइं । गुणा ॥ विहवेहिंगुणाइंमग्गंति ॥ देवाणि । देवा ॥ बिंदूइं । बिंदुणो ॥ खग्गं । खग्गो ॥ मंडलग्गं । मंडलग्गो ॥ कररुहं । कररुहो ॥ रुक्खाइं । रुक्खा इत्यादि ॥ इतिगुणादयः ॥ **वेमांऽजल्याद्याःस्त्रियां ॥ ३५ ॥** इमांताअंजल्यादयश्चशब्दाःस्त्रियांवाप्रयोक्तव्याः ॥ एसा गरिमा । एसगरिमा ॥ एसामहिमा । एसमहिमा ॥ एसानिल्लज्जिमा । एसनिल्लज्जिमा ॥ एसाधुत्तिमा । एसधुत्तिमा ॥ अंजल्यादि ॥ एसाअंजली । एसअंजली ॥ पिट्ठी । पिट्ठं ॥ पृष्ठमित्वेकृतेस्त्रियामेवेत्यन्ये ॥ अच्छी । अच्छिं ॥ पण्हा । पण्हो ॥ चोरिआ । चोरिअं ॥ एवं कुच्छी । बली । निही । विही । रस्सी । गंठी इत्यंजल्यादयः ॥

गड्डा गड्डोइतितुसंस्कृतवदेवसिद्धं ॥ इमेतितंत्रेणत्वादेशस्यडिमाइत्यस्यपृथ्व्यादीम्नश्चसंग्रहः ॥ त्वादेशस्यस्त्रीत्वमेवेच्छंत्यन्ये ॥ **बाहोरात् ॥ ३६ ॥** बाहुशब्दस्यस्त्रियामाकारोंतादेशोभवति ॥ बाहाएजेणधरिओएक्काए ॥ स्त्रियामित्येव ॥ वामेअरोबाहू ॥ **अतोडोविसर्गस्य ॥ ३७ ॥** संस्कृतलक्षणोत्पन्नस्यातःपरस्यविसर्गस्यस्थानेडो इत्यादेशोभवति ॥ सर्वतः । सव्वओ ॥ पुरतः । पुरओ ॥ अग्रतः । अग्गओ ॥ मार्गतः । मग्गओ ॥ एवंसिद्धावस्थापेक्षया ॥ भवतः । भवओ ॥ भवंतः । भवंतो ॥ संतः । संतो ॥ कुतः । कुदो ॥ **निष्प्रतीउत्परीमाल्यस्थोर्वा ॥ ३८ ॥** निरप्रतिइत्येतौमाल्यशब्देस्थाधातौचपरेयथासंख्यंउत्परिइत्येवंरूपौवाभवतः ॥ अभेदनिर्देशः सर्वादेशार्थः ॥ उमालं । निम्मलं । उमालयं वहइ ॥ परिट्ठा । पइट्ठा ॥ परिट्ठिअं । पइट्ठिअं ॥ **आदेः ॥ ३९ ॥** आदेरित्यधिकारःकगचजेत्यादिसूत्रात्प्राग्विशेषेवेदितव्यः ॥ **त्यदाद्यव्ययात्तत्स्वरस्यलुक् ॥ ४० ॥** त्यदादेरव्ययाच्चपरस्यतयोरेवत्यदाद्यव्यययोरादेःस्वरस्यबहुलंलुग्भवति ॥ अम्हेत्थ । अम्हेएत्थ ॥ जइमा । जइइमा ॥ जइहं । जइअहं ॥ **पदादपेर्वा ॥ ४१ ॥** पदात्परस्यअपेरव्ययस्यादेर्लुग्वाभवति ॥ तंपि । तमवि ॥ किंपि । कि

मवि ॥ केणवि । केणावि ॥ कहंपि । कहमवि ॥ इतेःस्वरात्तश्चद्विः ॥ ४२ ॥ पदात्परस्यइतेरादेर्लुग्भवति स्वरात्परस्यतकारोद्विर्भवति ॥ किंति । जंति । दिट्ठंति । नजुत्तंति।स्वरात् ॥ तहत्ति । झत्ति । पिउत्ति । पुरिसोत्ति ॥ पदादित्येव ॥ इयविंझगुहानिलयाए ॥ लुप्तयरवशषसांशषसांदीर्घः ॥ ४३ ॥ प्राकृतलक्षणवशाल्लुप्तायाद्याउ पर्यधोवायेषांशकारषकारसकाराणांतेषामादेःस्वरस्यदीर्घोभवति ॥ शस्ययलोपे ॥ पश्यति । पासइ ॥ कश्यपः । कासवो ॥ आवश्यकं । आवासयं ॥ रलोपे । विश्राम्यति । वीसमइ ॥ विश्रामः । वीसामो ॥ मिश्रं । मीसं ॥ संस्प र्शः । संफासो ॥ वलोपे । अश्वः । आसो ॥ विश्वसिति । वीससइ ॥ विश्वासः । वीसासो ॥ शलोपे । दुश्शास नः । दूसासणो ॥ मनःशिला । मणासिला ॥ षस्ययलोपे । शिष्यः । सीसो ॥ पुष्यः । पूसो ॥ मनुष्यः । मणूसो ॥ रलोपे । कर्षकः । कासओ ॥ वर्षाः । वासा ॥ वर्षः । वासो ॥ वलोपे । विष्वाणः । वीसाणो ॥ विष्वक् । वीसुं ॥ षलोपे । निष्षिक्तः । नीसित्तो ॥ सस्ययलोपे । सस्यम् । सासं ॥ कस्यचित् । कासइ ॥ रलोपे । उस्रः । ऊसो ॥ वि स्रंभः । वीसंभो ॥ वलोपे । विकस्वरः । विकासरो ॥ निःस्वः । नीसो ॥ सलोपे ॥ निस्सहः । नीसहो ॥ नदीर्घानु

स्वारादितिप्रतिषेधात्सर्वत्रानादौशेषादेशयोर्द्वित्वमितिद्वित्वाभावः ॥ अतःसमृध्द्यादौवा ॥ ४४ ॥ समृद्धिइ त्येवमादिषुशब्देष्वादेरकारस्यदीर्घोभवति ॥ सामिद्धी । समिद्धी ॥ पासिद्धी । पसिद्धी ॥ पायडं । पयडं ॥ पाडि वआ । पडिवआ ॥ पासुत्तो । पसुत्तो ॥ पाडिसिद्धी । पडिसिद्धी ॥ सारिच्छो । सरिच्छो ॥ माणंसी । मणंसी ॥ माणं सिणी । मणंसिणी ॥ आहिआई । अहिआई ॥ पारोहो । परोहो ॥ पावासू । पवासू ॥ पाडिप्फद्धी । पडिप्फद्धी ॥ समृद्धि । प्रसिद्धि । प्रकट । प्रतिपत् । प्रसुप्त । प्रतिसिद्धि । सदृक्ष । मनस्विन् । मनस्विनी । अभियाति । प्ररोह । प्र वासिन् । प्रतिस्पर्द्धिन् ॥ आकृतिगणोयं ॥ तेनअस्पर्शः । आफंसो । परकीयं । पारकेरं । पारक्कं । प्रवचनं । पावअणं चउरंतं । चाउरंतमित्याद्यपिभवति ॥ दक्षिणेहे ॥ ४५ ॥ दक्षिणशब्देआदेरतोहेपरेदीर्घोभवति ॥ दाहिणो ॥ हेइतिकिं ॥ दक्खिणो ॥ इःस्वप्नादौ ॥ ४६ ॥ स्वप्नइत्येवमादिष्वादेरस्यइत्वंभवति ॥ सिविणो । सिमिणो ॥ आर्षेउकारोपि ॥ सुमिणो । ईसि । वेडिसो । विलिअं । विअणं । मुइंगो । किविणो । उत्तिमो । मिरियं । दिण्णं ॥ बहु लाधिकाराण्णत्वाऽभावेनभवति ॥ दत्तं । देवदत्तो ॥ स्वप्न । ईषत् । वेतस । व्यलीक । व्यजन । मृदङ्ग । कृपण ।

उत्तम । मरिच । दत्त इत्यादि ॥ पक्वाङ्गारललाटेवा ॥ ४७ ॥ एष्वादेरतइत्वंवाभवति ॥ पिक्कं । पक्कं ॥ इं
गालो । अंगारो ॥ णिडालं । णडालं ॥ मध्यमकतमेद्वितीयस्य ॥ ४८ ॥ मध्यमकतमशब्देद्वितीयस्यातइ
त्वंभवति ॥ मज्झिमो । कइमो ॥ सप्तपर्णेवा ॥ ४९ ॥ सप्तपर्णेद्वितीयस्याऽतइत्वंवाभवति ॥ छत्तिवण्णो । छ
त्तवण्णो ॥ मयट्यइर्वा ॥ ५० ॥ मयट्प्रत्ययेआदेरतःस्थानेअइइत्यादेशोवाभवति ॥ विषमयः । विसमइओ
। विसमओ ॥ ईर्हरेवा ॥ ५१ ॥ हरशब्देआदेरतईर्वाभवति ॥ हीरो । हरो ॥ ध्वनिविष्वचोरुः ॥ ५२ ॥
अनयोरादेरस्यउत्वंभवति ॥ झुणी । वीसुं । कथं सुणओ ॥ शुनकइतिप्रकृत्यंतरस्य ॥ स्वनशब्दस्यतुसा साणोइ
तिप्रयोगौभवतः ॥ चण्डखण्डितेणावा ॥ ५३ ॥ अनयोरादेरस्यणकारेणसहितस्यउत्वंवाभवति ॥ चुडं । चं
ण्डं ॥ खुडिओ । खण्डिओ ॥ गवयेवः ॥ ५४ ॥ गवयशब्देवकाराऽकारस्यउत्वंभवति ॥ गउओ । गउआ ॥ प्रथ
मेपथोर्वा ॥ ५५ ॥ प्रथमशब्देपकारथकारयोरकारस्ययुगपत्क्रमेणचउकारोवाभवति ॥ पुढुमं । पुढमं । पढुमं । प
ढमं ॥ ज्ञोणत्वेऽभिज्ञादौ ॥५६॥ अभिज्ञएवंप्रकारेषुज्ञस्यणत्वेकृतेज्ञस्यैवाऽतउत्वंभवति ॥ अहिण्णू । सव्वण्णू ।

कयण्णू । आगमण्णू । णत्वइतिकिं ॥ अहिज्जो । सव्वज्जो ॥ अभिज्ञादावितिकिं ॥ आज्ञः । पण्णो ॥ येषांज्ञस्यणत्वे
उत्वंदृश्यतेतेअभिज्ञादयः ॥ एच्छय्यादौ ॥ ५७ ॥ शय्यादिष्वादेरस्यएत्वंवाभवति ॥ सेज्जा । सुंदेरं । गेंदुअं ।
एत्थं ॥ शय्या । सौंदर्य । कंदुक । अत्र ॥ आर्षेपुरेकम्मं ॥ वल्युत्करपर्यंताश्चर्येवा ॥ ५८ ॥ एष्वादेरस्यएत्वंवा
भवति ॥ वेल्ली । वल्ली ॥ उक्केरो । उक्करो ॥ पेरंतो । पज्जंतो ॥ अच्छेरं । अच्छरिअं । अच्छअरं । अच्छरिज्जं । अच्छ
रीयं ॥ ब्रह्मचर्येचः ॥ ५९ ॥ ब्रह्मचर्यशब्देचस्याऽतएत्वंभवति ॥ बम्भचेरं ॥ तोंऽतरि ॥६०॥ अंतरशब्देतस्या
ऽतएत्वंभवति ॥ अंतःपुरं । अंतेउरं ॥ अंतश्चारी । अंतेआरी ॥ क्वचिन्नभवति ॥ अंतग्गअं । अंतोवीसंभनिवेसि
आए ॥ ओत्पद्मे ॥ ६१ ॥ पद्मशब्देआदेरतओत्वंभवति ॥ पोम्मं ॥ पद्मछद्मेतिविश्लेषेनभवति ॥ पउमं ॥ नम
स्कारपरस्परेद्वितीयस्य ॥ ६२ ॥ अनयोर्द्वितीयस्याऽतओत्वंभवति ॥ नमोक्कारो । परोप्परं ॥ वाऽर्पौ ॥ ६३ ॥
अर्पयतौधातौआदेरस्यओत्वंवाभवति ॥ ओप्पेइ । अप्पेइ ॥ ओप्पिअं । अप्पिअं ॥ स्वपावुच्च ॥ ६४ ॥ स्वपि
तौधातावादेरस्यओत्उच्चभवति ॥ सोवइ । सुवइ ॥ नात्पुनर्यादाइवा ॥ ६५ ॥ नञःपरेपुनःशब्देआदेरस्य

आ आइ इत्यादेशौवाभवतः ॥ नउणा । नउणाइ ॥ पक्षे । नउण । नउणो ॥ केवलस्याऽपि दृश्यते ॥ पुणाइ ॥ वाऽलाब्वरण्येलुक् ॥ ६६ ॥ अलाब्वरण्यशब्दयोरादेरस्यलुग्वाभवति ॥ लाउं । अलाउं । लाऊ । अलाऊ ॥ रण्णं । अरण्णं ॥ अतइत्येव ॥ आरण्णकुंजरोव्ववेल्लंतो ॥ वाऽव्ययोत्खातादावदातः॥६७॥ अव्ययेपुउत्खातादिषुचशब्देपुआदेराकारस्यअद्वाभवति ॥ अव्यये॥जह । जहा ॥ तह।तहा ॥ अहव।अहवा । व । वा । ह । हा इत्यादि॥उत्खातादि॥उक्खयं।उक्खायं॥ चमरो । चामरो ॥ कलओ । कालओ ॥ ठविओ । ठाविओ॥परिठविओ । पारिठाविओ ॥ संठविओ । संठाविओ ॥ पययं । पाययं ॥ तलविण्टं । तालविण्टं ॥ तलवोण्टं । तालवोण्टं ॥ हलिओ । हालिओ ॥ नराओ । नाराओ ॥ बलआ । बलाआ ॥ कुमरो । कुमारो ॥ खइरं । खाइरं ॥ उत्खात । चामर ॥ कालक । स्थापित ॥ प्राकृत । तालवृंत ॥ हालिक । नाराच ॥ बलाका । कुमार । खादिरइत्यादिक ॥ केचिद्ब्राह्मणपूर्वाण्हयोरपीच्छंति ॥ बम्हणो । बाम्हणो ॥ पुव्वण्हो । पुव्वाण्हो ॥ दवग्गी । दावग्गी ॥ चडू । चाडू इति शब्दभेदात्सिद्धम् ॥ घञ्वृद्धेर्वा ॥ ६८ ॥ घञ्निमित्तोयोवृद्धिरूपआकारस्तस्यादिभूतस्याद्वाभवति ॥ पवहो । पवाहो ॥ पहरो । पहारो ॥ पअरो । पआरो॥प्रकारःप्रचारोवा ॥ पत्थवो । पत्थावो ॥ क्वचिन्नभवति ॥ रागः । राओ ॥ महाराष्ट्रे ॥ ६९॥ महाराष्ट्रेशब्देआदेराकारस्याद्वाभवति ॥ मरहट्ठं । मारहट्ठो ॥ मांसादिष्वनुस्वारे ॥ ७० ॥ मांसप्रकारेष्वनुस्वारेसत्यादेरातोऽद्भवति ॥ मंसं । पंसू । पंसणो । कंसं । कंसिओ । वंसिओ । पंडवो । संसिद्धिओ ।संजत्तिओ॥ अनुस्वारइतिकिं ॥ मासं । पासू ॥ मांस । पांसु । पांसन । कांस्य । कांसिक । वांशिक । पांडव । सांसिद्धिक । सांयात्रिकइत्यादि ॥ श्यामाकेमः ॥७१॥ श्यामाकेमस्याद्भवति ॥ सामओ ॥इःसदादौवा॥ ७२ ॥ सदादिषुशब्देपुआतइत्वंवाभवति ॥ सइ । सआ ॥ निसिअरो । निसाअरो ॥ कुप्पिसो । कुप्पासो ॥ आचार्येचोऽच्च ॥ ७३ ॥ आचार्यशब्देचस्यातइत्वमत्वंचभवति॥ आइरिओ । आअरिओ ॥ईस्त्यानखल्वाटे ॥ ७४ ॥ स्त्यानखल्वाटयोरादेरातईर्भवति ॥ ठीणं। थीणं ॥ थिण्णं । खल्लीडो ॥ संखायमितितुसमःस्त्यःखाइतिखादेशेसिद्धं॥उःसास्नास्तावके॥७५॥ अनयोरादेरातउत्वंभवति ॥ सुण्हा । थुवओ ॥ ऊद्वाऽऽसारे ॥ ७६॥ आसारेआदेरातऊद्वाभवति ॥ ऊसारो । आसारो ॥ आर्यायांर्यःश्वश्र्वां ॥ ७७ ॥ आर्याशब्देश्वश्र्वांवाच्यायांर्यस्यातऊर्भवति ॥ अज्जू॥ श्वश्र्वामितिकिं॥ अ

ज्जा ॥ एद्ग्राह्ये ॥ ७८ ॥ ग्राह्यशब्देआदेरातएद्भवति ॥ गेज्झं ॥ द्वारेवा ॥ ७९ ॥ द्वारशब्देआतएद्वाभवति ॥
देरं ॥ पक्षे। दुआरं। दारं। वारं ॥ कथं नेरइओ । नारइओ । नैरयिकनारयिकशब्दयोर्भविष्यति ॥ आर्षेअन्यत्रा
पि ॥ पच्छेकम्मंअसहेज्जदेवासुर ॥ पारापतेरोवा ॥ ८० ॥ पारापतशब्देरस्थस्यातएद्वाभवति ॥ पारेवओ। पारा
वओ ॥ मात्रटिवा ॥ ८१ ॥ मात्रट्प्रत्ययेआतएद्वाभवति ॥ एत्तिअमेत्तं। एत्तिअमत्तं॥ बहुलाधिकारात्क्वचिन्मात्र
शब्देपि ॥ भोअणमेत्तं ॥ उदोद्वाऽऽर्द्रे ॥८२॥ आर्द्रशब्देआदेरातउदोच्चवाभवतः॥उल्लं।ओल्लं॥ पक्षे। अल्लं । अद्दं।
बाहसलिलपवहेणउल्लेइ ॥ ओदाल्यांपंक्तौ ॥ ८३ ॥ आलीशब्देपंक्तिवाचिनिआतओत्वंभवति ॥ ओली॥ पंक्ता
वितिकिं ॥ आलीसखी ॥ ह्रस्वःसंयोगेदीर्घस्य ॥८४॥ यथादर्शनंसंयोगेपरेह्रस्वोभवति॥आत्।आम्रम्।अम्बं॥
ताम्रम्। तम्बं ॥ विरहाग्निः । विरहग्गी ॥ आस्यम्। अस्सं ॥ ईत् ॥ मुनीन्द्रः। मुणिंदो ॥तीर्थम्। तित्थं ॥ ऊत् ॥ गुरू
ल्लापाः। गुरूल्लावा ॥ चूर्णः। चुण्णो ॥ एत् ॥ नरेन्द्रः । नरिंदो ॥ म्लेच्छः। मिलिच्छो दिट्ठिक्कथणवट्टं ॥ ओत् ॥ अ
धरोष्ठः। अहरुट्ठं ॥ नीलोत्पलं। नीलुप्पलं ॥ संयोगइतिकिं । आयासं ॥ ईसरो। ऊसवो ॥ इतएद्वा ॥ ८५ ॥

संयोगइतिनिवर्तते ॥ आदेरिकारस्यसंयोगेपरेएकारोवाभवति ॥ पेण्डं। पिण्डं ॥ धम्मेल्लं। धम्मिल्लं ॥ सेन्दूरं । सिन्दू
रं ॥ वेण्हू। विण्हू ॥ पेट्ठं। पिट्ठं ॥ वेल्लं। विल्लं ॥ क्वचिन्नभवति ॥ चिन्ता ॥ किंशुकेवा ॥ ८६ ॥ किंशुकशब्देआदे
रितएकारोवाभवति ॥ केसुअं। किंसुअं ॥ मिरायाम् ॥ ८७ ॥ मिराशब्देइतएकारोभवति ॥ मेरा ॥ पथिपृथि
वीप्रतिश्रुन्मूषिकहरिद्राबिभीतकेष्वत् ॥ ८८ ॥ एष्वादेरितोऽकारोभवति ॥ पहो। पुहई। पुढवी ॥ पडंसुआ।
मूसओ। हलद्दी। हलद्दा ॥ बहेडओ ॥ पंथंकिरदेसित्तेतितुपथिशब्दार्थसमानार्थस्यपन्थशब्दस्यभविष्यति ॥ ह
रिद्रायांविकल्पइत्यन्ये ॥ हलिद्दी। हलिद्दा ॥ शिथिलेंगुदेवा ॥ ८९ ॥ अनयोरादेरितोऽद्वाभवति ॥ सढिलं। प
सढिलं। सिढिलं। पसिढिलं। अंगुअं। इंगुअं ॥ निर्मितशब्देतुवाआत्वंनविधेयं ॥ निर्मातनिर्मितशब्दाभ्यामेव
सिद्धेः॥ तित्तिरौरः ॥ ९० ॥ तित्तिरशब्देरस्थेतोऽद्भवति ॥ तित्तिरो ॥ इतौतोवाक्यादौ ॥ ९१ ॥ वाक्यादिभू
तेइतिशब्देयस्तस्तत्संबंधिनइकारस्याऽकारोभवति ॥ इअजंपिआवसाणे। इअविअसिअकुसुमसरो ॥ वाक्यादा
वितिकिं ॥ पिउत्ति। पुरिसोत्ति ॥ ईर्जिह्वासिंहत्रिंशद्विंशतौत्या ॥ ९२ ॥ जिह्वादिषुइकारस्यतिशब्देनसहईर्भ

वति ॥ जीहा । सीहो । तीसा । वीसा ॥ बहुलाधिकारात्क्वचिन्नभवति ॥ सिहदत्तो । सिंहराओ ॥ लुकिनिरः ॥ ९३॥ निरउपसर्गस्यरेफलोपेसतिइतईकारोभवति ॥ नीसरइ । नीसासो ॥ लुकीतिकिं ॥ निन्नओ । निस्सहाइं अंगाइं ॥ द्विन्योरुत् ॥ ९४ ॥ द्विशब्देनावुपसर्गेचइतउद्भवति ॥ द्वि ॥ दुमत्तो । दुआई । दुविहो । दुरेहो । दुवयणं॥ बहुलाधि कारात्क्वचिद्विकल्पः ॥ दुउणो । विउणो । दुइओ । बिइओ॥ क्वचिन्नभवति ॥ द्विजः । दिओ ॥ द्विरदः । दिरओ ॥ क्वचि दोत्वमपि ॥ दोवयणं ॥ नि ॥ णुमज्जइ । णुमन्नो ॥ क्वचिन्नभवति ॥ निवडइ ॥ प्रवासीक्षौ ॥ ९५ ॥ अनयो रादेरितउत्वंभवति ॥ पावासुओ । उच्छू ॥ युधिष्ठिरेवा ॥ ९६ ॥ युधिष्ठिरशब्देआदेरितउत्वंवाभवति ॥ जहुट्ठि लो । जहिट्ठिलो ॥ ओच्चद्विधाकृगः ॥ ९७ ॥ द्विधाशब्देकृग्धातोःप्रयोगेइतओत्वंचकारादुत्वंचभवति ॥ दोहा किज्जइ । दुहाकिज्जइ ॥ दोहाइअं । दुहाइअं ॥ कृगइतिकिं ॥ दिहागअं ॥ क्वचित्केवलस्यापि ॥ दुहाविसोसुरव हूसत्थो ॥ वानिर्झरेना ॥ ९८ ॥ निर्झरशब्देनकारेणसहइतओकारोवाभवति ॥ ओज्झरो । निज्झरो ॥ हरी तक्यामीतोऽत् ॥ ९९ ॥ हरीतकीशब्देआदेरीकारस्याऽद्भवति ॥ हरडई ॥ आत्कश्मीरे ॥ १०० ॥ कश्मीरश

ब्देईतआद्भवति ॥ कम्हारा ॥ पानीयादिष्वित् ॥ १०१ ॥ पानीयादिषुशब्देषुईतइद्भवति ॥ पाणिअं । अलि अं । जिअइ । जिअउ । विलिअं । करिसो । सिरिसो । दुइअं । तइअं । गहिरं । उवणिअं । आणिअं । पलिविअं। ओसिअंतं । पसिअ । गहिअं । वम्मिओ । तआणिं ॥ पानीय । अलीक । जीवति । जीवतु । व्रीडित । करीष । शि रीष । द्वितीय । तृतीय । गभीर । उपनीत । आनीत । प्रदीपित । अवसीदत् । प्रसीद । गृहीत । वल्मीक । तदानीं इतिपानीयादयः ॥ बहुलाधिकारादेषुक्वचिन्नित्यंक्वचिद्विकल्पः ॥ तेनपाणीअं अलीअं जीअइ करीसो उवणीओ इत्यादिसिद्धं ॥ उज्जीर्णे ॥ २ ॥ जीर्णशब्देईतउद्भवति ॥ जुण्णसुरा ॥ क्वचिन्नभवति ॥ जिण्णेभोअणमत्तेओ ॥ ऊर्हीनविहीनेवा ॥ ३ ॥ अनयोरीतऊत्वंवाभवति ॥ हूणो । हीणो ॥ विहीणो । विहूणो ॥ विहीनइतिकिं ॥प हीणजरमरणा ॥ तीर्थेहे ॥ ४ ॥ तीर्थशब्देहेसतिईतऊत्वंभवति ॥ तूहं ॥ हेइतिकिं ॥ तित्थं ॥ एत्पीयूपापीडबि भीतककीदृशेदृशे ॥ ५ ॥ एष्वीतएत्वंभवति ॥ पेऊसं । आमेलो । बहेडओ । केरिसो । एरिसो ॥ नीडपीठेवा ॥ ॥ ६ ॥ अनयोरीतएत्वंवाभवति ॥ नेडं । नीडं ॥ पेढं । पीढं ॥ उतोमुकुलादिष्वत् ॥ ७ ॥ मुकुलइत्येवमादिषु

शब्देष्वादेरुतोऽत्वंभवति ॥ मउलं । मउलो । मउरं । मउडं । अगरुं । गरुई । जहिट्ठिलो । जहुट्ठिलो ॥ सोअमल्लं । गलोई ॥ मुकुल मुकुर मुकुट अगुरु गुर्वी युधिष्ठिर सौकुमार्य गुडूची इतिमुकुलादयः ॥ क्वचिदाकारोपि ॥ विद्रुतः ॥ विद्दाओ ॥ वोपरौ ॥ ८ ॥ उपरावुतोऽद्वाभवति ॥ अवरिं । उवरिं ॥ गुरौकेवा ॥ ९ ॥ गुरौस्वार्थेकेसतिआदेरुतोऽद्वाभवति ॥ गरुओ । गुरुओ ॥ कइतिकिं । गुरू ॥ इर्भ्रुकुटौ ॥ १० ॥ भ्रुकुटावादेरुतइर्भवति ॥ भिउडी ॥ पुरुषेरोः ॥ ११ ॥ पुरुषशब्देरोरुतइत्वंभवति ॥ पुरिसो । पउरिसं ॥ ईक्षुते ॥ १२ ॥ क्षुतशब्देआदेरुतईत्वंभवति ॥ छीअं ॥ ऊत्सुभगमुसलेवा ॥ १३ ॥ अनयोरादेरुतऊद्वाभवति ॥ सूहवो । सुहओ ॥ मूसलं । मुसलं ॥ अनुत्साहोत्सन्नेत्सच्छे ॥ १४ ॥ उत्साहोत्सन्नवर्जितेशब्देयौत्सच्छौतयोःपरयोरादेरुतऊद्भवति ॥ त्स ॥ ऊसओ । ऊसवो ॥ ऊसित्तो । ऊसरइ ॥ छ ॥ उद्गताःशुकायस्मात्सः ऊसुओ । ऊससइ ॥ अनुत्साहोत्सन्नइतिकिं ॥ उच्छाहो । उच्छन्नो ॥ लुंकिदुरोवा ॥ १५ ॥ दुरउपसर्गस्यरेफलोपेसतिउतऊत्वंवाभवति ॥ दूसहो । दुसहो ॥ दूहवो । दुहवो ॥ लुंकीतिकिं ॥ दुस्सहोविरहो ॥ ओत्संयोगे ॥ १६ ॥ संयोगेपरेआदेरुतओत्वंभवति ॥ तोण्डं ।

मोण्डं । पोक्खरं । कोट्टिमं । पोत्थओ । लोद्धओ । मोत्था । मोग्गरो । पोग्गलं । कोण्ठो । कोन्तो । वोक्कंतं ॥ कुतूहलेवान्हस्वश्च ॥ १७ ॥ कुतूहलशब्देउतओद्वाभवतितत्संनियोगेन्हस्वश्चवा ॥ कोउहलं । कुऊहलं । कोउहल्लम् ॥ अदूतः सूक्ष्मेवा ॥ १८ ॥ सूक्ष्मशब्देऊतोऽद्वाभवति ॥ सण्हम् । सुण्हं ॥ आर्षे । सुहुमं ॥ दुकूलेवालश्चद्विः ॥ १९ ॥ दुकूलशब्देऊकारस्यअत्वंवाभवति तत्संनियोगेचलकारोद्विर्भवति ॥ दुअल्लं । दुऊलं ॥ आर्षेदुगुल्लं ॥ ईर्वोद्व्यूढे ॥ १२० ॥ उद्व्यूढशब्देऊतईत्वंवाभवति ॥ उव्वीढं । उव्वूढं ॥ उर्भ्रूहनूमत्कंडूयवातूले ॥ २१ ॥ एषुऊतउत्वंभवति ॥ भुमया । हणुमन्तो । कंडुअइ । वाउलो ॥ मधूकेवा ॥ २२ ॥ मधूकशब्देऊतउद्वाभवति ॥ महुअं । महूअं ॥ इदेतौनूपुरेवा ॥ २३ ॥ नूपुरशब्देऊतइत्इत्येतौवाभवतः ॥ निउरं । नेउरं ॥ पक्षे नूपुरं ॥ ॥ ओत्कूष्मांडीतूणीरकूर्परस्थूलतांबूलगुडूचीमूल्ये ॥ २४ ॥ एषुऊतओद्भवति ॥ कोहण्डी । कोहली ॥ तोणीरं । कोप्परं । थोरं । तंबोलं । गलोई । मोल्लं ॥ स्थूणातूणेवा ॥ २५ ॥ अनयोरूतओत्वंवाभवति ॥ थोणा । थूणा ॥ तोणं । तूणं ॥ ऋतोऽत् ॥ २६ ॥ आदेर्ऋकारस्यात्वंभवति ॥ घृतं । घयं ॥ तृणं । तणं ॥ कृतं । कयं ॥ वृ

षभः । वसहो ॥ मृगः । मओ ॥ घृष्टः । घट्टो ॥ दुहाइअमितिकृपादिपाठात् ॥ आत्कृशामृदुकमृदुत्वेवा ॥२७॥ एष्वादेर्ऋतआद्वाभवति ॥ कासा । किसा ॥ माउक्कं । मउअं ॥ माउक्कं । मउत्तणं ॥ इत्कृपादौ ॥ २८ ॥ कृपाइत्यादिषुशब्देष्वादेर्ऋतइत्वंभवति ॥ किवा । हिअयं ॥ मिट्ठं रसेएव ॥ अन्यत्र मट्ठं । दिट्ठं । दिट्ठी । सिट्ठं । सिट्ठी । गिंठी । पिच्छी । भिऊ । भिंगो । भिंगारो । सिंगारो । सिआलो । घिणा । घुसिणं । विद्धकई । समिद्धी । इद्धी । गिद्धी । किसो । किसाणू । किसरा । किच्छं । तिप्पं । किसिओ । निवो । किच्चा । किई । धिई । किवो । किविणो । किवाणं । विंछिओ । वित्तं । वित्ती । हिअं । वाहित्तं । बिंहिओ । विसी । इसी । विइण्हो । छिहा । सइ । उक्किट्ठं ॥ क्वचिन्न भवति ॥ रिद्धी ॥ कृपा । त्हदय । मृष्ट । दृष्ट । दृष्टि । सृष्ट । सृष्टि । गृष्टि । पृथ्वी । भृगु । भृंग । भृङ्गार । शृङ्गार । सृगाल । घृणा । घुसृण । वृद्धकवि । समृद्धि । ऋद्धि । गृद्धि । कृश । कृशानु । कृसरा । कृच्छ्र । तृप्त । कृषित । नृप । कृत्या । कृति । धृति । कृप । कृपण । कृपाण । वृश्चिक । वृत्त । वृत्ति । त्हत । व्यात्हत । बृंहित । वृसी । ऋषि । वितृष्ण । स्पृहा । सकृत् । उत्कृष्ट ॥ पृष्ठेवाऽनुत्तरपदे ॥ २९ ॥ पृष्ठशब्देऽनुत्तरपदेऋतइद्भवतिवा ॥ पिट्ठी । पट्ठी । पिट्ठिपरिट्ठ

विअं ॥ अनुत्तरपदइतिकिं ॥ महिवट्ठं ॥ मसृणमृगांकमृत्युशृंगधृष्टेवा ॥ १३० ॥ एषुऋतइद्वाभवति ॥ मसिणं । मसणं ॥ मिअंको । मअंको ॥ मिच्चू । मच्चू ॥ सिंगं । संगं ॥ धिट्ठो । धट्ठो ॥ उदृत्वादौ ॥ ३१ ॥ ऋतुइत्यादिषुशब्देष्वादेर्ऋतउद्भवति ॥ उऊ । परामुट्ठो । पुट्ठो । पउट्ठो । पुहई । पउत्ती । पाउसो । पाउओ । भुई । पहुडि । पाहुडं । परहुओ । निहुअं । निउअं । विउअं । संवुअं । वुत्तन्तो । निव्वुअं । निव्वुई । वुंदं । वुंदावणो । वुड्ढो । वुड्ढी । उसहो । मुणालं । उजू । जामाउओ । माउओ । माउआ । भाउओ । पिउओ । पुहवी ॥ ऋतु । परामृष्ट । स्पृष्ट । प्रवृष्ट । पृथिवी । प्रवृत्ति । प्रावृष् । प्रावृत । भृति । प्रभृति । प्राभृत । परभृत । निभृत । निवृत । विवृत । संवृत । वृत्तांत । निर्वृत । निर्वृति । वृंद । वृंदावन । वृद्ध । वृद्धि । ऋषभ । मृणाल । ऋजु । जामातृक । मातृक । मातृका । भ्रातृक । पितृक । पृथ्वीइत्यादि ॥ निवृत्तवृन्दारकेवा ॥ ३२ ॥ अनयोर्ऋतउद्वाभवति ॥ निवुत्तं । निअत्तं । वुंदारआ । वंदारआ ॥ वृषभेवावा ॥ ३३ ॥ वृषभेऋतोवेनसहउद्वाभवति ॥ उसहो । वसहो ॥ गौणान्त्यस्य ॥ ३४ ॥ गौणपदस्ययोऽन्त्यऋत्तस्यउद्भवति ॥ माउमंडलं । माउहरं । माउसिआ । पिउसिआ । पिउवणं । पिउवई ॥ मातु

रिद्वा ॥३५॥ मातृशब्दस्यगौणस्यऋतइद्वाभवति ॥ माइहरं। माउहरं ॥ क्वचिदगौणस्यापि ॥ माईण ॥ उदूदो
न्मृषि ॥३६॥ मृषाशब्देऋतउत्‌ऊत्‌ओच्चभवंति ॥ मुसा । मूसा । मोसा ॥ मुसावाओ । मूसावाओ। मोसावाओ॥
॥ इदुतौवृष्टवृष्टिपृथङ्मृदंगनप्तृके॥ ३७॥ एषुऋतइकारोकारौभवतः॥ विट्ठो । वुट्ठो ॥ विट्ठी । वुट्ठी ॥ पिहं । पु
हं ॥ मिइंगो । मुइंगो ॥ नत्तिओ । नत्तुओ ॥ वाबृहस्पतौ ॥ ३८॥ बृहस्पतौशब्देऋतइदुतौवाभवतः ॥ बिहप्फई ।
बुहप्फई । पक्षे बहप्फई ॥ इदेदोद्वृंते ॥ ३९ ॥ वृंतशब्देऋतइत्‌एत्‌ओच्चभवंति ॥ विण्टं । वेण्टं । वोण्टं॥ रिःकेव
लस्य ॥४०॥ केवलस्यव्यंजनेनाऽसंपृक्तस्यऋतोरिरादेशोभवति ॥ रिद्धी । रिच्छो ॥ऋणर्ज्वृषभर्त्वृषौवा॥४१॥
ऋणऋजुऋषभऋतुऋषिषुऋतोरिर्वाभवति ॥ रिणं । अणं । रिजू । उजू ॥ रिसहो । उसहो ॥ रिऊ । उऊ ॥ रिसी । इसी॥
॥ दृशेःक्विप्टक्सकः ॥ ४२ ॥ क्विप्टक्सक्इत्येतदंतस्यदृशेर्धातोर्ऋतोरिरादेशोभवति ॥ सदृक् । सरिवण्णो।
सरिरूवो । सरिबंदीणं । सदृशः । सरिसो ॥ सदृक्षः । सरिच्छो ॥ एवंएआरिसो । भवारिसो । जारिसो । तारिसो । के
रिसो । एरिसो । अन्नादिसो । अम्हारिसो । तुम्हारिसो ॥ टक्सक्साहचर्यात्त्यदाद्यन्यादिसूत्रविहितःक्विबिहगृह्यते ॥

॥ १२ ॥

आदृतेढिः ॥ ४३ ॥ आदृतशब्देऋतोढिरादेशोभवति ॥ आढिओ ॥ अरिर्दृप्ते ॥ ४४ ॥ दृप्तशब्देऋतोऽरि
रादेशोभवति ॥ दरिओ ॥दरिअसीहेण ॥ लृतइलिःक्लृप्तक्लृन्ने ॥ ४५ ॥ अनयोर्लृतइलिरादेशोभवति ॥ किलि
न्नकुसुमोवआरेसु ॥ धाराकिलिन्नवन्तं ॥ एतइद्वावेदनाचपेटादेवरकेसरे ॥ ४६ ॥ वेदनादिष्वेतइत्वंवाभव
ति ॥ विअणा । वेअणा ॥ चविडा । विअड चवेडा विणोआ ॥ दिअरो । देवरो॥महमहिअदंसणकिसरं । केसरं ॥
महिला महेला इतितुमहिलमहेलाभ्यांसिद्धं ॥ ऊःस्तेनेवा ॥ ४७ ॥ स्तेनेएतऊद्वाभवति ॥ थूणो । थेणो ॥
ऐतएत् ॥ ४८ ॥ ऐकारस्यादौवर्त्तमानस्यएत्त्वंभवति ॥ सेला । सेन्नं । तेलुक्कं । एरावणो । केलासो । वेज्जो ।
केढवो । वेहव्वं ॥ इत्सैंधवशनैश्चरे ॥ ४९ ॥ एतयोरैतइत्वंभवति ॥ सिंधवं । सणिच्छरो ॥सैन्येवा ॥१५०॥
सैन्यशब्देएतइद्वाभवति ॥ सिन्नं । सेन्नं ॥ अइर्दैत्यादौच ॥ ५१ ॥ सैन्यशब्देदैत्यइत्येवमादिषुचऐतोअइइ
त्यादेशोभवति ॥ एत्वापवादः ॥ सइन्नं । दइच्चो । दइन्नं । अइसरिअं । भइरवो । वइजवणो । दइवअं । वइआ
लीअं । वइएसो । वइएहो । वइदब्भो । वइस्साणरो । कइअवं । वइसाहो । वइसालो । सइरं । चइत्तं ॥ दैत्य

दैन्य। ऐश्वर्य। भैरव। वैजवन। दैवत। वैतालीय। वैदेश। वैदेह। वैदर्भ। वैश्वानर। कैतव। वैशाख। वैशाल। स्वैर। चैत्य इत्यादि॥ विश्लेषेनभवति॥ चैत्यं। चेइअं॥ आर्षे। चैत्यवंदनं। चीवंदणं॥ वैरादौवा॥५२॥ वैरादिष्वैतोइरादेशोवाभवति॥ वइरं। वेरं॥ कइलासो। केलासो॥ कइरवं। केरवं॥ वइसवणो। वेसवणो॥ वइसंपायणो। वेसंपायणो॥ वइआलिओ। वेआलिओ॥ वइसिअं। वेसिअं॥ चइत्तो। चेत्तो॥ वैर। कैलास। कैरव। वैश्रवण। वैशंपायन। वैतालिक। वैशिक। चैत्र इत्यादि॥ एच्चदैवे॥ ५३॥ दैवशब्देऐतएत्अइश्चादेशोभवति॥ देव्वं। देवं॥ दइव्वं। दइवं॥ उच्चैर्नीचैस्यअः॥ ५४॥ अनयोरैतोअअइत्यादेशोभवति॥ उच्चअं। नीचअं॥ उच्चनीचाभ्यांकेपिसिद्धं॥ उच्चैर्नीचैसोस्तुरूपांतरनिवृत्त्यर्थंवचनं॥ ईत्धैर्ये॥ ५५॥ धैर्यशब्देऐतईद्भवति॥ धीरंहरइविसाओ॥ ओतोऽद्वान्योऽन्यप्रकोष्ठातोद्यशिरोवेदनामनोहरसरोरुहेक्तोश्चवः॥ ५६॥ एष्वोतोऽत्वंवाभवति तत्संनियोगेचयथासंभवंककारतकारयोर्वाऽऽदेशः॥ अन्नन्नं। अन्नुन्नं॥ पवट्ठो। पउट्ठो॥ आवज्जं। आउज्जं॥ सिरविअणा। सिरोविअणा॥ मणहरं। मणोहरं॥ सररुहं। सरोरुहं॥ ऊत्सोच्छ्वासे॥५७॥

सोच्छ्वासेशब्देओतऊद्भवति॥ सोच्छ्वासः। सूसासो॥ गव्यउआअः॥५८॥ गोशब्देअउआअइत्यादेशौभवतः॥ गउओ। गउआ। गाओ॥ हरस्सएसागाई॥ औतओत्॥ ५९॥ औकारस्याऽऽदेरोद्भवति॥ कौमुदी। कोमुई॥ यौवनं। जोव्वणं॥ कौस्तुभः। कोत्थुहो॥ कौशाम्बी। कोसंबी॥ क्रौंचः। कोंचो॥ कौशिकः। कोसिओ॥ उत्सौंदर्यादौ॥ १६०॥ सौंदर्यादिषुशब्देषुऔतउद्भवति॥ सुंदेरं। सुंदरिअं॥ मुंजायणो। सुंडो। सुद्धोअणी। दुवारिओ। सुगंधत्तणं। पुलोमी। सुवण्णिओ॥ सौंदर्य। मौंजायन। शौण्ड। शौद्धोदनि। दौवारिक। सौगन्ध्य। पौलोमी। सौवर्णिक॥ कौक्षेयकेवा॥ ६१॥ कौक्षेयकशब्देऔतउद्वाभवति॥ कुच्छेअयं। कोच्छेअयं॥ अउःपौरादौच॥६२॥ कौक्षेयकेपौरादिषुचऔतअउरादेशोभवति॥ कउच्छेअयं। पौरः। पउरो। पउरजणो॥ कौरवः। कउरवो॥ कौशलं। कउसलं॥ पौरुषं। पउरिसं॥ सौधं। सउहं॥ गौडः। गउडो॥ मौलिः। मउली॥ मौनं। मउणं॥ सौराः। सउरा॥ कौलाः। कउला॥ आच्चगौरवे॥ ६३॥ गौरवशब्देऔतआत्वंभवति॥ गारवं। गउरवं॥ नाव्यावः॥ ६४॥ नौशब्देऔतआवादेशोभवति॥ नावा॥ एत्त्रयोदशादौस्वरस्यसस्वरव्यंजनेन॥ ६५॥

त्रयोदशन्नित्येवंप्रकारेषुसंख्याशब्देष्वादेःस्वरस्यपरेणसस्वरव्यंजनेनसहएद्भवति ॥ तेरह । तेवीसा । तेतीसा ॥
॥ स्थविरविचकिलायस्कारे ॥ ६६ ॥ एष्वादेःस्वरस्यपरेणसस्वरव्यंजनेनसहएद्भवति ॥ थेरो । वेइल्लं । मुद्धवि
अइल्लपसूणपुंजाइत्यपिदृश्यते ॥ एक्कारो ॥ वाकदले ॥ ६७ ॥ कदलशब्देआदेःस्वरस्यपरेणसस्वरव्यंजनेनसह
एद्वाभवति ॥ केलं । कअलं ॥ केली । कअली ॥ वेतःकर्णिकारे ॥ ६८ ॥ कर्णिकारेइतःसस्वरव्यंजनेनसहए
द्वाभवति ॥ कणेरो । कण्णिआरो ॥ अयौवैत् ॥ ६९ ॥ अयिशब्देआदेःस्वरस्यपरेणसस्वरव्यंजनेनसहऐद्वाभव
ति ॥ ऐबीहेमि । अइउम्मत्तिए ॥ वचनादैकारस्यापिप्राकृतेप्रयोगः ॥ ओत्पूतरबदरनवमालिकानवफलिकापू
गफले ॥ १७० ॥ पूतरादिष्वादेःस्वरस्यपरेणसस्वरव्यंजनेनसहओद्भवति ॥ पोरो । बोरं । बोरी ॥ नोमालिआ।
नोहलिआ ॥ पोप्फलं । पोप्फली ॥ नवामयूखलवणचतुर्गणचतुर्थचतुर्दशचतुर्वारसुकुमारकुतूहलोदूखलो ॥ १४ ॥
लूखले ॥ ७१ ॥ मयूखादि वादेःस्वरस्यपरेणसस्वरव्यंजनेनसहओद्वाभवति ॥ मोहो । मऊहो ॥ लोणं । इअल
वणुग्गमा ॥ चोग्गुणो । चउग्गुणो ॥ चोत्थो । चउत्थो ॥ चोत्थी । चउत्थी ॥ चोद्दह । चउद्दह ॥ चोद्दसी । चउद्दसी ॥

चोव्वारो । चउव्वारो ॥ सोमालो । सुउमालो ॥ कोहलं । कोउहल्लं ॥ तहमन्नेकोहलिए ॥ ओहलो । उऊहलो ॥ ओक्खलं ।
उलूहलं ॥ मोरोमऊरोइतितुमोरमयूरशब्दाभ्यांसिद्धं ॥ अवापोतेच ॥ ७२ ॥ अवापयोरुपसर्गयोरुतइतिविकल्पार्थ
निपातेचआदेःस्वरस्यपरेणसस्वरव्यंजनेनसहओद्वाभवति ॥ ओअरइ । अवअरइ ॥ ओआसो । अवआसो ॥ अप ॥
ओसरइ । अवसरइ ॥ ओसारिअं । अवसारिअं ॥ उत ॥ ओवणं । उअवणं ॥ ओघणो । उअघणो ॥ क्वचिन्नभवति ॥
अवगअं । अवसद्दो । उअरवी ॥ ऊच्चोपे ॥ ७३ ॥ उपशब्देआदेःस्वरस्यपरेणसस्वरव्यंजनेनसहऊत्ओच्चादेशौवा
भवतः ॥ ऊहसिअं । ओहसिअं । उवहसिअं ॥ ऊज्झाओ । उज्झाओ । उवज्झाओ ॥ ऊआसो । ओआसो । उववा
सो ॥ उमोनिषण्णे ॥ ७४ ॥ निषण्णशब्देआदेःस्वरस्यपरेणसस्वरव्यंजनेनसहउमआदेशोवाभवति ॥ णुमण्णो ।
णिसण्णो ॥ प्रावरणेअङ्ग्वाऊ ॥ ७५ ॥ प्रावरणशब्देआदेःस्वरस्यपरेणसस्वरव्यंजनेनसह अङ्गु आउ इत्ये
तावादेशौवाभवतः ॥ पंगुरणं । पाउरणं । पावरणं ॥ स्वरादसंयुक्तस्यानादेः ॥ ७६ ॥ अधिकारोयम् ॥ यदित
ऊर्ध्वमनुक्रमिष्यामस्तत्स्वरात्परस्यासंयुक्तस्यानादेर्भवतीतिवेदितव्यं ॥ कगचजतदपयवांप्रायोलुक् ॥ ७७ ॥

स्वरात्परेषामनादिभूतानामसंयुक्तानांकगचजतदपयवानांप्रायोलुग्भवति ॥क॥ तित्थयरो । लोओ । सयढं ॥ग॥ नओ । नयरं । मयंको ॥च॥ सई । कयग्गहो ॥ज॥ रययं । पयावई । गओ ॥त॥ विआणं । रसायलं । जई ॥द॥ गया । मयणो ॥प॥ रिऊ । सुउरिसो ॥य॥ दयालू । नयणं । विउओ ॥व॥ लायण्णं । विउहो । वलयाणलो ॥ प्रायोग्रहणात्क्वचिन्नभवति ॥ सुकुसुमं । पयागजलं । सुगओ । अगरू । सचावं । विजणं । सुतारं । विदुरो । सपावं । समवाओ । देवो । दाणवो ॥ स्वरादित्येव ॥ संकरो । संगमो । नत्तंचरो । धणंजओ । विसंतवो । पुरंदरो । संवुडो । संवरो ॥ असंयुक्तस्येत्येव ॥ अक्को । वग्गो । अग्घो । वज्जं । धुत्तो । उद्दामो । कज्जं । सव्वं ॥ क्वचित्संयुक्तस्यापि ॥ नक्तंचरः । नक्कंचरो ॥ अनादेरित्येव ॥ कालो । गंधो । चोरो । जारो । तरू । दवो । पावं । वण्णो ॥ यकारस्यतुजत्वमादौवक्ष्यते ॥ समासेतुवाक्यविभक्त्यपेक्षयाभिन्नपदत्वमपिविवक्ष्यते । तेनतत्रयथादर्शनमुभयमपिभवति । सुहंकरो । सुहयरो ॥ आगमिओ । आयमिओ ॥ जलचरो । जलयरो ॥ बहुतरो । बहुयरो ॥ सुहदो । सुहओ इत्यादि ॥ क्वचिदादेरपि ॥ सपुनः सउण ॥ सच । सोअ ॥ चिन्हं । इन्धं ॥ क्वचिच्चस्यजः ॥ पिशाची । पिसाजी ॥ एगत्तं । एक । एगो ॥ अमुकः । अमुगो ॥ श्रावकः । सावगो ॥ आकारः ।

आगारो ॥ तीर्थकरः । तित्थगरो ॥ आकर्षः । आगरिसो ॥ लोगस्सुज्जोअगराइत्यादिषुतुव्यत्ययश्चेत्येव कस्यगत्वं ॥ आर्षेअन्यदपिदृश्यते ॥ आकुंचनं । आउंटणं । अत्रचस्यटत्वं ॥ यमुनाचामुंडाकामुकाऽतिमुक्तकेमोऽनुनासिकश्च ॥७८॥ एषुमस्यलुग्भवति लुकिचसतिमस्यस्थानेअनुनासिकोभवति ॥ जउँणा । चाउँडा । काउँओ । अणिउँतयं ॥ क्वचिन्नभवति ॥ अइमुंतयं । अइमुत्तयं ॥ नावर्णात्पः ॥७९॥ अवर्णात्परस्यानादेःपस्यलुग्नभवति ॥ सवहो । सावो ॥ अनादेरित्येव । परओट्ठो ॥ अवर्णोयश्रुतिः ॥ १८० ॥ कगचजेत्यादिनालुकिसतिशेषोऽवर्णोऽवर्णात्परोलघुप्रयत्नतरयकारश्रुतिर्भवति ॥ तित्थयरो । सयढं । नयरं । मयंको । कयग्गहो । कायमणी ॥ रययं । पयावई । रसायलं । पायालं । मयणो । गया । नयणं । दयालू । लायण्णं ॥ अवर्णइतिकिं ॥ सउणो । पउणो । पउरं । राईवं । निहओ । निनओ । वाऊ । कई ॥ अवर्णादित्येव ॥ लोअस्स । देअरो ॥ क्वचिद्भवति । पियइ ॥ कुब्जकर्परकीलकेकः खोऽपुष्पे ॥ ८१ ॥ एषुकस्यखोभवति पुष्पंचेत्कुब्जाभिधेयंनभवति ॥ खुज्जो । खप्परं । खीलओ ॥ अपुष्पइतिकिं ॥ बंधेउंकुज्जयपसूणं ॥ आर्षेऽन्यत्रापि । कासितं । खासितं । कसितं । खसिअं ॥ मरकतमदकलेगःकंदुकेत्वा

दे: ॥८२ ॥ अनयोःकस्यगोभवति कंदुकेत्वाद्यस्य ॥ मरगश्रं । मश्रगलो । गेंदुश्रं ॥किरातेचः॥८३॥ किरातेकस्य
चोभवति ॥ चिलाश्रो । पुलिंदएवायंविधिः ॥ कामरूपिणितुनेष्यते ॥ नमिमोहरकिराश्रं ॥ शीकरेभहौवा ॥८४॥
शीकरेभहौवाभवतः ॥ सीहरो । सीभरो ॥ पक्षेसीश्ररो ॥ चंद्रिकायांमः ॥ ८५ ॥ चंद्रिकाशब्देकस्यमोभवति ॥
चंदिमा ॥ निकषस्फटिकचिकुरेहः ॥ ८६ ॥ एषुकस्यहोभवति ॥ निहसो । फलिहो । चिहुरो ॥ चिहुरशब्दः
संस्कृतेपिइतिदुर्गः ॥ खघथधभां ॥ ८७ ॥ स्वरात्परेषामसंयुक्तानामनादिभूतानांखघथधभांइत्येतेषांवर्णानां
प्रायोहोभवति ॥ ख । साहा । मुहं । मेहला । लिहइ ॥ घ ॥ मोहो । जहणं । माहो । लाहइ ॥ थ ॥ नाहो । आव
सहो । मिहुणं । कहइ ॥ ध ॥ साहू । वाहो । बहिरो । बाहइ । इंदहणू ॥ भ ॥ सहा । सहावो । नहं । थणहरो । सो
हइ ॥ स्वरादित्येव ॥ संखो । संघो । कंथा । बंधो । खंभो ॥ असंयुक्तस्येत्येव ॥ अक्खइ । अग्घइ । कत्थइ । सिद्ध
श्रो । बंधइ । लुब्भइ ॥ अनादेरित्येव ॥ गज्जंतेखेमेहा फुल्लानीवापणत्थिरामोरा । नट्ठोचंदुजोउ । वासारत्तो ॥ हं
लापत्तो । गच्छइघणो ॥ प्रायइत्येव ॥ सरिसवखलो । पलयघणो । अत्थिरो । जिणधम्मो । पणट्ठभश्रो । नभं ॥पृथकि

धोवा ॥८८॥ पृथक्शब्देथस्यधोवाभवति ॥ पिधं । पुधं ॥ पिहं । पुहं ॥ शृङ्खलेखःकः ॥ ८९ ॥ शृंखलेखस्य
कोभवति ॥ संकलं ॥ पुन्नागभागिन्योर्गोमः॥ १९० ॥ अनयोर्गस्यमोभवति ॥ पुन्नामाइंवसंते । भामिणी ॥छा
गेलः ॥ ९१ ॥ छागेगस्यलोभवति ॥ छालो । छाली ॥ ऊत्वेदुर्भगसुभगेवः ॥९२॥ अनयोरूत्वेगस्यवोभवति॥
दूहवो । सूहवो ॥ ऊत्वइतिकिं ॥ दुहश्रो । सुहश्रो ॥ खचितपिशाचयोश्चःसल्लौवा ॥ ९३ ॥ अनयोश्चस्ययथासं
ख्यं स ल्ल इत्यादेशौवाभवतः॥खसिश्रो । खइश्रो ॥ पिसल्लो । पिसाश्रो ॥ जटिलेजोझोवा ॥ ९४ ॥ जटिलेज
स्यझोवाभवति ॥ झडिलो । जडिलो ॥ टोडः ॥ ९५ ॥ स्वरात्परस्यासंयुक्तस्यानादेष्टस्यडोभवति ॥ नडो । भ
डो । घडो । घडइ ॥ स्वरादित्येव ॥ घंटा ॥ असंयुक्तस्येत्येव ॥ खट्टा ॥ अनादेरित्येव ॥ टक्को ॥ क्वचिन्नभवति ॥ अ
टति । अटइ ॥ सटाशकटकैटभेढः ॥९६ ॥ एषुटस्यढोभवति ॥ सढा । सश्रढो । केढवो ॥स्फटिकेलः॥९७॥
स्फटिकेटस्यलोभवति ॥ फलिहो ॥ चपेटापाटौवा ॥ ९८ ॥ चपेटाशब्देण्यंतेपाटौधातौटस्यलोवाभवति ॥ च
विला । चविडा । फालइ । फाडेइ ॥ ठोढः ॥ ९९ ॥ स्वरात्परस्यासंयुक्तस्यानादेष्ठस्यढोभवति ॥ मढो । सढो ।

कमढो । कुढारो । पढइ ॥ स्वरादित्येव ॥ वेकुंठो ॥ असंयुक्तस्येत्येव ॥ चिट्ठइ ॥ अनादेरित्येव ॥ हिअएठाइ ॥ अंकोठेल्लः ॥ २०० ॥ अंकोठेठस्यद्विरुक्तोलोभवति । अंकोल्लतेल्लतुप्पं ॥ पिठरेहोवारश्चडः ॥२०१॥ पिठरेठस्यहोवाभवतितत्सन्नियोगेचरस्यडोभवति ॥ पिहडो । पिढरो ॥ डोलः ॥ २ ॥ स्वरात्परस्यासंयुक्तस्यानादेर्डस्यप्रायोलोभवति ॥ वडवामुखं । वलआमुहं ॥ गरुलो । तलाअं । कीलइ ॥ स्वरादित्येव ॥ मोंडं । कोंडं ॥ असंयुक्तस्येत्येव ॥ खग्गो ॥ अनादेरित्येव ॥ रमइडिंभो ॥ प्रायोग्रहणात्कचिद्विकल्पः ॥ वलिसं । वडिसं ॥ दालिमं । दाडिमं ॥ गुलो । गुडो ॥णाली । णाडी । णलं । नडं ॥ आमेलो । आवेडो ॥ क्वचिन्नभवत्येव ॥ निविडं । गउडो । पीडिअं । नीडं । उडू । तडी ॥ वेणौणोवा ॥३॥ वेणौणस्यलोवाभवति ॥ वेलू । वेणू ॥ तुच्छेतश्चछौवा ॥४॥ तुच्छशब्देतस्य च छ इत्यादेशौवाभवतः॥चुच्छं । छुच्छं । तुच्छं ॥ तगरत्रसरतुवरेटः ॥ ५ ॥ एषुतस्यटोभवति॥ टगरो । टसरो । टूबरो ॥ प्रत्यादौडः ॥६॥ प्रत्यादिषुतस्यडोभवति ॥ पडिवन्नं । पडिहासो । पडिहारो । पाडिप्फद्धी । पडिसारो । पडिनिअत्तं । पडिमा । पडिवआ । पडंसुआ । पडिकरइ । पहुडि । पाहुडं । वावडो । पडाआ । बहेड

ओ । हरडई । मडअं ॥ आर्षे ॥ दुष्कृतं । दुक्कडं ॥ सुकृतं । सुकडं ॥ आहृतं । आहडं ॥ अवहृतं । अवहडं इत्यादि ॥ प्रायइत्येव ॥ प्रतिसमयं । पइसमयं ॥ प्रतीपं । पईवं ॥ संप्रति । संपइ ॥ प्रतिष्ठानं । पइट्ठाणं । प्रतिष्ठा । पइट्ठा ॥ प्रतिज्ञा । पइण्णा ॥ प्रति । प्रभृति । प्राभृत । व्यापृत । पताका । बिभीतक । हरीतकी । मृतक इत्यादि ॥ इत्वेवेतसे ॥ ७ ॥ वेतसेतस्यडोभवति इत्वेसति ॥ वेडिसो ॥ इत्वइतिकिं ॥ वेअसो ॥ इःस्वप्नादावितीकारोविकल्पेनभवति इत्त्वव्यावृत्तिबलात् ॥ गर्भितातिमुक्तकेणः ॥ ८ ॥ अनयोस्तस्यणोभवति ॥ गब्भिणो । अणिउँतअं ॥ क्वचिन्नभवत्यपि ॥ अइमुत्तअं ॥ कथमेरावणो ऐरावणशब्दस्य ॥ एरावओइतितुऐरावतस्य ॥ रुदितेदिनाण्णः ॥ ९ ॥ रुदितेदिनासहतस्यद्विरुक्तोणोभवति ॥ रुण्णं ॥ अत्रकेचिदृत्वादिषुदइत्यारब्धवंतः सतु शौरसेनीमागधीविषयएवदृश्यतेइतिनोच्यते ॥ प्राकृतेहि । ऋतुः । रिऊ । उऊ ॥ रजतं । रअअं ॥ एतद् । एअं ॥ गतः । गओ ॥ आगतः । आगओ ॥ सांप्रतं । संपअं ॥ यतः । जओ ॥ ततः । तओ ॥ कृतं । कअं ॥ हृतं । हअं ॥ हताशः । हआसो ॥ श्रुतः । सुओ ॥ आकृतिः । आकिई ॥ निर्वृतः । निवुओ ॥ तातः । ताओ ॥ कतरः । कअरो ॥ द्वितीयः ।

दुईओ इत्यादयःप्रयोगाभवंति॥ नपुनः रुदूरअदमित्यादि ॥ क्वचित्भावेपिव्यत्ययश्चेत्येवसिद्धं ॥ दिहीइत्येतदर्थंतुधृतेर्दिहिरितिवक्ष्यामः ॥ सप्ततौरः ॥ २१० ॥ सप्ततौतस्यरोभवति ॥ सत्तरी ॥ अतसीसातवाहनेलः ॥ ११ ॥ अनयोस्तस्यलोभवति ॥ अलसी । सालाहणो । सालवाहणो । सालाहणीभासा ॥ पलितेवा ॥ १२ ॥ पलितेतस्यलोवाभवति ॥ पलिलं । पलिअं ॥ पीतेवोलेवा ॥ १३ ॥ पीतेतस्यवोवाभवति स्वार्थेलकारेपरे ॥ पीवलं । पीअलं ॥ लइतिकिं ॥ पीअं ॥ वितस्तिवसतिभरतकातरमातुलिंगेहः ॥१४॥ एषुतस्यहोभवति ॥ विहत्थी । वसही ॥ बहुलाधिकारात्क्वचिन्नभवति ॥ वसई । भरहो । काहलो । माहुलिंगं । मातुलुंगशब्दस्यतुमाउलुंगं ॥ मेथिशिथिरशिथिलप्रथमेथस्यढः ॥ १५ ॥ एषुथस्यढोभवति ॥ हापवादः ॥ मेढी । सिढिलो । सिढिलो । पढमो ॥ निशीथपृथिव्योर्वा ॥ १६ ॥ अनयोस्थस्यढोभवतिवा ॥ निसीढो । निसीहो । पुढवी । पुहवी ॥ दशनदष्टदग्धदोलादण्डदरदाहदम्भदर्भकदनदोहदेदोवाडः ॥ १७॥ एषुदस्यडोवाभवति ॥ डसणं । दसणं॥डट्ठो । दट्ठो ।डक्को । डड्ढो । दड्ढो॥डोला । दोला॥डंडो । दण्डो॥डरो । दरो ॥ डाहो । दाहो॥डंभो । दंभो ॥

डब्भो । दब्भो ॥ कडणं । कअणं ॥ डोहलो । दोहलो ॥ दरशब्दस्यचभयार्थवृत्तेरेवभवति ॥ अन्यत्र दरदलिअं ॥ दंशदहोः ॥ १८ ॥ अनयोर्धात्वोर्दस्यडोभवति ॥ डंसइ । डहइ ॥ संख्यागद्गदेरः ॥ १९ ॥ संख्यावाचिनिगद्गदशब्देचदस्यरोभवति ॥ एआरह । बारह । तेरह । गग्गरं ॥ अनादेरित्येव ॥ तेदस ॥ असंयुक्तस्येत्येव॥ चउद्दह ॥ कदल्यामद्रुमे ॥ २२० ॥ कदलीशब्देअद्रुमवाचिनिदस्यरोभवति ॥ करली ॥ अद्रुमइतिकिं ॥ कअली। केली ॥ प्रदीपिदोहदेलः ॥ २१ ॥ प्रपूर्वेदीप्यतौधातौदोहदशब्देचदस्यलोभवति ॥ पलीवेइ । पलित्तं । दोहलो ॥ कदंबेवा २२ ॥ कदंबशब्देदस्यलोवाभवति ॥ कलम्बो । कअम्बो॥ दीपौधोवा ॥ २३ ॥ दीप्यतौदस्यधोवाभवति ॥ धिप्पइ । दिप्पइ ॥ कदर्थितेवः॥ २४ ॥ कदर्थितेदस्यवोभवति ॥ कवट्टिओ ॥ ककुदेहः॥२५॥ ककुदेदस्यहोभवति ॥ कउहं ॥ निषधेधोढः २६ ॥ निषधेधस्यढोभवति ॥ निसढो ॥ वौषधे ॥ २७ ॥ ओषधेधस्यहोभवतिवा ॥ ओसहं । ओसढं ॥ नोणः ॥२८॥ स्वरात्परस्यासंयुक्तस्यानादेर्नस्यणोभवति ॥ कणअं। मअणो । वअणं । नअणं । माणइ ॥ आर्षे । आरनालं।अनिलोइत्याद्यपि ॥ वादौ ॥ २९ ॥ असंयुक्तस्यादौवर्तमान

स्यनस्यणोवाभवति ॥ णरो । नरो ॥ णई । नई ॥ णेइ । नेइ॥ असंयुक्तस्येत्येव ॥ न्यायः । नाओ ॥ निम्बनापितेल
ण्हंवा ॥ २३० ॥ अनयोर्नस्य ल ण्ह इत्येतौंवाभवतः ॥ लिम्बो । निम्बो॥ण्हाविओ । नाविओ ॥ पोवः ॥३१ ॥
स्वरात्परस्यासंयुक्तस्याऽनादेःपस्यप्रायोवोभवति॥सवहो । सावो । उवसग्गो । पईवो । कासवो । पावं । उवमा । क
विलं । कुणवं । कलावो । कवालं । महिवालो । गोवइ । तवइ ॥ स्वरादित्येव ॥ कम्पइ ॥असंयुक्तस्येत्येव॥अप्पमत्तो॥
अनादेरित्येव ॥ सुहेणपढइ ॥ प्रायइत्येव ॥ कई । रिऊ ॥ एतेनपकारस्यप्राप्तयोर्लोपवकारयोर्यस्मिन्कृतेश्रुतिसुख
मुत्पद्यतेसतत्रकार्यः ॥ पाटिपरुषपरिघपरिखापनसपारिभद्रेफः ॥ ३२ ॥ ण्यंतेपटिधातौपरुषादिषुचपस्य
फोभवति॥ फालेइ । फाडेइ । फरुसो । फलिहो । फलिहा । फणसो । फालिहद्दो ॥ प्रभूतेवः ॥ ३३ ॥ प्रभूतेपस्यवो
भवति ॥ वहुत्तं ॥ नीपापीडेमोवा ॥ ३४ ॥ अनयोःपस्यमोवाभवति॥नीमो । नीवो ॥ आमेलो । आवेडो॥पाप
र्द्धौरः ॥ ३५ ॥ पापर्धावपदादौपकारस्यरोभवति ॥ पारद्धी ॥ फोभहौ ॥ ३६ ॥ स्वरात्परस्यासंयुक्तस्यानादेःफ
स्यभहौभवतः ॥ क्वचित्भः ॥ रेफः । रेभो ॥ सिफा । सिभा ॥ क्वचित्तुहः ॥ मुत्ताहलं ॥ क्वचिदुभावपि ॥ सभलं । स

हलं ॥ सेभालिआ । सेहालिआ ॥ सभरी । सहरी ॥ गुभइ । गुहइ ॥स्वरादित्येव ॥ गुम्फइ ॥ असंयुक्तस्येत्येव ॥
पुप्फं ॥ अनादेरित्येव ॥ चिट्ठइफणी ॥ प्रायइत्येव ॥ कसणफणी ॥ बोवः ॥ ३७ ॥ स्वरात्परस्यासंयुक्तस्याना
देर्बस्यवोभवति ॥ अलाबू । अलावू ॥ अलाऊ ॥ शबलः । सवलो ॥ बिसिन्यांभः ॥ ३८ ॥ बिसिन्यांबस्यभोभ
वति ॥ भिसिणी ॥ स्त्रीलिंगनिर्देशादिहनभवति ॥ बिसतंतुपेलवाणं ॥ कबन्धेमयौ ॥ ३९ ॥ कबन्धेबस्यमयौ
भवतः ॥ कमंधो । कयंधो ॥ कैटभेभोवः ॥ २४० ॥ कैटभेभस्यवोभवति ॥ केढवो ॥ विषमेमोढोवा ॥ ४१ ॥
विषमेमस्यढोभवतिवा ॥ विसढो । विसमो ॥ मन्मथेवः ॥ ४२ ॥ मन्मथेमस्यवोभवति ॥ वम्महो ॥ वाऽभिम
न्यौ ॥ ४३ ॥ अभिमन्युशब्देमोवोवाभवति ॥ अहिवन्नू । अहिमन्नू ॥ भ्रमरेसोवा ॥ ४४ ॥ भ्रमरेमस्यसोवा
भवति ॥ भसलो । भमरो ॥ आदेर्योजः ॥ ४५ ॥ पदादेर्यस्यजोवाभवति ॥ जसो । जम्मो । जाइ ॥ आदेरिति
किं ॥ अवयवो । विणओ ॥ बहुलाधिकारात्सोपसर्गस्यानादेरपि ॥ संजमो । संजोगो । अवजसो ॥ क्वचिन्नभव
ति ॥ पओओ ॥ आर्षेलोपोपि ॥ यथाख्यातं । अहक्खाअं ॥ यथाजातं । अहाजाअं ॥ युष्मदर्थपरेतः ॥ ४६ ॥

युष्मच्छब्दे ऽर्थपरेयस्यतोभवति ॥ तुम्हारिसो । तुम्हकेरो ॥ अर्थपरइतिकिं ॥ जुम्हदम्हपअरणं ॥यष्ट्यांलः॥४७॥
यष्ट्यांयस्यलोभवति ॥ लट्ठी । वेणुलट्ठी । उच्छलट्ठी । महुलट्ठी ॥ वोत्तरीयानीयतीयकृद्येज्जः ॥ ४८ ॥ उत्तरीय
शब्देअनीयतीयकृद्यप्रत्ययेषुचयस्यद्विरुक्तोजोवाभवति॥उत्तरिज्जं । उत्तरीअं । अनीय । करणिज्जं । करणीअं॥विम्ह
णिज्जं । विम्हअणीअं ॥ जवणिज्जं । जवणीअं ॥ तीय । विइज्जो । बीओ ॥ कृद्य । पेज्जा । पेआ ॥ छायायांहोऽ
कांतौवा ॥ ४९ ॥ अकांतौवर्तमानेछायाशब्देयस्यहोवाभवति ॥ वच्छस्सछाया । वच्छस्सछाहा आतपाभावः ॥
सच्छाहं । सच्छायं ॥ अकांताविति किं ॥ मुहच्छाया । कांतिरित्यर्थः ॥ डाहवौकतिपये ॥ ५० ॥ कतिपयेयस्य
डाह व इत्येतौपर्यायेणभवतः ॥ कइवाहं । कइअवं॥ किरिभेरेरोडः ॥ ५१ ॥ अनयोरस्यडोवाभवति ॥ किडी ।
भेडो ॥ पर्याणेडावा ॥ ५२ ॥ पर्याणेरस्यडाइत्यादेशोभवतिवा ॥ पडायाणं । पल्लाणं ॥ करवीरेणः ॥ ५३ ॥
करवीरेप्रथमस्यरस्यणोभवति ॥ कणवीरो ॥ हरिद्रादौलः ॥ ५४ ॥ हरिद्रादिषुशब्देषुअसंयुक्तस्यरस्यलोभव
ति ॥ हलिद्दी । दलिद्दाइ ॥ दलिद्दो । दालिद्दं । हलिद्दो । जहुट्ठिलो । सिढिलो । मुहलो । चलणो । वलुणो । कलु ॥ २० ॥

णो । इंगालो । सक्कालो । सोमालो । चिलाओ । फलिहा । फलिहो । फालिहद्दो । काहलो । लुक्को । अवद्दालं ।
भसलो । जढलं । बढलो । निट्ठुलो ॥ बहुलाधिकाराच्चरणशब्दस्यपादार्थवृत्तेरेव ॥ अन्यत्रचरणकरणं ॥ भ्रमरेसस
न्नियोगएव ॥ अन्यत्र भमरो ॥ तथा । जठरं । बठरो । निट्ठुरो इत्याद्यपि ॥ हरिद्रा । दरिद्राति । दरिद्र । दारिद्र्य ।
हरिद्र । युधिष्ठिर । शिथिर । मुखर । चरण । वरुण । करुण । अंगार । सत्कार । सुकुमार । किरात । परिखा । प
रिघ । पारिभद्र । कातर । रुग्ण । अपद्वार । भ्रमर । जठर । बठर । निष्ठुर इत्यादि ॥ आर्षेदुवालसंगेइत्याद्यपि ॥
स्थूलेलोरः ॥ ५५ ॥ स्थूलेलस्यरोभवति ॥ थोरं ॥ कथंथूलभद्दो । थूरस्यहरिद्रादिलत्वेभविष्यति ॥ लाहललां
गललांगूलेवाऽदेर्णः ॥ ५६ ॥ एष्वादेर्लस्यणोभवतिवा ॥ णाहलो । लाहलो ॥ णंगलं । लंगलं ॥ णंगूलं । लं
गूलं ॥ ललाटेच ॥ ५७ ॥ ललाटेचादेर्लस्यणोभवति ॥ चकारआदेरनुवृत्यर्थः ॥ णिडालं । णडालं ॥ शबरे
बोमः ॥ ५८ ॥ शबरेबस्यमोभवति ॥ समरो ॥ स्वप्ननीव्योर्वा ॥ ५९ ॥ अनयोर्वस्यमोवाभवति ॥ सिमि
णो । सिविणो ॥ नीमी । नीवी ॥ शषोःसः ॥२६०॥ शकारषकारयोःसोभवति ॥ श ॥ सद्दो । कुसो । निसंसो ।

दंसो । सामा । सुद्धं । दसा । सोहइ । विसइ ॥ ष ॥ संडो । निहसो । कसाओ । घोसइ ॥ उभयोरपि ॥ सेसो । वि
सेसो ॥ स्नुषायांण्होवा ॥ ६१ ॥ स्नुषाशब्देषस्यणकाराक्रांतोहोवाभवति ॥ सुण्हा । सुसा ॥ दशपाषाणे
हः ॥ ६२ ॥ दशन्शब्देपाषाणशब्देचशषोर्यथादर्शनंहोवाभवति ॥ दहमुहो । दसमुहो ॥ दहबलो । दसबलो ॥
दहरहो । दसरहो ॥ दह । दस ॥ एआरह । बारह । तेरह । पाहाणो । पासाणो ॥ दिवसेसः ॥ ६३ ॥ दिवसेस
स्यहोभवति ॥ दिवहो । दिवसो ॥ होघोऽनुस्वारात् ॥ ६४ ॥ अनुस्वारात्परस्यहस्यघोभवति । सिंघो । सीहो ॥ संघा
रो । संहारो ॥ क्वचिदननुस्वारात् । दाहः । दाघो ॥ षट्शमीशावसुधासप्तपर्णेष्वादेश्छः ॥ ६५ ॥ एष्वादेर्वर्णस्यछो
भवति ॥ छट्ठो । छट्ठी । छप्पओ । छंमुहो । छमी । छावो । छुहा । छत्तिवण्णो ॥ शिरायांवा ॥ ६६ ॥ शिराशब्दे
आदेश्छोवाभवति ॥ छिरा । शिरा ॥ लुग्भाजनदनुजराजकुलेजःसस्वरस्यनवा ॥ ६७ ॥ एषुसस्वरजकार
स्यलुग्भवतिवा ॥ भाणं । भाअणं ॥ दणुवहो । दणुअवहो ॥ राउलं । राअउलं ॥ व्याकरणप्राकारागतेकगोः
॥ ६८ ॥ एषुकोगश्चसस्वरस्यलुग्वाभवति ॥ वारणं । वाअरणं ॥ पारो । पाआरो ॥ आओ । आगओ ॥ किसलय

कालायसहृदयेयः ॥ ६९ ॥ एषुसस्वरस्ययकारस्यलुग्वाभवति ॥ किसलं । किसलअं ॥ कालासं । कालाअसं ॥ म
हण्णवसमासहिआ । जालातेसहिअएहिंघिप्पंति । निसमणुप्पिअहिअस्सहिअअं ॥ दुर्गादेव्युदुम्बरपादपतन
पादपीठेन्तर्दः ॥ २७० ॥ एषुसस्वरस्यदकारस्यांतर्मध्येवर्तमानस्यलुग्वाभवति ॥ दुग्गावी । दुग्गाएवी ॥ उंबरो ।
उउंबरो ॥ पावडणं । पाअवडणं ॥ पावीढं । पाअवीढं ॥ अंतरितिकिं ॥ दुर्गादेव्यामादौमाभूत् ॥ यावत्तावज्जीवि
तावर्त्तमानावटप्रावारकदेवकुलैवमेवेवः ॥ २७१ ॥ यावदादिषुसस्वरस्यवकारस्यांतर्वर्तमानस्यलुग्वाभवति ॥
जा । जाव ॥ ता । ताव ॥ जीअं । जीविअं ॥ अत्तमाणो । आवत्तमाणो ॥ अडो । अवडो ॥ पारओ । पावारओ ॥
देउलं । देवउलं ॥ एमेव । एवमेव ॥ अंतरित्येव ॥ एवमेवेत्यस्यनभवति ॥ ॥ इत्याचार्यश्रीहेमचंद्रविरचितायां
सिद्धहेमचंद्राभिधानस्वोपज्ञशब्दानुशासनवृत्तौ अष्टमाध्यायस्यप्रथमःपादः ॥ १ ॥ यद्दोर्मण्डलकुंडलीकृत
धनुर्दण्डेनसिंहाधिपक्रीतंवैरिकुलात्त्वयाकिलदलत्कुंदावदातंयशः ॥ भ्रांत्वात्रीणिजगंतिखेदविवशंतन्मालवीनांव्य
धादापांडौस्तनमण्डलेचधवलेगण्डस्थलेऽवस्थितिं ॥ १ ॥ संयुक्तस्य ॥ १ ॥ अधिकारोयं ज्यायामीदितियावत् ॥

यदितऊर्ध्वमनुक्रमिष्यामस्तत्संयुक्तस्येतिवेदितव्यं ॥ शक्तमुक्तदष्टरुग्णमृदुत्वेकोवा ॥ २ ॥ एषुसंयुक्तस्यकोवा भवति ॥ सक्को । सत्तो ॥ मुक्को । मुत्तो ॥ डक्को । दट्ठो ॥ लुक्को । लुग्गो । माउक्कं । माउत्तणं ॥ क्षःखःक्कचित्तुछडौ ॥ ३ ॥ क्षस्यखोभवतिक्वचित्तुछडावपि ॥ खओ । लक्खणं ॥ क्वचित्तुछडावपि ॥ खीणं । छीणं । डीणं । डिज्झइ ॥ ष्कस्कयोर्नाम्नि ॥ ४ ॥ अनयोर्नाम्निसंज्ञायांखोभवति ॥ ष्क ॥ पोक्खरं । पोक्खरिणी ॥ निक्खं ॥ स्क ॥ खंधो । खंधावारो । अवक्खंदो ॥ नाम्नीतिकिं ॥ दुक्करं । निक्कंपं । निक्कओ । नमोक्कारो । सक्कयं । सक्कारो । तक्करो ॥ शुष्कस्कंदेवा॥५॥ अनयोःष्कस्कयोःखोवाभवति॥सुक्खं। सुक्कं ॥ खंदो।कंदो॥क्ष्वेटकादौ॥६॥ क्ष्वेटकादिषुसंयुक्तस्यखोभवति ॥ खेडओ॥ क्ष्वेटशब्दोविषपर्यायः॥ क्ष्वोटकः। खोडओ॥ स्फोटकः। खोडओ ॥ स्फेटकः। खेडओ॥स्फेटिकः। खेडिओ॥स्थाणावहरे ॥ ७ ॥ स्थाणौसंयुक्तस्यखोभवति हरश्चेद्वाच्योनभवति ॥ खाणू ॥ अहरइतिकिं ॥ थाणुणोरेहा ॥ स्तम्भेस्तोवा ॥ ८ ॥ स्तम्भशब्देस्तस्यखोवाभवति ॥ खम्भो । थम्भो काष्ठादिमयः ॥ थठावस्पंदे ॥ ९ ॥ स्पन्दाभाववृत्तौस्तम्भेस्तस्यथठौभवतः ॥ थंभो । ठंभो ॥ स्तम्भ्यते । थंभिज्जइ । ठंभिज्जइ॥रक्ते

गोवा ॥ १० ॥ रक्तशब्देसंयुक्तस्यगोवाभवति ॥ रग्गो । रत्तो ॥ शुक्लेङ्गोवा ॥ ११ ॥ शुक्लशब्देसंयुक्तस्यङ्गोवाभवति ॥ सुङ्गं । सुक्कं ॥ कृत्तिचत्वरेचः १२ ॥ अनयोःसंयुक्तस्यचोभवति ॥ किच्ची । चच्चरं ॥त्योऽचैत्ये॥१३॥ चैत्यवर्जितेत्यस्यचोभवति ॥ सच्चं ।पच्चओ ॥ अचैत्यइतिकिं ॥ चइत्तं ॥ प्रत्यूषेषश्चहोवा ॥ १४ ॥ प्रत्यूषेत्यस्य चोभवति तत्सन्नियोगेचषस्यहोवाभवति ॥ पच्चूहो । पच्चूसो ॥ त्वथ्वद्वध्वांचछजझाःक्वचित् ॥ १५ ॥ एषांयथासंख्यमेतेक्वचित्भवंति ॥ भुक्त्वा । भोच्चा ॥ ज्ञात्वा । णच्चा ॥ श्रुत्वा । सोच्चा ॥ पृथ्वी । पिच्छी ॥ विद्वान् । विज्जं॥ बुध्वा । बुज्झा ॥ भोच्चासअलंपिच्छि विज्जंबुज्झाअणण्णयग्गामि ॥ चइऊणतवंकाउंसंतीपत्तोसिवंपरमं ॥ वृश्चिकेश्चेञ्चुर्वा ॥ १६ ॥ वृश्चिकेश्चेःसस्वरस्यस्थानेञ्चुरादेशोभवति ॥ छापवादः ॥ विञ्चुओ ॥ विंचुवो ॥ पक्षे विंछिओ ॥ छोऽक्ष्यादौ ॥ १७ ॥ अक्ष्यादिषुसंयुक्तस्यछोभवति ॥ खस्यापवादः ॥ अच्छि । उच्छू । लच्छी । कच्छो । छीअं । छीरं । सरिच्छो । वच्छो । मच्छिआ । छेत्तं। छुहा । दच्छो । कुच्छी । वच्छं । छुण्णो । कच्छा । छारो । कुच्छेअअं । छुरो । उच्छा । छयं । सारिच्छं ॥ अक्षि । इक्षु । लक्ष्मी । कक्ष । क्षुत । क्षीर । सदृक्ष । वृक्ष । मक्षिका । क्षे

त्र । क्षुध् । दक्ष । कुक्षि । वक्षस् । क्षुण्ण । कक्षा । क्षार । कौक्षेयक । क्षुर । उक्षन् । क्षत । सादृश्य ॥ क्वचित्स्थगित
शब्देपि । छइअं ॥ आर्षे । इक्खू । खीरं । सारिक्खमित्याद्यपिदृश्यते ॥ क्षमायांकौ ॥ १८॥ कौपृथिव्यांवर्तमा
नेक्षमाशब्देसंयुक्तस्यछोभवति । छमापृथिवी ॥ लाक्षणिकस्यापिक्ष्मादेशस्यछोभवति ॥ क्ष्मा । छमा ॥ काविति किं ।
खमा क्षांतिः ॥ ऋक्षेवा ॥ १९ ॥ ऋक्षशब्देसंयुक्तस्यछोवाभवति । रिच्छं । रिक्खं । रिच्छो । रिक्खो । कथंछूढंक्षि
प्तं । वृक्षक्षिप्तयोरुक्खछूढावितिभविष्यति ॥ क्षणउत्सवे ॥ २० ॥ क्षणशब्देउत्सवाभिधायिनिसंयुक्तस्यछोभ
वति ॥ छणो ॥ उत्सवइतिकिं ॥ खणो ॥ ह्रस्वात्थ्यश्चत्सप्सामनिश्चले ॥ २१ ॥ ह्रस्वात्परेषांथ्यश्चत्सप्सां
छोभवति निश्चलेतुनभवति ॥ थ्य ॥ पच्छं । पच्छा । मिच्छा ॥ श्च ॥ पच्छिमं । अच्छेरं । पच्छा ॥ त्स ॥ उच्छाहो ।
मच्छलो । मच्छरो । संवच्छरो । संवच्छलो । चिइच्छइ ॥ प्स । लिच्छइ ॥ जुगुच्छइ । अच्छरा ॥ ह्रस्वादितिकिं ॥
ऊसारिओ ॥ अनिश्चलइतिकिं ॥ निच्चलो ॥ आर्षेतथ्येचोपि । तच्चं ॥ सामर्थ्योत्सुकोत्सवेवा ॥ २२ ॥ एषुसंयु
क्तस्यछोवाभवति ॥ सामच्छं । सामत्थं ॥ उच्छुओ । ऊसुओ ॥ उच्छवो । ऊसवो ॥ स्पृहायां ॥ २३ ॥ स्पृहाश

ब्देसंयुक्तस्यछोवाभवति ॥ फस्यापवादः ॥ छिहा ॥ बहुलाधिकारात्क्वचिदन्यदपि ॥ निप्पिहो ॥द्यय्यर्यांजः॥२४॥
एषांसंयुक्तानांजोभवति ॥ द्य ॥ मज्जं । अवज्जं । वेज्जो । जुई । जोओ ॥ य्य ॥ जज्जो । सेज्जा ॥ र्य ॥ भज्जा ॥
चौर्यसमत्वात्भारिआ ॥ कज्जं । वज्जं । पज्जाओ । पज्जत्तं । मज्जाआ ॥ अभिमन्यौजञ्जौवा ॥ २५ ॥ अ
भिमन्यौसंयुक्तस्यजोञ्जश्चवाभवति ॥ अहिमज्जू । अहिमञ्जू ॥ पक्षे । अहिमन्नू ॥ अभिग्रहणादिहनभवति ॥ म
न्नू ॥ साध्वसध्यह्यांझः ॥ २६ ॥ साध्वसेसंयुक्तस्यध्यह्ययोश्चझोभवति ॥ सज्झसं ॥ ध्य ॥ बज्झए । झाणं । उव
ज्झाओ । सज्झाओ । संज्झं । विंज्झो ॥ ह्य ॥ सज्झो । मज्झं । गुज्झं । णज्झइ ॥ ध्वजेवा ॥ २७ ॥ ध्वजशब्देसं
युक्तस्यझोवाभवति ॥ झओ । धओ ॥ इंधौझा ॥ २८ ॥ इंधौधातौसंयुक्तस्यझाइत्यादेशोवाभवति ॥ समिज्झाइ ।
विज्झाई ॥ वृत्तप्रवृत्तमृत्तिकापत्तनकदर्थितेटः ॥ २९ ॥ एषुसंयुक्तस्यटोभवति ॥ वट्टो । पवट्टो । मट्टिआ । पट्ट
णं । कवट्टिओ ॥ र्त्तस्याऽधूर्त्तादौ ॥ ३० ॥ र्त्तस्यटोभवतिधूर्त्तादीन्वर्जयित्वा ॥ केवट्टो । वट्टी । जट्टो । पव
ट्टइ । वट्टुलं । रायवट्टयं । नट्टई । संवट्टिअं ॥ अधूर्त्तादावितिकिं ॥ धुत्तो । कित्ती । वत्ता । आवत्तणं । निवत्तणं । प

वत्तणं । संवत्तणं । आवत्तओ । निवत्तओ । पवत्तओ । संवत्तओ । वत्तिआ । वत्तिओ । कत्तिओ । उक्कत्तिओ । क
त्तरी । मुत्ती । मुत्तो । मुहुत्तो ॥ बहुलाधिकाराल् वट्टा ॥ धूर्ति । कीर्ति । वार्ता । आवर्तन । निवर्तन । प्रवर्तन । सं
वर्तन । आवर्तक । निवर्तक । प्रवर्तक । संवर्तक । वार्तिक । वार्तिक । कार्तिक । उत्कर्तित ॥ कर्तरी । मूर्ति । मूर्त ।
मुहूर्त इत्यादि ॥ वृन्तेण्टः ॥ ३१ ॥ वृन्तेण्टोभवति ॥ वेण्टं । तालवेण्टं ॥ ठोऽस्थिविसंस्थुले ॥ ३२ ॥ अन
योःसंयुक्तस्यठोभवति ॥ अट्ठी । विसंठुलं ॥ स्त्यानचतुर्थार्थेवा ॥ ३३ ॥ एषुसंयुक्तस्यठोवाभवति ॥ ठीणं । थी
णं । चउट्ठो । अट्ठोप्रयोजनं ॥ अत्थोधनं ॥ ष्टस्यानुष्ट्रेष्टासंदष्टे ॥ ३४ ॥ उष्ट्रादिवर्जितेष्टस्यठोभवति ॥ लट्ठी ।
मुट्ठी । दिट्ठी । सिट्ठी । पुट्ठो । कट्ठं । सुरट्ठा । इट्ठो । अणिट्ठं ॥ अनुष्ट्रेष्टासंदष्टइतिकिं ॥ उट्टो । इट्टा । चुण्णवसंदट्टो ॥
गर्तेडः ॥ ३५ ॥ गर्तशब्देसंयुक्तस्यडोभवति ॥ टापवादः ॥ गड्डो । गड्डा ॥ सम्मर्दवितर्दिविच्छर्दच्छर्दिकपर्दम
र्दितेर्दस्य ॥ ३६ ॥ एषुर्दस्यडोभवति ॥ सम्मड्डो । विअड्डी । विछड्डो । छड्डी । कवड्डो । मड्डिओ । सम्मड्डिओ ॥
गर्दभेवा ॥ ३७ ॥ गर्दभेर्दस्यडोवाभवति ॥ गड्डहो । गद्दहो ॥ कंदरिकाभिंदिपालेण्डः ॥ ३८ ॥ अनयोःसंयुक्त ॥ २४ ॥

स्यण्डोभवति ॥ कण्डलिआ । भिण्डिवालो ॥ स्तब्धेठढौ ॥ ३९ ॥ स्तब्धेसंयुक्तयोर्यथाक्रमंठढौभवतः ॥ ठड्ढो
॥ दग्धविदग्धवृद्धिवृद्धेढः ॥ ४० ॥ एषुसंयुक्तस्यढोभवति ॥ दड्ढो । विअड्ढो । वुड्ढी । वुड्ढो ॥ क्वचिन्नभवति ॥
विद्धकइनिरूविअं ॥ श्रद्धर्धिमूर्धाऽर्धेऽन्तेवा ॥ ४१ ॥ एष्वंतेवर्तमानस्यसंयुक्तस्यढोभवतिवा ॥ सड्ढा । सद्धा ॥ इ
ड्ढी । रिद्धी ॥ मुंढा । मुद्धा ॥ अड्ढं । अद्धं ॥ म्नज्ञोर्णः ॥ ४२ ॥ अनयोर्णोभवति ॥ म्न ॥ निण्णं । पज्जुण्णो ॥ज्ञ॥
णाणं । सण्णा । पण्णा । विण्णाणं ॥ पंचाशत्पंचदशदत्ते ॥ ४३ ॥ एषुसंयुक्तस्यणोभवति ॥ पण्णासा । पण्ण
रह । दिण्णं॥मन्यौन्तोवा॥४४॥मन्युशब्देसंयुक्तस्यन्तोवाभवति ॥ मन्तू । मन्नू॥स्तस्यथोऽसमस्तस्तंबे॥४५॥
समस्तस्तंबवर्जितेस्तस्यथोभवति ॥ हत्थो । थुई । थोत्तं । थोअं । पत्थरो । पसत्थो । अत्थि । सत्थि ॥ असमस्त
स्तंबइतिकिं ॥ समत्तो । तंबो ॥स्तवेवा॥४६॥ स्तवशब्देस्तस्यथोवाभवति ॥ थवो । तवो॥ पर्यस्तेथटौ॥४७॥
पर्यस्तेस्तस्यपर्यायेणथटौभवतः॥ पल्लत्थो । पल्लट्टो ॥ वोत्साहेथोहश्चरः॥ ४८ ॥ उत्साहशब्देसंयुक्तस्यथोवाभव
ति तत्सन्नियोगेचहस्यरः ॥ उत्थारो । उच्छाहो ॥ आश्लिष्टेलधौ ॥ ४९ ॥ आश्लिष्टेसंयुक्तयोर्यथासंख्यंलधइत्ये

तौभवतः ॥ आलिद्धो ॥ चिन्हेन्धोवा ॥ ५० ॥ चिन्हेसंयुक्तस्यन्धोवाभवति ॥ ण्हापवादः ॥ पक्षेसोपि ॥ चिन्धं । इन्धं । चिण्हं ॥ भस्मात्मनोःपोवा ॥ ५१ ॥ अनयोःसंयुक्तस्यपोवाभवति ॥ भप्पो । भस्सो ॥ अप्पा । अप्पाणो ॥ पक्षे । अत्ता ॥ ड्मक्मोः ॥ ५२ ॥ ड्मक्मोःपोवाभवति ॥ कुड्मलं । कुम्पलं । रुक्मिणी । रुप्पिणी ॥ क्वचित्च्मोपि ॥ रुच्मी । रुप्पी ॥ ष्पस्पयोःफः ॥ ५३ ॥ ष्पस्पयोःफोभवति ॥ पुष्पं । पुप्फं ॥ शष्पं । सप्फं ॥ निष्पेषः । निप्फेसो ॥ निष्पावः । निप्फावो ॥ स्पंदनं । फंदणं ॥ प्रतिस्पर्धिन् । पाडिप्फद्धी ॥ बहुलाधिकारात्क्वचिद्विकल्पः ॥ बुहप्फई । बुहप्पई ॥ क्वचिन्नभवति ॥ निप्पहो । निप्पुंसणं । परोप्परम् ॥ भीष्मेष्मः ॥ ५४ ॥ भीष्मेष्मस्यफोभवति ॥ भिप्फो ॥ श्लेष्मणिवा ॥ ५५ ॥ श्लेष्मशब्देष्मस्यफोभवति ॥ सेफो । सिलिम्हो ॥ ताम्राम्रेम्बः ॥ ५६ ॥ अनयोःसंयुक्तस्यमयुक्तोबोभवति ॥ तम्बं । अम्बं ॥ अम्बिरतम्बिरइतिदेश्यौ ॥ ह्वोभोवा ॥ ५७ ॥ ह्वस्यभोवाभवति ॥ जिब्भा । जीहा ॥ वाविह्वलेवौभश्च ॥ ५८ ॥ विह्वलेह्वस्यभोवाभवति तत्सन्नियोगेचविशब्देवस्यवाभोभवति ॥ भिब्भलो । विब्भलो । विहलो ॥ वोर्ध्वे ॥ ५९ ॥ ऊर्ध्वशब्देसंयुक्तस्यभो

वाभवति ॥ उब्भं । उद्धं ॥ कश्मीरेम्भोवा ॥ ६० ॥ कश्मीरशब्देसंयुक्तस्यम्भोवाभवति ॥ कम्भारो । कम्हारो ॥ न्मोमः ॥ ६१ ॥ न्मस्यमोभवति ॥ अधोलोपापवादः ॥ जम्मो । वम्महो । मम्मणं ॥ ग्मोवा ॥ ६२ ॥ ग्मस्यमोवाभवति ॥ युग्मं । जुम्मं । जुग्गं ॥ तिग्मं । तिम्मं । तिग्गं ॥ ब्रह्मचर्यतूर्यसौंदर्यशौंडीर्येर्योरः ॥ ६३ ॥ एषुर्यस्यरोभवति ॥ जापवादः ॥ बम्भचेरं । चौर्यसमत्त्वात्बम्भचरिअं । तूरं । सुंदेरं । सोंडीरं ॥ धैर्येवा ॥ ६४ ॥ धैर्येर्यस्यरोवाभवति ॥ धीरं । धिज्जं ॥ सूरोसुज्जोइतितुसूरसूर्यप्रकृतिभेदात् ॥ एतःपर्यंते ॥ ६५ ॥ पर्यंतेएकारात्परस्यर्यस्यरोभवति ॥ पेरंतो ॥ एतइतिकिं ॥ पज्जंतो ॥ आश्चर्ये ॥ ६६ ॥ एतःपरस्यर्यस्यरोभवति ॥ अच्छेरं ॥ एतइत्येव ॥ अच्छरिअं ॥ अतोरिआररिज्जरीअं ॥ ६७ ॥ आश्चर्येअकारात्परस्यर्यस्य रिअ अर रिज्ज रीअ इत्येतेआदेशाभवंति ॥ अच्छरिअं । अच्छअरं । अच्छरिज्जं । अच्छरीअं ॥ अतइतिकिं ॥ अच्छेरं ॥ पर्यस्तपर्याणसौकुमार्येल्लः ॥ ६८ ॥ पर्यस्तपर्याणसौकुमार्यएषुर्यस्यल्लोभवति ॥ पर्यस्तं । पल्लट्टं । पल्लत्थं ॥ पल्लाणं । सोअमल्लं ॥ पल्लंकोइतिचपल्यंकशब्दस्ययलोपेद्वित्वेच ॥ पलिअंको इत्यपिचौर्यसमत्त्वात् ॥ बृहस्पतिवन

स्पत्योःसोवा ॥ ६९ ॥ ॥ अनयोःसंयुक्तस्यसोवाभवति ॥ बहस्सई । बहप्फई । भयस्सई । भयप्फई ॥ वणस्स
ई । वणप्फई ॥ बाष्पेहोऽश्रुणि ॥ ७० ॥ बाष्पशब्देसंयुक्तस्यहोभवतिअश्रुण्यभिधेये ॥ बाहोनेत्रंजलं ॥ अश्रु
णीतिकिं ॥ बप्फोऊष्मा ॥ कार्षापणे ॥ ७१ ॥ कार्षापणेसंयुक्तस्यहोभवति ॥ काहावणो । कथंकहावणो । न्हस्वः
संयोगइतिपूर्वमेवन्हस्वत्वेपश्चादादेशे ॥ कर्षापणशब्दस्यवाभविष्यति ॥ दुःखदक्षिणतीर्थेवा ॥ ७२ ॥ एषुसं
युक्तस्यहोवाभवति ॥ दुहं । दुक्खं । परदुक्खेणदुक्खिआविरला ॥ दाहिणो । दक्खिणो ॥ तूहं । तित्थं ॥ कूष्मां
डयांष्मोलस्तुण्डोवा ॥ ७३ ॥ कूष्मांड्यांष्माइत्येतस्यहोभवति ण्डइत्येतस्य तुवालोभवति ॥ कोहली । कोहण्डी
॥ पक्ष्मश्मष्मस्मह्मांम्हः ॥ ७४ ॥ पक्ष्मशब्दसंधिनःसंयुक्तस्यश्मष्मस्मह्मांचमकाराक्रांतोहकारआदेशोभवति ॥
पक्ष्मन् । पम्हाइं । पम्हललोअणा ॥ श्म ॥ कुश्मानः । कुम्हाणो ॥ कश्मीराः । कम्हारा ॥ ष्म ॥ ग्रीष्मः । गिम्हो ॥ ॥ २६ ॥
ऊष्मा । उम्हा ॥ स्म ॥ अस्मादृशः । अम्हारिसो ॥ विस्मयः । विम्हओ ॥ ह्म ॥ ब्रह्मा । बम्हा ॥ बम्हणो । बम्हचेरं ॥
क्वचित्म्भोपिदृश्यते ॥ बम्भंणो । बम्भचेरं । सिम्भो ॥ क्वचिन्नभवति ॥ रश्मिः । रस्सी ॥ स्मरः । सरो ॥ सूक्ष्मश्न

ष्णस्नन्हह्णक्ष्णांण्हः ॥ ७५ ॥ सूक्ष्मशब्दसंबंधिनःसंयुक्तस्यश्नष्णस्नन्हह्णक्ष्णांचणकाराक्रांतोहकारादेशोभव
ति ॥ सूक्ष्मं । सण्हं ॥ श्न ॥ पण्हो । सिण्हो ॥ ष्ण ॥ विण्हू । कण्हो । उण्हीसं ॥ स्न ॥ जोण्हा । ण्हाओ । पण्हओ ॥
न्ह ॥ वण्ही । जण्हू ॥ ह्ण ॥ पुव्वण्हो । अवरण्हो ॥ क्ष्ण ॥ सण्हं । तिण्हं ॥ विप्रकर्षेतुकृष्णकृत्स्नशब्दयोःकसणो ।
कसिणो ॥ ह्लोल्हः ॥ ७६ ॥ ह्लस्थानेलकाराक्रांतोहोभवति ॥ कल्हारं । पल्हाओ ॥ कगटडतदपशषसᳵकᳶ
पामूर्ध्वंलुक् ॥ ७७ ॥ एषांसंयुक्तवर्णसंबंधिनामूर्ध्वंस्थितानांलुग्भवति ॥ क ॥ भुक्तं । भुत्तं ॥ सिक्थं । सित्थं ॥
ग ॥ दुद्धं । मुद्धं ॥ ट ॥ षट्पदः । छप्पओ ॥ कट्फलं । कप्फलं ॥ ड ॥ खग्गो । खड्गः ॥ सज्जो । षड्जः ॥ त ॥ उप्प
लं । उप्पाओ ॥ द ॥ मद्गुः । मग्गू ॥ मोग्गरो ॥ प ॥ सुत्तो । गुंत्तो ॥ श ॥ लण्हं । निश्चलो । चुअइ ॥ ष ॥ गोट्ठी । छट्ठो ।
निठ्ठुरो ॥ स ॥ खलिओ । नेहो ॥ ᳵक ॥ दुᳵखं । दुक्खं ॥ ᳶप ॥ अंतᳶपातः । अंतप्पाओ ॥ अधोमनयां ॥ ७८ ॥
मनयांसंयुक्तस्याधोवर्तमानानांलुग्भवति ॥ म ॥ जुग्गं । रस्सी । सरो । सेरं ॥ न ॥ नग्गो । लग्गो ॥ य ॥ सामा ।
कुड्डं । वाहो ॥ सर्वत्रलबरामचंद्रे ॥ ७९ ॥ चंद्रशब्दादन्यत्रलबरांसर्वत्रसंयुक्तस्योर्ध्वमधश्चस्थितानांलुग्भवति ॥

ऊर्ध्वं ॥ ल ॥ उल्का । उक्का ॥ वल्कलं । वक्कलं ॥ व ॥ शब्दः । सद्दो ॥ अब्दः । अद्दो ॥ लुब्धकः । लोद्धओ ॥ र ॥ अर्कः । अक्को ॥ वर्गः । वग्गो ॥ अधः ॥ श्लक्ष्णं । सण्हं ॥ विक्लवः । विक्कवो ॥ पक्वं । पिक्कं ॥ ध्वस्तः । धत्थो ॥ चक्रं । चक्कं ॥ ग्रहः । गहो ॥ रात्रिः । रत्ती ॥ अत्रद्वइत्यादिसंयुक्तानामुभयप्राप्तौ यथादर्शनंलोपः क्वचिदूर्ध्वं ॥ उद्विग्नः । उव्विग्गो ॥ द्विगुणः । बिउणो ॥ द्वितीयः । बीओ ॥ कल्मषं । कम्मसं ॥ सर्वं । सव्वं ॥ शुल्वं । सुव्वं । क्वचित्त्वधः ॥ काव्यं । कव्वं । कुल्या । कुल्ला ॥ माल्यं । मल्लं ॥ द्विपः । दिओ ॥ द्विजातिः । दुआई ॥ क्वचित्पर्यायेण । द्वारं । बारं । दारं ॥ उद्विग्नः । उव्विग्गो । उव्विण्णो ॥ अचंद्रइतिकिं ॥ चंद्रं । संस्कृतसमोयंप्राकृतशब्दः ॥ अत्रोत्तरेणविकल्पोपिनभवति निषेधसामर्थ्यात् ॥ द्रेरोनवा ॥ ८० ॥ द्रशब्देपरेरेफस्यवालुग्भवति ॥ चंदो । चंद्रो ॥ रुदो । रुद्रो ॥ भद्दं । भद्रं ॥ समुद्दो । समुद्रो ॥ ह्रदशब्दस्यस्थितिपरिवृत्तौद्रहइतिरूपं ॥ तत्र द्रहो । दहो ॥ केचिद्रलोपंनेच्छंति ॥ द्रह शब्दमपि कश्चित्संस्कृतंमन्यते ॥ वोद्रहादयस्तुतरुणपुरुषादिवाचकानित्यंरेफसंयुक्तादेश्याएव ॥ सिक्खंतुवोद्रहीओ । वोद्रहद्रहंमिपडिआ ॥ धात्र्याम् ॥ ८१ ॥ धात्रीशब्देरस्यलुग्वाभवति ॥ धत्ती ॥ ह्रस्वात्प्रागेवरलोपे धाई

पक्षे । धारी ॥ तीक्ष्णेणः ॥ ८२ ॥ तीक्ष्णशब्देणस्यलुग्वाभवति ॥ तिक्खं । तिण्हं ॥ ज्ञोञः ॥ ८३ ॥ ज्ञःसंबंधिनोञस्यलुग्वाभतिं ॥ जाणं । णाणं ॥ सवज्जो । सवण्णू ॥ अप्पज्जो । अप्पण्णू ॥ दइवज्जो । दइवण्णू ॥ इंगिअज्जो । इंगिअण्णू ॥ मणोज्जं । मणोण्णं ॥ अहिज्जो । अहिण्णू ॥ पज्जा । पण्णा ॥ अज्जा । अण्णा ॥ सज्जा । सण्णा ॥ क्वचिन्नभवति ॥ विण्णाणं ॥ मध्यान्हेहः ॥ ८४ ॥ मध्यान्हेहस्यलुग्वाभवति ॥ मज्झन्नो । मज्झण्हो ॥ दशार्हे ॥ ८५ ॥ पृथक्योगाद्वेतिनिवृत्तं ॥ दशार्हेहस्यलुग्भवति ॥ दसारो ॥ आदेःश्मश्रुश्मशाने ॥ ८६ ॥ अनयोरादेर्लुग्भवति ॥ मासू । मंसु ॥ मस्सू । मसाणं ॥ आर्षेश्मशानशब्दस्यसीआणंसुसाणमित्यपिभवति ॥ श्चोहरिश्चंद्रे ॥ ८७ ॥ हरिश्चंद्रशब्देश्चइत्यस्यलुग्भवति ॥ हरिअंदो ॥ रात्रौवा ॥ ८८ ॥ रात्रिशब्देसंयुक्तस्यलुग्वाभवति ॥ राई । रत्ती ॥ अनादौशेषादेशयोर्द्वित्वं ॥ ८९ ॥ पदस्यानादौवर्तमानस्यशेषस्यादेशस्यचद्वित्वं भवति ॥ शेष ॥ कप्पतरू । भुत्तं । दुद्धं । नग्गो । उक्का । अक्को । मुक्खो ॥ आदेश ॥ डक्को । जक्खो । रग्गो । किच्ची । रुप्पी ॥ क्वचिन्नभवति ॥ कसिणो ॥ अनादाविति किं ॥ खलिअं । थेरो । खंभो ॥ द्वयोस्तुद्वित्वमस्त्येवेतिनभव

ति ॥ विञ्चुओ । भिण्डिवालो ॥ द्वितीयतुर्ययोरुपरिपूर्वः ॥ ९० ॥ द्वितीयतुर्ययोर्द्वित्वप्रसंगेउपरिपूर्वौभवतः ॥
द्वितीयस्योपरिप्रथमश्चतुर्थस्योपरितृतीयइत्यर्थः ॥ शेष ॥ वक्खाणं । वग्घो । मुच्छा । निब्भरो ॥ कट्ठं । तित्थं । निद्ध
णो । गुप्फं । निज्झरो ॥ आदेश ॥ जक्खो ॥ घस्यनास्ति ॥ अच्छी । मज्झं । पट्ठी । वुड्ढो । हत्थो । आलिद्धो ।
पुप्फं । भिब्भलो ॥ तैलादौद्वित्वे ओक्खलं ॥ सेवादौ नक्खा । नहा ॥ समासेवा । कइद्धओ । कइधओ ॥ द्वित्वइ
त्येव ॥ खाओ ॥ दीर्घेवा ॥ ९१ ॥ दीर्घशब्देशेषस्यघस्यउपरिपूर्वोवाभवति ॥ दिग्घो । दीहो ॥ नदीर्घानुस्वा
रात् ॥ ९२ ॥ दीर्घानुस्वाराभ्यांलाक्षणिकाभ्यामलाक्षणिकाभ्यांचपरयोःशेषादेशयोर्द्वित्वंनभवति ॥ छूढो । नीसा
सो । फासो ॥ अलाक्षणिकं । पार्श्वं । पासं ॥ शीर्षं । सीसं ॥ ईश्वरः । ईसरो ॥ द्वेष्यः । वेसो ॥ लास्यं । लासं ॥
आस्यं । आसं ॥ प्रेष्यः । पेसो ॥ अवमाल्यं । ओमालं ॥ आज्ञा । आणा ॥ आज्ञप्तिः । आणत्ती ॥ आज्ञापनं ।
आणवणं ॥ अनुस्वारात् । त्र्यस्त्रं । तंसं ॥ अलाक्षणिकं ॥ संझा । विंझो । कंसालो ॥ रहोः ॥ ९३ ॥ रेफहकारयो
र्द्वित्वंनभवति ॥ रेफः । शेषोनास्ति ॥ आदेशे । सुंदेरं । बम्भचेरं । पेरंतं ॥ शेषस्य हस्य । विहलो ॥ आदेशस्य ।

कहावणो ॥ धृष्टद्युम्नेणः ॥ ९४॥ धृष्टद्युम्नशब्देआदेशस्यणस्यद्वित्वंनभवति ॥ धट्ठज्जुणो॥कर्णिकारेवा॥ ९५॥
कर्णिकारशब्देशेषस्यद्वित्वंवानभवति ॥ कणिआरो । कण्णिआरो ॥ दृप्ते ॥ ९६ ॥ दृप्तशब्देशेषस्यद्वित्वंनभव
ति ॥ दरिअसीहेण ॥ समासेवा ॥ ९७॥ शेषादेशयोःसमासेद्वित्वंवाभवति ॥ नइग्गामो । नइगामो ॥ कुसुम
प्पअरो । कुसुमपअरो ॥ देवत्थुई । देवथुई ॥ हरक्खंदा । हरखंदा ॥ आणालक्खंभो । आणालखंभो ॥ बहुलाधि
कारादशेषादेशयोरपि ॥ सप्पिवासो । सपिवासो ॥ बद्धप्फलो । बद्धफलो ॥ मलयसिहरक्खंडं । मलयसिहरखंडं॥
पम्मुक्कं । पमुक्कं ॥ अद्दंसणं । अदंसणं ॥ पडिक्कूलं । पडिकूलं ॥ तेल्लोक्कं । तेलोक्कमित्यादि ॥ तैलादौ ॥ ९८ ॥
तैलादिष्वनादौयथादर्शनमंत्यस्यानंत्यस्यचव्यंजनस्यद्वित्वंभवति ॥ तेल्लं । मंडुक्को । वेइल्लं । उज्जू । विड्डा । बहुत्तं॥
अनंत्यस्य ॥ सोत्तं । पेम्मं । जोव्वणं ॥आर्षे । पडिसोओ । विस्सोअसिआ ॥ तैल । मंडूक । विचिकिल । ऋजु । व्रीडा ।
प्रभूत । स्रोतस् । प्रेमन् । यौवनइत्यादि ॥ सेवादौवा ॥ ९९ ॥ सेवादिष्वनादौयथादर्शनमंत्यस्यानंत्यस्यद्वित्वं
भवतिवा ॥ सेव्वा । सेवा ॥ नेड्डं । नेडं ॥ नक्खा । नहा ॥ निहित्तो । निहिओ ॥ वाहित्तो । वाहिओ ॥ माउक्कं । मा

उअं ॥ एक्को । एओ ॥ कोउहल्लं । कोउहलं ॥ वाउल्लो । वाउलो ॥ थुल्लो । थोरो ॥ हुत्तं । हूअं ॥ दइव्वं । दइवं ॥ तु
ण्हिक्को । तुण्हिओ ॥ मुक्को । मूओ ॥ खण्णू । खाणू ॥ थिण्णं । थीणं ॥ अनंत्यस्य ॥ अम्हक्केरं । अम्हकेरं ॥ तच्चेअ ।
तंचेअ ॥ सोच्चिअ । सोचिअ ॥ सेवा । नीड । नख । निहित । व्याहृत । मृदुक । एक । कुतूहल । व्याकुल । स्थूल ।
हूत । दैव । तूष्णीक । मूक । स्थाणु । स्त्यान । अस्मदीय । चेअ । चिअ इत्यादि ॥ शार्ङ्गे ङात्पूर्वोत् ॥ १०० ॥ शार्ङ्गे ङात्पूर्वो
ऽकारो भवति ॥ सारंगं ॥ क्ष्माश्लाघारत्नेऽन्त्यव्यंजनात् ॥ १०१ ॥ एषु संयुक्तस्य यदंत्यव्यंजनं तस्मात्पूर्वोऽद्भवति ॥
छमा । सलाहा । रयणं ॥ आर्षे सूक्ष्मेपि । सुहुमं ॥ स्नेहाग्न्योर्वा ॥ २ ॥ अनयोः संयुक्तस्यांत्यव्यंजनात्पूर्वोकारो
वा भवति ॥ सणेहो । नेहो ॥ अगणी । अग्गी ॥ प्लक्षे लात् ॥ ३ ॥ प्लक्षशब्दे संयुक्तस्यांत्यव्यंजनाल्लात्पूर्वोऽद्भव
ति ॥ पलक्खो ॥ र्हश्रीह्रीकृत्स्नक्रियादिष्ट्यास्वित् ॥ ४ ॥ एषु संयुक्तस्यांत्यव्यंजनात्पूर्व इकारो भवति ॥ र्ह ॥
अरिहइ । अरिहो । गरिहा । बरिहो ॥ श्री । सिरी ॥ ह्री । हिरी ॥ ह्रीतः । हिरिओ ॥ अह्रीकः । अहिरिओ ॥ कृत्स्न ।
कसिणो ॥ क्रिया । किरिआ ॥ आर्षे तु हयं नाणं किया हीणं ॥ दिष्ट्या । दिट्ठिआ ॥ र्शर्षतप्तवज्रे वा ॥ ५ ॥ र्शर्षयोस्त

प्तवज्रयोः संयुक्तस्यांत्यव्यंजनात्पूर्व इकारो वा भवति ॥ र्श ॥ आअरिसो । आअंसो ॥ सुदरिसणो । सुदंसणो ॥ दरि
सणं । दंसणं ॥ र्ष ॥ वरिसं । वासं ॥ वरिसा । वासा ॥ वरिससयं । वाससयं ॥ व्यवस्थितविभाषया क्वचिन्नित्यं ॥
परामरिसो । हरिसो । अमरिसो ॥ तप्तः । तविओ । तत्तो ॥ वज्रं । वइरं । वज्जं ॥ लात् ॥ ६ ॥ संयुक्तस्यांत्य
व्यंजनाल्लात्पूर्व इद्भवति ॥ किलिन्नं । किलिट्ठं । सिलिट्ठं । पिलुट्ठं । पिलोसो । सिलिम्हो । सिलेसो । सुक्किलं । सु
इलं ॥ सिलोउ । किलेसो । अम्बिलं । गिलाअं । गिलाइ । मिलाइ । मिलाणं । किलमइ । किलंतं ॥ क्वचिन्न भव
ति ॥ कमो । पवो । विप्पवो । सुक्कपक्खो ॥ उत्प्लावयति । उप्पावेइ ॥ स्याद्भव्यचैत्यचौर्यसमेषु यात् ॥ ७ ॥ स्या
दादिषु चौर्यशब्देन समेषु च शब्देषु संयुक्तस्य यात्पूर्व इद्भवति ॥ सिआ । सिआवाओ । भविओ । चेइअं ॥ चौर्यसम ।
चोरिअं । थेरिअं । भारिआ । गंभीरिअं । गहीरिअं । आयरिओ । सुंदरिअं । सोरिअं । वीरिअं । वरिअं । सूरिओ ।
धीरिअं । बंभचरिअं ॥ स्वप्नेनात् ॥ ८ ॥ स्वप्नशब्दे नात्पूर्व इद्भवति ॥ सिविणो ॥ स्निग्धे वादितौ ॥ ९ ॥
स्निग्धे संयुक्तस्य नात्पूर्वौ अदितौ वा भवतः ॥ सणिद्धं । सिणिद्धं ॥ पक्षे । णिद्धं ॥ कृष्णे वर्णे वा ॥ ११० ॥ क

ष्णेवर्णवाचिनिसंयुक्तव्यंजनात्पूर्वावदितौवाभवतः ॥ कसणो । कसिणो । कण्हो ॥ वर्णइतिकिं ॥ विण्हौ । कण्हो
॥ उच्चार्हति ॥ ११ ॥ अर्हच्छब्देसंयुक्तस्यांत्यव्यंजनात्पूर्वउतअदितौचभवतः ॥ अरुहो । अरहो । अरिहो ॥
अरुहंतो । अरहंतो । अरिहंतो ॥ पद्मछद्ममूर्खद्वारेवा ॥ १२ ॥ एषुसंयुक्तस्यांत्यव्यंजनात्पूर्वउद्वाभवति ॥
पउमं । पोम्मं ॥ छउमं । छम्मं ॥ मुरुक्खो । मुक्खो ॥ दुवारं ॥ पक्षे । वारं । देरं । दारं ॥ तन्वीतुल्येषु ॥ १३ ॥
उकारांतात्ङीप्रत्ययांतास्तन्वीतुल्यास्तेषुसंयुकस्यांत्यव्यंजनात्पूर्वउकारोभवति॥तणुवी।लहुवी।गुरुवी।बहुवी।
पुहुवी । मउवी ॥ क्वचिदन्यत्रापि ॥ स्रुग्घं । सुरुग्घं ॥ आर्षे । सूक्ष्मं । सुहुमं ॥ एकःस्वरेश्वःस्वे ॥ १४ ॥
एकस्वरेपदेयौश्वस्स्वइत्येतौतयोरंत्यव्यंजनात्पूर्वउद्भवति ॥ श्वःकृतं । सुवेकयं ॥ स्वेजनाः । सुवेजणा ॥ एकस्वर
इतिकिं ॥ स्वजनः । सअणो ॥ ज्यायामीत् ॥ १५ ॥ ज्याशब्देऽत्यव्यंजनात्पूर्वईद्भवति ॥ जीआ ॥ करेणूवारा
णस्योरणोर्व्यत्ययः ॥ १६ ॥ अनयोरेफणकारयोर्व्यत्ययःस्थितिपरिवृत्तिर्भवति ॥ कणेरू । वाणारसी ॥ स्त्रीलिं
गनिर्देशात्पुंसिनभवति ॥ एसोकरेणू ॥ आलानेलनोः ॥ १७ ॥ आलानशब्देलनोर्व्यत्ययोभवति ॥ आणा

लो । आणालक्खंभो ॥ अचलपुरेचलोः ॥ १८ ॥ अचलपुरेशब्देचकारलकारयोर्व्यत्ययोभवति ॥ अचलपुरं ॥
महाराष्ट्रेहरोः ॥ १९ ॥ महाराष्ट्रशब्देहरोर्व्यत्ययोभवति ॥ मरहट्ठं ॥ ह्रदेहदोः ॥ १२० ॥ ह्रदशब्देहकारद
कारयोर्व्यत्ययोभवति ॥ द्रहो ॥ आर्षे । हरएमहपुंडरिए ॥ हरितालेरलोर्नवा ॥ २१ ॥ हरितालशब्देरकारल
कारयोर्व्यत्ययोवाभवति ॥ हलिआरो । हरिआलो ॥ लघुकेलहोः ॥ २२ ॥ लघुकशब्देघस्यहत्त्वेकृतेलहोर्व्यत्य
योवाभवति ॥ हलुअं । लहुअं ॥ घस्यव्यत्ययेकृतेपदादित्त्वाद्धोनप्राप्नोतीतिहकरणम् ॥ ललाटेलडोः ॥ २३ ॥
ललाटशब्देलकारडकारयोर्व्यत्ययोभवतिवा ॥ णलाडं । णडालं ॥ ललाटेचेत्यादेर्लस्यणविधानादिहद्वितीयोलः
स्थानी ॥ ह्येह्योः ॥ २४ ॥ ह्यशब्देहकारयकारयोर्व्यत्ययोभवतिवा ॥ गुह्यं । गुय्हं । गुज्झं ॥ सह्यः । सय्हो । स
ज्झो ॥ स्तोकस्यथोक्कथोवथेवाः ॥ २५ ॥ स्तोकशब्दस्यएतेत्रयआदेशाभवंतिवा ॥ थोक्कं । थोवं । थेवं ॥ पक्षे ।
थोअं ॥ दुहितृभगिन्योर्धूआबहिण्यौ ॥ २६ ॥ अनयोरेतावादेशौवाभवतः ॥ धूआ । दुहिआ । बहिणी ॥ भइणी ॥
वृक्षक्षिप्तयोरुक्खछूढौ ॥ २७ ॥ वृक्षक्षिप्तयोर्यथासंख्यंरुक्खछूढइत्यादेशौवाभवतः ॥ रुक्खो । वच्छो ॥ छूढं ।

खित्तं ॥ उच्छूढं । उक्खित्तं ॥ वनितायाविलया ॥ २८ ॥ वनिताशब्दस्यविलयाइत्यादेशोवाभवति ॥ विलया। वणिआ ॥ विलयेतिसंस्कृतेपीतिकेचित् ॥गौणस्येषतःकूरः ॥ २९ ॥ ईषच्छब्दस्यगौणस्यकूरइत्यादेशोवाभवति ॥ चिंचव्वकूरपिक्का ॥ पक्षेईसि ॥ स्त्रियाइत्थी ॥ १३० ॥ स्त्रीशब्दस्यइत्थीइत्यादेशोवाभवति ॥ इत्थी । थी॥ धृतेर्दिहिः ॥ ३१ ॥ धृतिशब्दस्यदिहिरित्यादेशोवा ॥ दिही । धिई ॥ मार्जारस्यमञ्जरवञ्जरौ ॥ ३२ ॥ मार्जारस्यमञ्जरवञ्जरइत्यादेशौवाभवतः ॥ मञ्जरो । वञ्जरो ॥ पक्षे । मज्जारो ॥ वैडूर्यस्यवेरुलिअं ॥ ३३ ॥ वैडूर्यशब्दस्यवेरुलिअइत्यादेशोवाभवति ॥ वेरुलिअं । वैडुज्जं ॥ एण्हिंएत्ताहेइदानीमः ॥ ३४ ॥ अस्यएतावादेशौवाभवतः ॥ एण्हिं । एत्ताहे । इआणिं ॥ पूर्वस्यपुरिमः ॥ ३५ ॥ पूर्वस्यस्थानेपुरिमइत्यादेशोवाभवति॥ पुरिमं । पुव्वं ॥ त्रस्तस्यहित्थतट्ठौ ॥ ३६ ॥ त्रस्तशब्दस्यहित्थतट्ठावित्यादेशौवाभवतः॥ हित्थं । तट्ठं । तत्थं ॥ बृहस्पतौबहोभयः ॥ ३७ ॥ बृहस्पतिशब्देबहइत्यस्यावयवस्यभयइत्यादेशोवाभवति ॥ भयस्सई । भयप्फई । भयप्पई ॥ पक्षे । बहस्सई । बहप्फई । बहप्पई ॥ वाबृहस्पतावितीकारेउकारेच बिहस्सई । बिहप्फई । बिहप्पई।

मलिनोभयशुक्तिछुप्तारब्धपदातेर्मइलावहसिप्पिछिक्काऽढत्तपाइक्कं ॥ ३८ ॥ मलिनादीनांयथासंख्यंमइलादयआदेशावाभवंति ॥ मलिनं । मइलं मलिणं ॥ उभयं । अवहं । उवहमित्यपिकेचित् ॥ अवहोआसं । उभयबलं ॥ आर्षे । उभयोकालं ॥ शुक्ति । सिप्पी । सुत्ती ॥ सुप्त । छुप्त । छिक्को । छुत्तो ॥ आरब्ध । आढत्तो। आरद्धो। पदातिः । पाइक्को। पआई ॥ दंष्ट्रायादाढा ॥ ३९ ॥ पृथक्योगाद्वेतिनिवृत्तं। दंष्ट्राशब्दस्यदाढाइत्यादेशोभवति॥ दाढा ॥ अयं संस्कृतेपि ॥ बहिसोबाहिंबाहिरौ ॥ १४० ॥ बहिःशब्दस्यबाहिंबाहिरइत्यादेशौभवतः ॥ बाहिं बाहिरं ॥ अधसोहेट्ठं ॥ ४१ ॥ अधश्शब्दस्यहेट्ठइत्यादेशोभवति ॥ हेट्ठं ॥ मातृपितुःस्वसुःसिआच्छौ॥४२॥ मातृपितृभ्यांपरस्यस्वसृशब्दस्य सिआ छाइत्यादेशौभवतः ॥ माउसिआ । माउच्छा ॥ पिउसिआ । पिउच्छा ॥ तिर्यचस्तिरिच्छिः ॥ ४३ ॥ तिर्यच्शब्दस्यतिरिच्छिरित्यादेशोभवति ॥ तिरिच्छि पेच्छइ ॥ आर्षेतिरिआइत्यादेशोपि । तिरिआ ॥ गृहस्यघरोऽपतौ ॥ ४४ ॥ गृहशब्दस्यघरइत्यादेशोभवति पतिशब्दश्चेत्परोनभवति ॥ घरो। घरसामी । राअघरं ॥ अपतावितिकिं ॥ गहवई ॥ शीलाद्यर्थस्येरः ॥ ४५ ॥ शीलधर्मसाध्वर्थेविहितस्यप्रत्यय

स्यइरइत्यादेशोभवति ॥ हसनशीलोहसिरो । रोविरो । लज्जिरो । जंपिरो । वेविरो । भमिरो । ऊससिरो । केचित्तृ
नएवेरमाहुस्तेषांनमिरगमिरादयोनसिध्यंति ॥ तृनोत्ररादिना बाधितत्त्वात् ॥ क्त्वस्तुमत्तूणतुआणाः ॥ ४६ ॥
क्त्वाप्रत्ययस्य तुम् अत् तूण तुआण इत्येतेआदेशाभवंति ॥ तुम् ॥ दट्ठुं । मोत्तुं ॥ अत् ॥ भमिअ ॥ तूण ॥ घेत्तूण ।
काऊण ॥ तुआण ॥ भेत्तुआण । सोउआण ॥ वंदित्तुइत्यनुस्वारलोपात् ॥ वंदित्ता इतिसिद्धंसंस्कृतस्यैववलोपेन । कट्टु
इतितुआर्षे ॥ इदमर्थस्यकेरः ॥ ४७ ॥ इदमर्थस्यप्रत्ययस्यकेरइत्यादेशोभवति ॥ युष्मदीयः । तुम्हकेरो ॥ अस्म
दीयः । अम्हकेरो । नचभवंतिमईअपक्खेपाणिणीआ ॥ परराजभ्यांक्कडिक्कौच ॥ ४८ ॥ परराजन्इत्येताभ्यां
परस्यइदमर्थस्यप्रत्ययस्ययथासंख्यंसंयुक्तौ क्क डित्इक्कश्चादेशौभवतः । चकारात्केरश्च ॥ परकीयं । पारक्कं । पारकेरं ॥
राजकीयं । राइक्कं । रायकेरं ॥ युष्मदस्मदोऽञएच्चयः ॥ ४९ ॥ आभ्यांपरस्येदमर्थस्यात्रएच्चयइत्ययमादेशोभ ॥ ३२ ॥
वति ॥ युष्माकमिदं यौष्माकं । तुम्हेच्चयं । एवमम्हेच्चयं ॥ वतेर्व्वः ॥ १५० ॥ वतेःप्रत्ययस्यद्विरुक्तोवोभवति ॥
महुरव्वपाडलिउत्तेपासाआ ॥ सर्वांगादीनस्येकः ॥ ५१ ॥ सर्वांगात्सर्वादेःपथ्यंगेत्यादिनाविहितस्येनस्यस्थाने

35

इकइत्यादेशोभवति ॥ सर्वांगीणः । सव्वंगीओ ॥ पथोणस्येकट् नित्यंणः ॥ ५२ ॥ पन्थश्चेतियःपथोणोविहित
स्तस्येकट्भवति ॥ पांथः । पहिओ ॥ ईयस्यात्मनोणयः ॥५३॥ आत्मनःपरस्ययस्यणयइत्यादेशोभवति ॥ आ
त्मीयं । अप्पणयं ॥ त्वस्यडिमात्तणौवा ॥ ५४ ॥ त्वप्रत्ययस्य डिमा त्तण इत्यादेशौवाभवतः ॥ पीणिमा पुप्फि
मा ॥ पीणत्तणं । पुप्फत्तणं ॥ पक्षे । पीणत्तं । पुप्फत्तं ॥ इम्नःपृथ्व्यादिषुनियतत्वात्तदन्यप्रत्ययांतेष्वस्यविधिः ॥ पी
नताइत्यस्यप्राकृतेपीणयाइतिभवति ॥ पीणदाइतितुभाषांतरे ॥ तेनेहतलोदानंक्रियते ॥ अनंकोठात्तैलस्यडे
ल्लः ॥ ५५ ॥ अंकोठवर्जितान्नाम्नःशब्दात्परस्यतैलप्रत्ययस्यडेल्लइत्यादेशोभवति ॥ सुरहिजलेणकडुएल्लं ॥ अनंको
ठादितिकिं ॥ अंकोल्लतेल्लं ॥ यत्तदेतदोऽतोरित्तिअएतल्लुक्च ॥ ५६ ॥ एभ्यःपरस्यडावादेरतोःपरिमाणार्थस्यइ
त्तिअइत्यादेशोभवति एतदोलुक्च ॥ यावत् । जित्तिअं ॥ तावत् । तित्तिअं ॥ एतावत् । इत्तिअं ॥ इदंकिमश्चडेत्ति
अडेत्तिल्लडेदहाः ॥५७॥ इदंकिंभ्यांयत्तदेतद्भ्यश्चपरस्याऽतोर्डावतोर्वाडित् एत्तिअ एत्तिल्ल एदह इत्यादेशाभवं
तिएतल्लुक्च ॥ इयत् । एत्तिअं । एत्तिल्लं । एदहं ॥ कियत् । केत्तिअं । केत्तिल्लं । केदहं ॥ यावत् । जेत्तिअं । जेत्तिल्लं । जे

इहं ॥ तावत् । तेत्तिअं । तेत्तिलं । तेद्दहं ॥ एतावत् । एत्तिअं । एत्तिलं । एद्दहं ॥ कृत्वसोहुत्तं ॥ ५८ ॥ वारेकृत्व
सितिय:कृत्वसृविहितस्तस्यहुत्तमित्यादेशोभवति ॥ सअहुत्तं । सहस्सहुत्तं ॥ कथंप्रियाभिमुखंपियहुत्तं ॥ अभि मुखा
र्थेनहुतशब्देनभविष्यति ॥ आल्विल्लोल्लालवन्तमन्तेत्तेरमणामतोः ॥ ५९ ॥ आलुइत्यादयआदेशामतोःस्था
नेयथाप्रयोगंभवंति ॥ आलू ॥ नेहालू । दयालू । ईसालू । लज्जालूआ ॥ इल्ल ॥ सोहिल्लो । छाइल्लो । जामइल्लो ॥
उल्ल ॥ विआरुल्लो । मंसुल्लो । दप्पुल्लो ॥ आल ॥ सद्दालो । जडालो । फडालो । रसालो । जोण्हालो ॥ वन्त ॥ धण
वन्तो । भत्तिवन्तो ॥ मन्त ॥ हणुमंतो । सिरिमन्तो । पुण्णमन्तो ॥ इत्त ॥ कव्वइत्तो । माणइत्तो ॥ इर ॥ गव्विरो ।
रेहिरो ॥ मण ॥ धणमणो ॥ केचिन्मादेशमपीच्छंति ॥ हणुमा ॥ मतोरितिकिं ॥ धणी । अत्थिओ ॥ त्तोदोतसो
वा ॥ १६० ॥ तसःप्रत्ययस्यस्थाने त्तो दो इत्यादेशौभवतः ॥ सव्वत्तो । सव्वदो ॥ एकत्तो । एकदो ॥ अन्नत्तो । अन्न
दो ॥ कत्तो । कदो ॥ जत्तो । जदो । तत्तो । तदो ॥ इत्तो । इदो ॥ पक्षे । सव्वओइत्यादि ॥ त्रपोहिहत्थाः ॥६१॥ ॥ ३३ ॥
त्रप्प्रत्ययस्यएतेभवंति ॥ यत्र । जहि । जह । जत्थ ॥ तत्र । तहि । तह । तत्थ ॥ कुत्र । कहि । कह । कत्थ ॥ अन्य

त्र । अन्नहि । अन्नह । अन्नत्थ ॥ वैकाद्दःसिसिअंइआ ॥ ६२ ॥ एकशब्दात्परस्यदाप्रत्ययस्य सि सिअं इआ
ऽऽदेशावाभवंति ॥ एकदा । एक्कसि । एक्कसिअं । एकइआ ॥ पक्षे । एगआ ॥ डिल्लडुल्लौभवे ॥ ६३ ॥ भवेर्थेना
म्न:परौइल्लउल्लइत्येतौडितौप्रत्ययौभवतः ॥ गामिल्लिया । पुरिल्लं । हेट्ठिल्लं । उवरिल्लं । अप्पुल्लं ॥ आल्वालावपीच्छं
त्यन्ये ॥ स्वार्थेकश्चवा ॥ ६४ ॥ स्वार्थेकश्चकारादिल्लोल्लौडितौप्रत्ययौवाभवतः ॥ क ॥ कुंकुमपिंजरअंचंदओगअ
णयम्मि । धरणीहरपक्खुब्भंतअं । दुहिअएरामहियअए । इहअं । आलेट्ठुअं । आश्लेष्टुमित्यर्थः ॥ द्विरपिभवति॥
बहुअअं ॥ ककारोच्चारणंपैशाचिकभाषार्थं ॥ यथा वतनकेवतनकंसमप्पेत्तूण ॥ इल्ल । निज्जिआसोअपल्लविल्लेण ।
पुरिल्लो । पुरापुरोवा ॥ उल्ल ॥ महपिउल्लओमुहुल्लं । हत्थुल्ला ॥ पक्षे । चंदोगअणंइहआलेट्ठुं ॥ बहु । बहुअं । मुहं ।
हत्था ॥ कुत्सादिविशिष्टेतुसंस्कृतवदेवकप्सिद्धः ॥ यावादिलक्षणःकःप्रतिनियतएवेतिवचनं ॥ ल्लोनवैकाद्वा ॥६५॥
आभ्यांस्वार्थेसंयुक्तोल्लोवाभवति ॥ नवल्लो । एकल्लो ॥ सेवादित्वात्कस्यद्वित्वेएक्कल्लो ॥ पक्षे । नवो । एक्को । एओ ॥
उपरेःसंव्याने ॥ ६६ ॥ संव्यानेऽर्थेवर्तमानादुपरिशब्दात्स्वार्थेल्लोभवति ॥ अवरिल्लो ॥ संव्यानइतिकिं ॥ अव

रिं ॥ भ्रुवोमयाडमया ॥ ६७ ॥ भ्रूशब्दात्स्वार्थे मया डमया इत्येतौप्रत्ययौभवतः॥ भुमया। भमया॥ शनैसो
डिअम् ॥ ६८ ॥ शनैस्शब्दात्स्वार्थेडिअम्भवति ॥ सणिअमवगूढो ॥ मनाकोवाडयंडियंच ॥ ६९ ॥ मना
क्शब्दात्स्वार्थेडयम्डियंचप्रत्ययौवाभवतः ॥ मणयं । मणियं ॥ पक्षे । मणा ॥ मिश्रातूडालिअः ॥ १७० ॥
मिश्रशब्दात्स्वार्थेडालिअप्रत्ययोभवति ॥ मीसालिअं ॥ पक्षे । मीसं ॥ रोदीर्घात् ॥ ७१ ॥ दीर्घशब्दात्स्वार्थेरो
वाभवति ॥ दीहरं । दीहं ॥ त्वादेःसः ॥ ७२ ॥ भावेत्वतलित्यादिनाविहितत्वादेःपरःस्वार्थेसएवत्वादिर्वाभव
ति ॥ मृदुत्त्वेन । मउअत्तयाइ ॥ आतिशायिकात्त्वातिशायिकःसंस्कृतवदेवसिद्धः॥ जिट्ठअरो । कनिट्ठअरो ॥ वि
द्युत्पत्रपीतांधाल्लः ॥ ७३ ॥ एभ्यःस्वार्थेलोवाभवति ॥ विज्जुला । पत्तलं । पीवलं । पीअलं । अंधलो ॥ पक्षे ।
विज्जू । पत्तं । पीअं । अंधो ॥ कथंजमलं यमलमिति संस्कृतशब्दात्भविष्यति ॥ गोणादयः ॥ ७४ ॥ गोणा ॥ ३४ ॥
दयःशब्दाऽनुक्तप्रकृतिप्रत्ययलोपागमवर्णविकाराबहुलंनिपात्यंते ॥ गौः । गौणो । गावी । गावा । गावीओ ॥ बलीव
र्दः । बइल्लो ॥ आपः । आऊ ॥ पञ्च । पंचाशत् । पंचावण्णा । पणअन्ना ॥ त्रिपञ्चाशत् । तेवण्णा ॥ त्रिचत्वारिंश

त् । तेआलीसा ॥ व्युत्सर्गः । विउस्सग्गो ॥ व्युत्सर्जनं । वीसरिणं ॥ बहिर्मैथुनंवा । बहिद्धाकार्यं णासुकसिअं ॥ क
चित् । कत्थइ ॥ उद्वहति । मुव्वहइ ॥ अपस्मारः । वम्हलो ॥ उत्पलं । कंदुट्टं ॥ धिक्धिक् । छिछि द्धिद्धि ॥ धिगस्तु ।
धिरत्थु ॥ प्रतिस्पर्धा । पडिसिद्धा । पाडिसिद्धा ॥ स्थासकः । चच्चिक्कं ॥ निलयः । निहेलणं ॥ मघवान् । मघोणो ॥
साक्षी । साक्खिणो ॥ जन्म । जम्मणं ॥ महान् । महंतो ॥ भवान् । भवंतो ॥ आशीः । आशीसा ॥ क्वचित्हस्य
ड्भौ ॥ बृहत्तरं । वड्डअरं ॥ हिमोरः ॥ भिमोरो । क्षुल्लकः । क्षुल्लकः । खुड्डओघोषाणामग्रेतनः ॥ गायनः । घाअणो ॥
वडः । वढो ॥ ककुदं । ककुधम् ॥ अकाण्डं । अत्थक्कं ॥ लज्जावली । लज्जालुइणी ॥ कुतूहलं । कुड्डं ॥ चूतः । मा
अंदो ॥ माकंदशब्दःसंस्कृतोपीत्यन्ये ॥ विष्णुः । भट्टिओ ॥ श्मशानं । करसी ॥ असुराः । अगया ॥ खेलं । खेड्डं ॥
पौष्पंरजः । तिंगिच्छि दिनं ॥ अछं । समर्थः ॥ पक्कले । पंडितः ॥ पेलच्छो । कर्पासः ॥ पलही । बली ॥ उज्जलो ।
तांबूलः ॥ झसुरं । पुंश्चली । छिच्छई ॥ शाखा । साहुलीइत्यादि ॥ वाधिकारात्पक्षे यथादर्शनंगउओइत्याद्यपि
भवति ॥ गोला गोआवरी इतितु गोलागोदावरीभ्यां सिद्धं ॥ भाषाशब्दाश्च ॥ आहित्थ । ललक्क । विड्डिर । प

चड्डिय । उप्पेहड । मडप्फर । पड्डित्थिर । अट्टमट्ट । विहडप्फड । उज्जल्ल । हल्लप्फलइत्यादयोमहाराष्ट्रविदर्भादि
देशप्रसिद्धा लोकतोऽवगंतव्याः ॥ क्रियाशब्दाश्च ॥ अवयासइ । फुंफुल्लइ । उप्फालेइइत्यादयः । अतएव कृष्ट
घृष्ट वाक्य विद्वस् वाचस्पति विष्टरश्रवस् प्रचेतस् प्रोक्तप्रोतादीनां क्विबादिप्रत्ययांतानांचाग्निचित्सोमसुत्सुग्लसुम्ले
त्यादीनांपूर्वैःकविभिरप्रयुक्तानांप्रतीतिवैषम्यपरःप्रयोगोनकर्तव्यः शब्दांतरैरेवतुतदर्थोभिधेयः॥यथाकृष्टः कुशलः॥
वाचस्पतिर्गुरुः ॥ विष्टरश्रवा हरिरित्यादि ॥ घृष्टशब्दस्यतु सोपसर्गस्यप्रयोगइष्यतएव ॥ मंदरयडपरिघट्टं । त
द्दिअसनिहट्ठाणंगइत्यादि ॥ आर्षेतुयथादर्शनंसर्वमविरुद्धं ॥ यथा । घट्ठामट्ठा । विउसासुअलक्खणाणुसारेण ।
वक्कंतरेसुअपुणोइत्यादि ॥ अव्ययं ॥ ७५ ॥ अधिकारोयं ॥ इतःपरंयेवक्ष्यंतेआपादसमाप्तेस्तेऽव्ययसंज्ञकाज्ञा
तव्याः ॥ तंवाक्योपन्यासे ॥ ७६ ॥ तंइतिवाक्योपन्यासेप्रयोक्तव्यं ॥ तंतिअसबंदिमोक्खं ॥ आमअभ्यु
पगमे ॥ ७७ ॥ आमेत्यभ्युपगमेप्रयोक्तव्यं ॥ आमबहुलावणोली ॥ णविवैपरीत्ये ॥ ७८ ॥ णवीतिवै
परीत्येप्रयोक्तव्यं ॥ णविहावणे ॥ पुणरुत्तंकृतकरणे ॥ ७९ ॥ पुणरुत्तमितिकृतकरणेप्रयोक्तव्यं ॥ अइसुप्पइ

पंसुलिणी सहेहिंअगेहिंपुणरुत्तं ॥ हंदिविषादविकल्पपश्चात्तापनिश्चयसत्ये ॥ १८० ॥ हंदिइतिविषादादि
षुप्रयोक्तव्यं ॥ हंदिचलणेणउसोणमाणिओ । हंदिहुज्जएत्ताहे । हंदिनहोहीभणिरी । सासिज्जइहंदितुहकज्जे ।
हंदिसत्यमित्यर्थः ॥ हंदचगृहाणार्थे ॥ ८१ ॥ हंदहंदिचगृहाणार्थेप्रयोक्तव्यं ॥ हंदपलोएसु इमं । हंदि । गृहाणे
त्यर्थः ॥ मिवपिवविवव्ववविअइवार्थेवा ॥ ८२ ॥ एतेइवार्थेअव्ययसंज्ञकाःप्राकृतेवाप्रयुज्यंते ॥ कुमुअं मिव ।
चंदणं पिव । हंसोविव । साअरोव्व खारोओ ॥ सेसस्सवनिम्मोओ । कमलंविअ ॥ पक्षे नीलुप्पलमालइव ॥ जे
णतेणलक्षणे ॥ ८३ ॥ जेणतेणइत्येतौप्रयोक्तव्यौ ॥ भमररुअंजेणकमलवणं । भमररुअंतेणकमलवणं ॥ णइ
चेअचिअच्चअवधारणे ॥ ८४ ॥ एतेअवधारणेप्रयोक्तव्याः ॥ गइएणइ । जंचेअमउलणं लोअणाणमणुबद्धं
तंचिअकामिणीणं ॥ सेवादित्वात्द्वित्वमपि ॥ तेच्चिअधन्ना । तेच्चेअसुपुरिसा ॥ च्च । सच्चपरूवेण । सच्चसीलेण ॥
बलेनिर्धारणनिश्चययोः ॥ ८५ ॥ बलेइतिनिर्धारणेनिश्चयेचप्रयोक्तव्यं ॥ निर्धारणे । बलेपुरिसोधणंजओख
त्तिआणं ॥ निश्चयेबलेसीहो । सिंहएवायं ॥ किरेरहिरकिलार्थेवा ॥ ८६ ॥ किर इर हिर इत्येतेकिलार्थेवाप्रयो

प्रा.वा०मा० कव्याः ॥ कहंकिरखरहिअओ । तस्सइर । पिअवयंसोहिरमाणिज्जो ॥ पक्षे । एवंकिलतेणसिविणएभणिआ ॥ व्या० अ० ८
॥ ३६ ॥ णवरंकेवले ॥ ८७ ॥ केवलेऽर्थेणवरंइतिप्रयोक्तव्यं ॥ णवरंपिआइंचिअनिव्वडंति ॥ आनंतर्येणवरि ॥ ८८ ॥ पाद २
आनंतर्येणवरीतिप्रयोक्तव्यं ॥ णवरिअसेरहुवइणा ॥ केचित्तु केवलानंतर्यार्थयोर्णवरणवरीत्येकमेवसूत्रंकुर्वते
तन्मतेउभावप्युभयार्थौ ॥ अलाहिनिवारणे ॥ ८९ ॥ अलाहीतिनिवारणेप्रयोक्तव्यं ॥ अलाहिकिंवाउ
एणलेहेण ॥ अणणाईनञर्थे ॥ १९० ॥ अण णाइं इत्येतौनञर्थेप्रयोक्तव्यौ ॥ अणचिंतिअममुणंति ।
णाइं करेमिरोसं ॥ माइंमार्थे ॥ ९१ ॥ माइं इतिमार्थेप्रयोक्तव्यं ॥ माइंकाहीअरोसं । माकार्षीद्रोषं ॥ हद्धी
निर्वेदे ॥ ९२ ॥ हद्धी इत्यव्ययमतएवनिर्देशात्हाधिक्शब्दादेशोवा निर्वेदेप्रयोक्तव्यं ॥ हद्धी हद्धी । हाधाहाधाह ॥
वेव्वेभयवारणविषादे ॥ ९३ ॥ भयवारणविषादेषु वेव्वे इति प्रयोक्तव्यं ॥ वेव्वेतिभये । वेव्वेतिवारणे जूरणेअ वे ॥ ३६ ॥
व्वेतिउल्लाविरीइवितुहं वेव्वेतिमयच्छिकिंणेअं । किंउल्लावेंतीएउअजूरंतीए किंतुभीआए उव्वाडिरीए वेव्वेतितीएभ
णिअं नविम्हरिमो ॥ वेव्वचआमंत्रणे ॥ ९४ ॥ वेव्वेव्वेच आमंत्रणेप्रयोक्तव्ये ॥ वेव्वगोले । वेव्वेमुरंदलेवहसिपा

णीयं ॥ मामिहलाहलेसख्यावा ॥ ९५ ॥ एतेसख्याआमंत्रणेवाप्रयोक्तव्याः ॥ मामि सरिसक्खराणवि । पणवहमा
णस्सहलाहलेहयासस्स ॥ पदोसहिएरिसेच्चिअगई ॥ देसंमुखीकरणेच ॥ ९६ ॥ संमुखीकरणेसख्याआमंत्रणेचदे इति
प्रयोक्तव्यं ॥ देपसिअतावसुंदरि । देआपसिअनिअत्तसु ॥ हुंदानपृच्छानिवारणे ॥ ९७ ॥ हुंइतिदानादिषुप्रयुज्यते ॥
हुंगेण्हअप्पणोच्चिअ ॥ पृच्छायां । हुंसाहुसुसब्भावं ॥ निवारणे । हुंनिल्लज्जसमोसर ॥ हुखुनिश्चयवितर्कसंभाव
नविस्मये ॥ ९८ ॥ हुखुइत्येतौनिश्चयादिषुप्रयोक्तव्यौ ॥ निश्चये । तंपिहुअच्छिन्नसिरीयरहस्सं ॥ वितर्कऊहःसंशयो
वा ॥ ऊहे । नहुणवरंसंगहिआ । एअंखुहसइ ॥ संशये । जलहरोखुधूमवडलोखु ॥ संभावने । तरिउंणहुणवरंइमं । ए
अंखुहसइ ॥ विस्मये । कोखुएसोसहस्ससिरो ॥ बहुलाधिकारादनुस्वारात्परोहुर्नप्रयोक्तव्यः ॥ ऊगर्हाऽऽक्षेपविस्म
यसूचने ॥ ९९ ॥ ऊइतिगर्हादिषुप्रयोक्तव्यं ॥ गर्हा । ऊणिलज्ज ॥ प्रक्रांतस्यवाक्यस्यविपर्यासाशंकायाविनिवर्त
नलक्षणआक्षेपः ॥ ऊकिंमएभणिअं ॥ विस्मये । ऊकहमुणिआअहयं ॥ सूचने । ऊकेणनविण्णाअं ॥ थूकुत्सायां
॥ २०० ॥ थूइतिकुत्सायांप्रयोक्तव्यं ॥ थूनिल्लज्जोलोओ ॥ रेअरेसंभाषणरतिकलहे ॥ २०१ ॥ अनयोरर्थ

योर्यथासंख्यमेतौप्रयोक्तव्यौ ॥ रेसंभाषणे ॥ रेहिअअमडहसिरिआ ॥ अरेरतिकलहे ॥ अरेमएसमंमाकरेसुउवहासं
॥ हरेक्षेपेच ॥ २ ॥ क्षेपेसंभाषणरतिकलहयोश्चहरेइतिप्रयोक्तव्यं ॥ क्षेपे । हरेणिल्लज्ज ॥ संभाषणे । हरेपुरिसा॥
रतिकलहे । हरेवहुवल्लह ॥ ओसूचनापश्चात्तापे ॥ ३ ॥ ओइतिसूचनापश्चात्तापयोःप्रयोक्तव्यं ॥ सूचनायां ।
ओअविणअतत्तिल्ले ॥ पश्चात्तापे । ओनमएछायाइत्तिआए ॥ विकल्पेतुउतादेशेनओकारेणैवसिद्धं ॥ ओविरएमि
नहअले अव्वोसूचनादुःखसंभाषणापराधविस्मयानंदादरभयखेदविषादपश्चात्तापे ॥ ४ ॥ अव्वोइतिसूच
नादिषुप्रयोक्तव्यं ॥ सूचनायां । अव्वोदुःकरआरअ ॥ दुःखे ॥ अव्वोदलंतिहिअअं ॥ संभाषणे ॥ अव्वोकिमिणंकिमिणं॥
अपराधविस्मययोः ॥ अव्वोहरंतिहिअअंतहविनवेसाहवंतिजुवईण । अव्वोकिंपिरहस्संसुणंतिधुत्ताजणब्भहिआ ॥
आनंदादरभयेषु॥ अव्वोसुपहाअमिणं । अव्वोअज्जम्हसफलंजीअं । अव्वोअइअम्मितुमेनवरंजइसोनजूरिहइ॥खेदे ।
अव्वोनजामिक्खित्तं ॥ विषादे । अव्वोकहणुएअं ॥ पश्चात्तापे । अव्वोतहतेणकआअहअंजहकस्ससाहेमि॥ अइसंभाव
ने ॥ ५ ॥ संभावनेअइइतिप्रयोक्तव्यं ॥ अइदिअरकिंनरपेच्छसि ॥ वणेनिश्चयविकल्पानुकम्प्येच॥ ६ ॥

वणेइतिनिश्चयादौसंभावनेचप्रयोक्तव्यं ॥ वणेदेमि । निश्चयंददामि ॥ विकल्पे । होइवणेनहोइ । भवतिवानभव
ति ॥ अनुकम्प्ये । दासोवणेनमुच्चइ । दासोनुकंप्योवनेनत्यज्यते ॥ संभावने । नत्थिवणेजन्नदेइविहिपरिणामो ।
संभाव्यतेएतदित्यर्थः ॥ मणेविमर्शे ॥ ७ ॥ मणेइतिविमर्शेप्रयोक्तव्यं ॥ मणेसूरो । किंस्वित्सूर्यः ॥ अन्येमन्ये
इत्यर्थमपीच्छंति ॥ अम्मोआश्चर्ये ॥ ८ ॥ अम्मोइत्याश्चर्येप्रयोक्तव्यं ॥ अम्मोकहपारिज्जइ ॥ स्वयमोऽर्थे
अप्पणोनवा ॥ ९ ॥ स्वयमित्यस्यार्थेअप्पणोवाप्रयोक्तव्यं ॥ विसअंविअसंतिअप्पणोकमलसरा ॥ पक्षे सअं
चेवसुणसिकरणिज्जं ॥ प्रत्येकमःपाडिक्कंपाडिएक्कं ॥ २१० ॥ प्रत्येकमित्यस्यार्थे पाडिक्कं पाडिएक्क मितिचप्र
योक्तव्यंवा ॥ पाडिक्कं । पाडिएक्कं ॥ पक्षे पत्तेअं ॥ उअपश्ये ॥ ११ ॥ उअइतिपश्येत्यस्यार्थेप्रयोक्तव्यंवा ॥ उअ
निच्चलनिप्फंदा भिसिणीपत्तंमिरेहइबलाआ ॥ निम्मलमरगअभाअणपरिट्ठिआसंखसुत्तिव्व ॥ पक्षे पुलआदयः ॥
इहराइतरथा॥ १२ ॥ इहराइतिइतरथार्थेप्रयोक्तव्यंवा॥इहरानीसासन्नेहिं ॥ पक्षे इअरहा ॥ एक्कसरिअंझगिति
संप्रति॥ १३ ॥ एक्कसरिअंझगित्यर्थेसंप्रत्यर्थेचप्रयोक्तव्यं ॥ एक्कसरिअं ॥ झगितिसांप्रतंवा ॥ मोरउल्लामुधा ॥ १४ ॥

मोरउल्लाइतिमुधार्थेप्रयोक्तव्यं ॥ मोरउल्ला । मुधेत्यर्थः ॥ दराऽर्धाऽल्पे ॥ १५ ॥ दरइत्यव्ययमर्धार्थेईषदर्थेचप्रयो
क्तव्यं ॥ दरविअसिअं । अर्धेनेषद्वाविकसितमित्यर्थः ॥ किणोप्रश्ने ॥ १६ ॥ किणोइतिप्रश्नेप्रयोक्तव्यं ॥ किणो
धुवसि ॥ ईजेइराःपादपूरणे ॥ १७ ॥ ई जे इर इत्येतेपादपूरणेप्रयोक्तव्याः ॥ नउणाईअच्छीई । अणुकूलं
वोत्तुंजे । गेण्हइरकलमगोवि ॥ अहो । हंहो । हे । हाहा । नाम । अहह । हीसिअयि । अहाह । अरिरिहो इत्याद
यस्तुसंस्कृतसमत्त्वेनसिद्धाः ॥ प्यादयः ॥ १८ ॥ प्यादयोनियतार्थवृत्तयःप्राकृतेप्रयोक्तव्याः ॥ पि वि अप्यर्थे ॥
॥ इत्याचार्यश्रीहेमचंद्रसूरिविरचितायांसिद्धहेमचंद्राभिधानस्वोपज्ञशब्दानुशासनवृत्तौअष्टमस्याध्याय
स्यद्वितीयःपादः ॥ २ ॥ ॥ द्विषत्पुरक्षोदविनोदहेतोर्भवादवामस्यभवद्भुजस्य ॥ अयंविशेषोभुवनैकवीरपरं
नयत्काममपाकरोषि ॥ १ ॥ वीप्स्यात्स्यादेर्वीप्स्येस्वरेमोवा ॥ १ ॥ वीप्सार्थात्पदात्परस्यस्यादेःस्थानेस्वरादौ ॥ ३८ ॥
वीप्सार्थेपदेपरेमोवाभवति ॥ एकैकं । एक्कमेक्कं । एक्कमेक्केण । अंगेअंगे । अंगमंगम्मि । पक्षे एक्केक्कमित्यादि ॥
॥ अतःसेर्डोः ॥ २ ॥ अकारांतान्नाम्नःपरस्यस्यादेःसेःस्थानेडोभवति ॥वच्छो ॥ वैतत्तदः ॥ ३ ॥एतत्तदोऽकारा

त्परस्यस्यादेःसेर्डोर्वाभवति॥एसो । एस । सो । स णरो ॥ जश्शसोर्लुक् ॥ ४ ॥ अकारांतान्नाम्नः परयोः स्यादिसंबं
धिनोर्जश्शसोर्लुग्भवति ॥ वच्छा एए ॥ वच्छेपेच्छ ॥ अमोऽस्य ॥ ५ ॥ अतःपरस्यामोऽकारस्यलुग्भवति ॥ वच्छं
पेच्छ ॥टाआमोर्णः ॥६॥ अतःपरस्यटाइत्येतस्यषष्ठीबहुवचनस्यचआमोणोभवति ॥वच्छेण। वच्छाण॥भिसो
हिहिँहिं ॥ ७ ॥ अतःपरस्यभिसःस्थानेकेवलःसानुनासिकःसानुस्वारश्चहिर्भवति ॥ वच्छेहि । वच्छेहिँ । वच्छेहिं
कआछाही॥ङसेस्त्तोदोदुहिहिन्तोलुकः ॥८॥ अतःपरस्यङसेः त्तो दो दु हि हिन्तो लुक् इत्येतेषडादेशाभवंति ॥
वच्छत्तो । वच्छाओ । वच्छाउ । वच्छाहि । वच्छाहिन्तो । वच्छा । दकारकरणंभाषांतरार्थं ॥ भ्यसस्त्तोदोदुहि
हिन्तोसुन्तो ॥ ९ ॥ अतःपरस्यभ्यसःस्थाने त्तो दो दु हि हिन्तो सुन्तो इत्यादेशाभवंति ॥ वृक्षेभ्यः । वच्छत्तो । व
च्छाओ । वच्छाउ । वच्छाहि । वच्छेहि । वच्छाहिन्तो । वच्छे हिन्तो। वच्छासुन्तो । वच्छेसुन्तो ॥ ङसःस्सः॥१०॥
अतःपरस्यङसःसंयुक्तःस्सोभवति ॥पियस्स । पेमयस्स । उपकुंभशैत्यं । उवकुंभस्ससीअलत्तणं ॥डेम्मिङेः॥११॥
अतःपरस्यङेर्डित्एकारःसंयुक्तोम्मिश्चभवति ॥ वच्छे । वच्छम्मि ॥ देवं । देवम्मि ॥ तं । तम्मि ॥ अत्रद्वितीयातृती

थयोःससमीत्यमोङिः ॥ जश्शस्ङसित्तोदोद्वामिदीर्घः ॥ १२ ॥ एष्वतोदीर्घोभवति ॥ जसिशसिच वच्छा ।
ङसि । वच्छाओ । वच्छाउ । वच्छाहि । वच्छाहिन्तो । वच्छा । त्तोदोदुषु । वृक्षेभ्यः । वच्छत्तो ॥ ह्रस्वःसंयोगइतिह्र
स्वः ॥ वच्छाओ । वच्छाउ ॥आमि । वच्छाण॥ङसिनैवसिद्धेत्तोदोदुग्रहणंभ्यस्येत्त्वबाधनार्थं ॥ भ्यसिवा ॥ १३॥
भ्यसादेशेपरेऽतोदीर्घोवाभवति ॥ वच्छाहिन्तो । वच्छेहिन्तो । वच्छासुन्तो । वच्छेसुन्तो । वच्छाहि । वच्छेहि ।
॥ टाणशस्येत् ॥ १४ ॥ टादेशेणेशसिचपरेऽस्यएकारोभवति ॥ टाण । वच्छेण ॥ णेइतिकिं ॥ अप्पणा ।
अप्पणिआ । अप्पणइआ ॥ शस् । वच्छे पेच्छ ॥ भिस्भ्यस्सुपि ॥ १५ ॥ एष्वतएद्भवति ॥ भिस् । वच्छेहि ।
वच्छेहिँ । वच्छेहिं ॥ भ्यस् । वच्छेहि । वच्छेहिन्तो । वच्छेसुन्तो ॥ सुप् । वच्छेसु ॥ इदुतोदीर्घः ॥ १६ ॥ इका
रस्यउकारस्यचभिस्भ्यस्सुप्सुपरेषुदीर्घोभवति ॥ भिस् ॥ गिरीहिं । बुद्धीहिं । दहीहिं । तरूहिं । धेणूहिं । महूहिं कअं ॥
भ्यस् ॥ गिरीओ । बुद्धीओ । दहीओ । तरूओ । धेणूओ । महूओ आगओ ॥ एवंगिरीहिन्तो । गिरीसुन्तो आग
ओइत्याद्यपि ॥ सुप् ॥ गिरीसु ।बुद्धीसु । दहीसु । तरूसु । धेणूसु । महूसु ठिअं ॥ क्वचिन्नभवति ॥ दिअभूमिसुदाणज

लेल्लिआइ ॥ इत्उत्किं ॥ वच्छेहिं । वच्छेसुन्तो । वच्छेसु ॥ भिस्भ्यस्सुपीत्येव ॥ गिरिंतरुंपेच्छ ॥ चतुरोवा॥१७॥
चतुरस्यउदंतस्यभिस्भ्यस्सुप्सुपरेषुदीर्घोवाभवति ॥ चऊहिं । चउहिं ॥ चऊओ । चउओ ॥ चऊसु । चउसु ॥ लु
प्तेशसि ॥ १८ ॥ इदुतोःशसिलुप्तेदीर्घोभवति ॥ गिरी । बुद्धी । तरू । धेणूपेच्छ ॥ लुप्तइतिकिं ॥ गिरिणो तरुणो
पेच्छ ॥ इदुतइत्येव ॥ वच्छेपेच्छ ॥ जश्शसित्यादिनाशसिदीर्घस्यलक्ष्यानुरोधार्थोऽयंयोगः ॥ लुप्तइतितु णविप्रति
प्रसवार्थशंकानिवृत्यर्थं ॥ अक्लीबेसौ ॥ १९ ॥ इदुतोऽक्लीबेनपुंसकादन्यत्रसौदीर्घोभवति ॥ गिरी । बुद्धी । तरू ।
धेणू ॥ अक्लीबइतिकिं ॥ दहिं । महुं ॥ साविति किं ॥ गिरिं । बुद्धिं । तरुं । धेणुं ॥ केचित्तुदीर्घत्त्वंविकल्प्यतदभावप
क्षेसेर्मादेशमपीच्छंति ॥ अग्गिं । निहिं । वाउं । विहुं ॥ पुंसिजसोडउडओवा ॥ २० ॥ इदुतइतीहपंचम्यंतंसं
बध्यते ॥ इदुतःपरस्यजसःपुंसि अउ अओ इत्यादेशौडितौवाभवतः ॥ अग्गउ । अग्गओ॥ वाअउ । वाअओचि
ट्ठंति ॥ पक्षे अग्गिणो । वाउणो ॥ शेषेअदंतवद्भावादग्गी । वाऊ ॥ पुंसीतिकिं ॥ बुद्धीओ । धेणूओ। दहीइं । महूइं ॥
जसइतिकिं ॥ अग्गी । अग्गिणो ॥ वाऊ । वाउणो पेच्छइ ॥ इदुतइत्येव ॥ वच्छा ॥ वोतोडवो ॥ २१ ॥ उदं

तात्परस्यजसःपुंसिडित् अवो इत्यादेशोवाभवति ॥ साहवो ॥ पक्षे साहओ । साहउ । साहू । साहुणो ॥ उतइ
तिकिं ॥ वच्छा ॥ पुंसीत्येव ॥ धेणू । महूइं ॥ जसइत्येव ॥ साहू । साहुणोपेच्छ ॥ जश्शसोर्णोवा ॥ २२ ॥ इदु
तःपरयोर्जश्शसोःपुंसिणोइत्यादेशोवाभवति ॥ गिरिणो । तरुणो रेहंतिपेच्छवा ॥ पक्षे । गिरी । तरू ॥ पुंसीत्येव ॥
दहीइं । महूइं ॥ जश्शसोरितिकिं ॥ गिरिं । तरुं ॥ इदुतइत्येव ॥ वच्छा । वच्छे ॥ जश्शसोरितिद्वित्वमिदुतइत्य
नेनयथासंख्याभावार्थं ॥ एवमुत्तरसूत्रेपि ॥ ङसिङसोःपुंक्लीबेवा ॥ २३ ॥ पुंसिक्लीबेचवर्तमानादिदुतोःपरयो
र्ङसिङसोर्णोवाभवति ॥ गिरिणो । तरुणो । दहिणो । महुणो आगओविआरोवा ॥ पक्षे । ङसेः । गिरीउ । गिरी
ओ । गिरिहिन्तो ॥ तरूउ । तरूओ । तरुहिन्तो ॥ हिलुकौनिषेत्स्येते ॥ ङसः । गिरिस्स । तरुस्स ॥ ङसिङसोरि
तिकिं ॥ गिरिणा । तरुणा कअं ॥ पुंक्लीबइतिकिं ॥ बुद्धीअ । धेणूअ लद्धंसमिद्धीवा ॥ इदुतइत्येव ॥ कमलाओ ।
कमलस्स ॥ टोणा ॥ २४ ॥ पुंक्लीबेवर्तमानादिदुतःपरस्यटाइत्यस्यणाभवति ॥ गामणिणा । खलपुणा । तरु
णा । दहिणा । महुणा । टाइतिकिं ॥ गिरी । तरू । दहिं । महुं ॥ पुंक्लीबइत्येव ॥ बुद्धीअ । धेणूअकअं ॥ इदुतइत्येव ।

कमलेण ॥ क्लीबेस्वरान्म्सेः ॥ २५ ॥ क्लीबेवर्तमानात्स्वरातान्नाम्नःसेःस्थानेम्भवति ॥ वणं । पिम्मं । दहिं ।
महुं ॥ दहिमहुइतितुसिद्धापेक्षया ॥ केचिदनुनासिकमपीच्छंति ॥ दहिँ । महुँ ॥ क्लीबइतिकिं ॥ बालो । बाला ॥ स्व
रादितिइदुतोर्निवृत्यर्थं ॥ जश्शस्इँइंणयःसप्राग्दीर्घाः ॥ २६ ॥ क्लीबेवर्तमानान्नाम्नःपरयोर्जश्शसोःस्थानेसा
नुनासिकसानुस्वाराविकारौणिश्चादेशाभवंति ॥ सप्राग्दीर्घाः । एषुसत्सुपूर्वस्वरस्यदीर्घत्वंविधीयतेइत्यर्थः ॥ इँ । जा
इँ वअणाइँ अम्हे ॥ इं ॥ उम्मीलंतिपंकआइं पेच्छवा चिट्ठंति ॥ दहीइं जेमवाहुंति ॥ महूइंमुंचवा ॥ णि ॥ फुल्लंतिपंकआ
णिगेण्हवा ॥ हुंतिदहीणिजेमवा । एवंमहूणि ॥ क्लीबइत्येव । वच्छा । वच्छे ॥ जश्शसइतिकिं ॥ सुहं ॥ स्त्रियामुदो
तौवा ॥ २७ ॥ स्त्रियांवर्तमानान्नाम्नःपरयोर्जश्शसोःस्थानेप्रत्येकमुत् ओत् इत्येतौसप्राग्दीर्घौवाभवतः ॥ वचन
भेदोयथासंख्यनिवृत्यर्थः ॥ मालाउ । मालाओ ॥ बुद्धीउ । बुद्धीओ ॥ सहीउ । सहीओ ॥ धेणूउ । धेणूओ ॥ वहू
उ । वहूओ ॥ पक्षे । माला । बुद्धी । सही । धेणू । वहू ॥ स्त्रियामितिकिं ॥ वच्छा ॥ जश्शसइत्येव ॥ मालाएकअं ॥
ईतःसेश्चाऽऽवा ॥ २८ ॥ स्त्रियांवर्तमानादीकारांतात्सेर्जश्शसोश्चस्थानेआकारोवाभवति ॥ एसाहसंतीआ । गो

रीआ चिट्ठति पेच्छवा ॥ पक्षे । हसंतीओ । गोरीओ ॥ टाङस्ङेरदादिदेद्वातुङसेः॥ २९ ॥ स्त्रियांवर्तमानान्ना
म्नःपरेषांटाङस्ङीनांस्थानेप्रत्येकं अत् आत् इत् एत् इत्येतेचत्वारआदेशाभवंति ॥ सप्राग्दीर्घाः ॥ ङसेःपुनरेतेस
प्राग्दीर्घाभवंति ॥ मुद्धाअ । मुद्धाइ । मुद्धाए कअं मुहंठिअंवा ॥ कप्रत्ययेतु मुद्धिआअ मुद्धिआइ । मुद्धिआए ॥
बुद्धीअ । बुद्धीआ । बुद्धीइ । बुद्धीए कअं विहओ ठिअंवा ॥ सहीअ । सहीआ । सहीइ । सहीए कअं वअणं ।
ठिअंवा । धेणूअ । धेणूआ । धेणूइ । धेणूए कअं दुद्धं ठिअंवा ॥ वहूअ । वहूआ । वहूइ । वहूए कअं भवणं
ठिअंवा ॥ ङसेस्तुवा ॥ मुद्धाअ । मुद्धाइ । मुद्धाए । बुद्धीअ । बुद्धीआ । बुद्धीइ । बुद्धीए । सहीअ । सहीआ । सही
इ । सहीए । धेणूअ । धेणूआ । धेणूइ । धेणूए । वहूअ । वहूआ । वहूइ । वहूए आगओ ॥ पक्षे । मुद्धाओ । मुद्धाहिं
तो । रईओ । रईउ । रईहिन्तो । धेणूओ । धेणूउ । धेणूहिन्तो इत्यादि ॥ शेषेऽदंतवदतिदेशाज्जश्शस्ङसि
त्तोदोद्वामिदीर्घइतिदीर्घत्वंपक्षेभवति ॥ स्त्रियामित्येव ॥ वच्छेण । वच्छस्स । वच्छम्मि । वच्छाओ ॥ टादीनामिति
किं ॥ मुद्धा । बुद्धी । सही । धेणू । वहू ॥ नातआत् ॥ ३० ॥ स्त्रियांवर्तमानादादंतान्नाम्नःपरेषांटाङस्ङिङसी

नामादादेशोनभवति ॥ मालाअ । मालाइ । मालाए कअं सुहंठिअंअ । गओवा ॥ प्रत्ययेङीर्नवा ॥ ३१ ॥ अणादिसूत्रे
णप्रत्ययनिमित्तोयोङीरुक्तःसस्त्रियांवर्तमानान्नाम्नोवाभवति ॥ साहणी । कुरुचरी ॥ पक्षे आदित्याप् ॥ साहणा ।
कुरुचरा ॥ अजातेःपुंसः ॥ ३२ ॥ अजातिवाचिनःपुल्लिंगात्स्त्रियांवर्तमानात्ङीर्वाभवति ॥ नीली । नीला । का
ली । काला ॥ हसमाणी । हसमाणा ॥ सुप्पणही । सुप्पणहा ॥ इमीए । इमाए । इमीणं । इमाणं ॥ एईए । एआ
ए । एईणं । एआणं ॥ अजातेरितिकिं ॥ करिणी । अआ । एलआ ॥ अप्राप्तविभाषेयं ॥ तेनगोरीकुमारी इत्यादौसं
स्कृतवन्नित्यमेवङी ॥ किंयत्तदोऽस्यमामिसि ॥ ३३ ॥ अम् आम् वर्जितेस्यादौपरेएभ्यः स्त्रियांङीर्वाभवति ॥
कीओ । काओ । कीए । काए । कीसु । कासु ॥ एवं । जीओ । जाओ ॥ तीओ ताओ इत्यादि ॥ अस्यमामीतिकिं ॥
का । जा । ता । कं । जं । तं ॥ काण । जाण । ताण ॥ छायाहरिद्रयोः ॥ ३४ ॥ अनयोराप्प्रसंगेनाम्नःस्त्रियांङीर्वाभ
वति ॥ छाही । छाहा ॥ हलद्दी । हलद्दा ॥ स्वस्त्रादेर्डा ॥ ३५ ॥ स्वस्रादेःस्त्रियांवर्तमानाड्डाप्रत्ययोभवति । ससा ।
नणंदा । दुहिआहि । दुहिआसु । दुहिआसुओ । गउआ ॥ ह्रस्वोऽमि ॥ ३६ ॥ स्त्रीलिंगस्यनाम्नोऽमिपरेह्र

स्सोभवति ॥ मालं । नइं । वहुं । हसमाणिं । हसमाणपेच्छ ॥ अमितिकिं ॥ माला । सही । वहू ॥ नामंत्र्यात्सौमः ॥ ३७ ॥ आमंत्र्यार्थात्परेसौसतिक्लीबेस्वरान्मसेरितियोम्उक्तःसनभवति ॥ हेतण । हेदहि । हेमहु ॥ डोदीर्घोवा ॥३८॥ आमंत्र्यात्परेसौसतिअतःसेडोरितिनित्यंडोप्राप्तोयश्चाक्लीबेसाविति इदुतोरकारांतस्य चप्राप्तोदीर्घःसवाभवति ॥ हेदेव । हेदेवो ॥ हेखमासमण । हेखमासमणो ॥ हेअज्ज । हेअज्जो ॥ दीर्घः ॥ हेहरी । हेहरि ॥ हेगुरू । हेगुरु ॥ जाइविसुद्धेणपहू ॥ हेप्रभोइत्यर्थः । एवंदोणिपहू जीअलोअे ॥ पक्षेहेपहु ॥ एषुप्राप्तेविकल्पः ॥ इहत्वप्राप्तेहेगोअमा ॥ हेगोअम ॥ हेकासवा हेकासव । रेरेचप्फला । रेरेनिग्घिणया ॥ ऋतोद्वा ॥ ३९ ॥ ऋकारांतस्यामंत्रणेसौपरेअकारांतादेशोवाभवति ॥ हेपितः । हेपिअ । हेदातः । हेदाअ । पक्षे । हेपिअरं । हेदाअर ॥ नाम्न्यरंवा ॥ ४० ॥ ऋदंतस्यामंत्रणेसौपरेनाम्निसंज्ञायांविषयेअरंइतिअंतादेशोवाभवति ॥ हेपितः । हेपिअरं ॥ पक्षे हेपिअ ॥ नाम्नीतिकिं । हेकर्तः । हेतार ॥ वाऽपए ॥ ४१ ॥ आमंत्रणेसौपरेआपएत्वंवाभवति ॥ हेमाले । हेमहिले । आर्यिका । अज्जिए । पज्जिए ॥ पक्षे । हेमालाइत्यादि ॥ आपइतिकिं ॥ हेपिउच्छा । हेमाउच्छा ॥ वहुलाधिकारा त्क्वचिदोत्वमपि ॥ अम्मोभणामि । भणिए ॥ ईदूतोर्ह्रस्वः ॥ ४२ ॥ आमंत्रणेसौपरेईदूदंतयोर्ह्रस्वोभवति ॥ हेनइ । हेगामणि । हेसमणि । हेवहु । हेखलपु ॥ क्विपः ॥ ४३ ॥ क्विबंतस्येदूदंतस्यह्रस्वोभवति ॥ गामणिणा । खलपुणा । गामणिणो । खलपुणो । गामणिसुओ । खलपुसुओ ॥ ऋतामुदस्यमौसुवा ॥ ४४ ॥ सि अम् औ वर्जितेअर्थात्स्यादौपरेऋदंतानामुदंतादेशोवाभवति ॥ जस् ॥ भत्तू ॥ भत्तुणो । भत्तओ ॥ भत्तउ । पक्षे । भत्तारो । शस् । भत्तू । भत्तुणो ॥ पक्षे । भत्तारे ॥ टा ॥ भत्तुणा ॥ पक्षे भत्तारेण ॥ भिस् ॥ भत्तूहिं ॥ पक्षे । भत्तारेहिं ॥ ङसि ॥ भत्तुणो ॥ भत्तूओ ॥ भत्तूउ । भत्तूहिन्तो ॥ पक्षे । भत्ताराओ । भत्ताराउ । भत्ताराहि । भत्ताराहिन्तो । भत्तारा ॥ भ्यस् ॥ भत्तू । भत्तूओ । भत्तूहिन्तो । भत्तूसुन्तो ॥ पक्षे । भत्ताराओ । भत्ताराउ ॥ भत्ताराहि । भत्तारेहि ॥ भत्ताराहिन्तो । भत्तारेहिन्तो ॥ भत्तारासुन्तो । भत्तारेसुन्तो ॥ ङस् । भत्तुणो । भत्तुस्स ॥ पक्षे । भत्तारस्स ॥ आम् ॥ भत्तूणं । भत्तूण ॥ पक्षे । भत्ताराणं । भत्ताराण ॥ ङि । भत्तुम्मि ॥ पक्षे । भत्तारे । भत्तारम्मि ॥ सुप् । भत्तूसु ॥ पक्षे । भत्तारेसु ॥ बहुवचनस्यव्याप्त्यर्थत्वात् यथादर्शनंनाम्न्यप्युद्वाभवतिजश्शस्ङसिङस्सु ॥ पिउणो । जामाउणो । भाउणो ॥ टायां । पिउणा ॥ भिसि । पिऊहिं ॥ सुपि । पिउसु ॥ पक्षे । पिअरा इत्या

दि ॥ अस्यमौस्वितिकिं ॥ पिअा ॥ अम् । पिअरं ॥ औ । पिअरा ॥ आरःस्यादौ ॥ ४५ ॥ स्यादौपरेऋतआरइ
त्यादेशोभवति ॥ भत्तारो । भत्तारा । भत्तारं । भत्तारे । भत्तारेण । भत्तारेहिं ॥ एवं ङःस्यादिपूदाहार्यं ॥ लुप्तस्याद्यपेक्ष
या । भत्तारविहियं ॥ आअरामातुः ॥ ४६ ॥ मातृसंबंधिनऋतःस्यादौपरे आ अरा इत्यादेशौभवतः ॥ माआ
माअरा । माआउ । माआओ । माअराउ । माअराओ । माअं । माअरं इत्यादि ॥ बाहुलकाज्जनन्यर्थस्यादेव
तार्थस्यतुअराइत्यादेशः ॥ माआएकुच्छीए । नमोमाअराण ॥ मातुरिद्वेतीत्त्वे माईण इतिभवति ॥ ऋतामुदेत्या
दिनाउत्वेतु माऊएसमंवन्नेअंवंदेइति ॥ स्यादावित्येव ॥ माइदेवो । माइगणो ॥ नाम्न्यरः ॥ ४७ ॥ ऋदंतस्य
नाम्निसंज्ञायांस्यादौपरेअरइत्यंतादेशोभवति ॥ पिअरा । पिअरं । पिअरे । पिअरेण । पिअरेहिं ॥ जामाअरा ॥ जा
माअरं । जामाअरेण । जामाअरेहिं ॥ भाअरा । भाअरं । भाअरे । भाअरेण । भाअरेहिं ॥ आसौनवा ॥ ४८ ॥
ऋदंतस्यसौपरेआकारोवाभवति ॥ पिआ । जामाआ । भाआ । कत्ता ॥ पक्षे । पिअरो । जामाअरो । भाअरो । कत्ता
रो ॥ ॥ राज्ञः ॥ ४९ ॥ राज्ञोनलोपेंऽत्यस्यआत्त्वंवाभवतिसौपरे ॥ राआ । हेराआ ॥ पक्षे आणादेशे ॥ राआ

णो । हेराअ ॥ हेरायमितितुशौरसेन्यां ॥ एवं हेअप्पं । हेअप्प ॥ जश्शस्ङसिङसांणो ॥ ५० ॥ राजन्शब्दात्परेषामे
षांणोइत्यादेशोवाभवति ॥ जस् ॥ राआणोचिट्ठंति ॥ पक्षे । राआ ॥ शस् ॥ राआणोपेच्छ ॥ पक्षे । राआ । राए ॥ ङसि ॥
राइणोरण्णोआगओ ॥ पक्षे राआओ ॥ राआउ ॥ राआहि । राआहिन्तो । राआ ॥ ङस् ॥ राइणो । रण्णोधणं ॥ पक्षे ।
राअस्स ॥ टोणा ॥ ५१ ॥ राजन्शब्दात्परस्यटाइत्यस्यणाइत्यादेशोवाभवति ॥ राइणा । रण्णा । राएणकयं ॥
इर्जस्यणोणाङौ ॥ ५२ ॥ राजन्शब्दसंबंधिनोजकारस्यस्थानेणोणाङिषुपरेषुइकारोवाभवति ॥ राइणोचि
ट्ठंतिपेच्छआगओधणंवा ॥ राइणाकयं । राइम्मि ॥ पक्षे । राआणो । रण्णो । राअणा । राएण । राअम्मि ॥ इण
ममामा ॥ ५३ ॥ राजन्शब्दसंबंधिनोजकारस्यअमाऽऽम्भ्यांसहितस्यस्थानेइणमित्यादेशोवाभवति ॥ राइणंपे
च्छ । राइणंधणं ॥ पक्षेराईणं । राअं ॥ ईद्भिस्भ्यसाम्सुपि ॥ ५४ ॥ राजन्शब्दसंबंधिनोजकारस्यभिसादिषुप
रतोवाईकारोभवति ॥ भिस् ॥ राईहिं ॥ भ्यस् ॥ राईहिन्तो । राईसुन्तो ॥ आम् ॥ राईणं ॥ सुप् । राईसु ॥ पक्षे ।
राआणेहि इत्यादि ॥ आजस्यटाङसिङस्सुसणाणोष्वण् ॥ ५५ ॥ राजन्शब्दसंबंधिनआजइत्यवयवस्यटा

ङसिङस्सुणाणोइत्यादेशापन्नेषुपरेषुअण्वाभवति ॥ रण्णा । राइणा कयं ॥ रण्णो राईणोआगओधणंवा ॥ टाङ
सिङस्स्वितिकिं । राआणोचिट्ठंति पेच्छवा ॥ स्णाणेष्वितिकिं ॥ राएण । राआओ । रायस्स ॥ पुंस्यनआणोरा
जवच्च ॥ ५६ ॥ पुल्लिंगेवर्तमानस्यान्नंतस्यस्थानेआणइत्यादेशोवाभवति पक्षेयथादर्शनंराजवत्कार्यंभवति ॥
आणादेशेचातःसेर्डोरित्यादयःप्रवर्तंते ॥ पक्षेतुराज्ञः जश्शस्ङसिङसांणोटोणा इणममामाइतिप्रवर्त्तंते ॥ अप्पा
णो । अप्पाणा । अप्पाणं । अप्पाणे । अप्पाणेण । अप्पाणेहिं । अप्पाणाओ । अप्पाणासुन्तो । अप्पाण
स्स । अप्पाणाण । अप्पाणम्मि । अप्पाणेसु । अप्पाणकयं ॥ पक्षे राजवत् ॥ अप्पा । अप्पो । हेअप्पा । हेअप्प ।
अप्पाणो चिट्ठंति । अप्पाणो पेच्छ ॥ अप्पणा । अप्पेहिं । अप्पाणो । अप्पाओ । अप्पाउ । अप्पाहि । अप्पाहि
न्तो । अप्पा । अप्पासुन्तो ॥ अप्पणोधणं । अप्पाणं । अप्पे । अप्पेसु ॥ राआणो । राआणा । राआणं । राआ
णे । राआणेण । राआणेहिं । राआणाहिन्तो । राआणस्स । राआणाणं । राआणम्मि । राआणेसु ॥ पक्षे राआइ
त्यादि ॥ एवं जुवाणो । जुवाणजणो । जुआ ॥ बम्हाणो । बम्हा ॥ अद्धाणो । अद्धा ॥ उक्षन् । उच्छाणो । उच्छा ॥

गावाणो । गावा ॥ पूसाणो । पूसा ॥ तक्खाणो । तक्खा ॥ मुद्धाणो । मुद्धा ॥ श्वन् । साणो । सा । सुकर्मणःपश्य ।
सुकम्माणोपेच्छ । निएंकहसो सुकम्माणो ॥ पश्यतिकथंससुकर्मणइत्यर्थः ॥ पुंसीतिकिं ॥ शर्म । सम्मं ॥ आत्मन
ष्टोणिआएइआ ॥ ५७ ॥ आत्मनःपरस्याष्टायाःस्थाने णिआ एइआ इत्यादेशौवाभवतः ॥ अप्पणिआ । पा
उसेउवगअम्मि । अप्पणिआअवियड्डि खाणिआ । अप्पणइआ ॥ पक्षे अप्पाणेण ॥ अतःसर्वादेर्डेजसः ॥ ५८ ॥
सर्वादेरदंतात्परस्यजसःडितएआदेशोभवति ॥ सव्वे । अन्ने । जे । ते । के । एक्के । कअरे । इअरे । एए । अतइतिकिं ॥
सव्वाओरिद्धीओ ॥ जसीतिकिं ॥ सव्वस्स ॥ ङेःस्सिम्मित्थाः ॥ ५९ ॥ सर्वादेरकारात्परस्यङेःस्थाने स्सिम्मित्था
एतेआदेशाभवंति ॥ सव्वस्सि । सव्वम्मि । सव्वत्थ ॥ अन्नस्सि । अन्नम्मि । अन्नत्थ ॥ एवंसर्वत्र ॥ अतइत्येव ॥ अमु
म्मि ॥ नवाऽनिदमेतदोहिम् ॥ ६० ॥ इदम्एतद्वर्जितात्सर्वादेरदंतात्परस्यङेर्हिंमादेशोवाभवति ॥ सव्वहिं ।
अन्नहिं । कहिं । जहिं । तहिं ॥ बाहुलाधिकारात्कियत्तद्भ्यःस्त्रियामपि ॥ काहिं । जाहिं । ताहिं ॥ बाहुलकादेवकिंय
त्तदोऽस्यमामीतिङीर्नास्ति ॥ पक्षे । सव्वस्सि । सव्वम्मि । सव्वत्थ ॥ अन्नस्सि । अन्नम्मि । अन्नत्थइत्यादि ॥ स्त्रियांतु पक्षे ।

काए । कीए ॥ जाए । जीए।ताए । तीए ॥ इदमेतद्वर्जेनंकिं॥इमस्सिं एअस्सिं ॥ आमोडेंःसिम् ॥ ६१ ॥ सर्वादेरकारांतात्परस्याऽऽमोडेसुसिमित्यादेशोवाभवति॥सव्वेसिं।अन्नेसिं। अवरेसिं । इमेसिं । एएसिं । जेसिं । तेसिं । केसिं ॥ पक्षे । सव्वाण । अन्नाण । अवराण । इमाण । एआण । जाण । ताण । काण ॥ बाहुलकात्स्त्रियामपि ॥ सर्वासां । सव्वेसिं ॥ एवं अन्नेसिं । तेसिं ॥ किंतद्भ्यांडासः ॥ ६२ ॥ किंतद्भ्यांपरस्याऽऽमःस्थानेडासइत्यादेशोवा भवति ॥ कास । तास ॥ पक्षे । केसिं । तेसिं ॥ किंयत्तद्भ्योङसः ॥ ६३ ॥ एभ्यःपरस्यङसःस्थानेडासइत्यादेशोवाभवति ॥ ङसःस्सइत्यस्यापवादः ॥ पक्षेसोपिभवति॥कास।कस्स ॥ जास । जस्स ॥ तास । तस्स ॥ बहुलाधिकारात्किंतद्भ्यामाकारांताभ्यामपिडासादेशोवा ॥ कस्याधनं। कासधणं ॥ तस्याःधनं । तासधणं ॥ पक्षे। काए। ताए ॥ ईद्भ्यःस्सासे॥ ६४ ॥ किमादिभ्यईदंतेभ्यःपरस्यङसःस्थाने स्सा से इत्येतावादेशौवाभवतः ॥ टाङस्ङेरदादिदेद्वातुङसेरित्यस्यापवादः ॥ पक्षे अदादयोपि ॥ किस्सा । कीसे । कीअ । कीआ । कीइ । कीए ॥ जिस्सा । जीसे । जीअ । जीआ । जीइ । जीए॥तिस्सा। तीसे । तीअ।तीआ। तीइ।तीए॥ङेर्डाहेडालाइआकाले॥६५॥

किंयत्तद्भ्यःकालेभिधेयेङेःस्थाने आहे आला इतिडितौइआइतिचआदेशावाभवंति॥हिंस्सिम्मित्थानामपवादः॥ पक्षेतेपिभवंति ॥ काहे । काला । कइआ ॥ जाहे । जाला । जइआ ॥ ताहे । ताला । तइआ ॥ ताला जायंतिगुणा जालातेसहिअएहिं घेप्पंति ॥ रविकिरणाणुग्गहिआइंहुंतिकमलाइंकमलाइं ॥ पक्षे कहिं । कस्सिं । कम्मि । कत्थ ॥ ङसेम्हा ॥ ६६ ॥ किंयत्तद्भ्यःपरस्यङसेःस्थानेम्हाइत्यादेशोवाभवति ॥ कम्हा । जम्हा । तम्हा ॥ पक्षे काओ । जाओ । ताओ ॥ तदोडोः ॥ ६७ ॥ तदःपरस्यङसेर्डोइत्यादेशोवाभवति ॥ तो । तम्हा ॥ किमोडिणोडीसौ ॥ ६८ ॥ किमःपरस्यङसे डिणो डीस इत्यादेशौवाभवतः॥ किणो । कीस । कम्हा॥ इदमेतत्किंयत्तद्भ्यष्टोडिणा ॥ ६९ ॥ एभ्यःसर्वादिभ्योऽकारांतेभ्यःपरस्याष्टायाःस्थानेडित्इणाइत्यादेशोवाभवति ॥ इमिणा। इमेण ॥ एदिणा । एदेण ॥ किणा । केण ॥ जिणा । जेण ॥ तिणा । तेण ॥ तदोणःस्यादौक्वचित् ॥ ७० ॥ तदःस्थानेस्यादौपरेणआदेशोभवति क्वचिल्लक्ष्यानुसारेण ॥ णं पेच्छ । तंपश्येत्यर्थः ॥ सोअइअणंरहुवई।तमित्यर्थः॥स्त्रियामपि ॥ हत्थुन्नामिअमुही णंतिअडा ॥ तांत्रिजटेत्यर्थः ॥णेणभणिअं।तेनभणितमित्यर्थः॥तोणेणकरअ

लछिआ॥ तेनेत्यर्थः। भणिअंचणाए। तयेत्यर्थः॥ ऐहिंकअं। तैःकृतं॥ णाहिंकअं। ताभिःकृतमित्यर्थः॥ किमः
कस्त्रतसोश्च ॥ ७१ ॥ किमःकोभवतिस्यादौत्रतसोश्चपरयोः॥ को। के। कं। के।केण॥ त्र॥कत्थ॥ तस्। कओ।
कत्तो। कदो ॥ इदमइमः ॥ ७२ ॥ इदमः स्यादौपरेइमआदेशोभवति॥ इमो। इमे। इमं। इमे। इमेण॥
स्त्रियामपि इमा ॥ पुंस्त्रियोर्नवाऽयमिमिआसौ ॥ ७३ ॥ इदम्शब्दस्यसौपरे अयमितिपुल्लिंगे इमिआइति
स्त्रीलिंगेआदेशौवाभवतः॥अहवाअं कयकज्जो।इमिआवाणिअधूआ॥पक्षे इमो इमा॥स्सिंस्सयोरत् ७४॥
इदमःस्सिंस्सइत्येतयोःपरयोरद्भवतिवा॥ अस्सिं। अस्स॥ पक्षे इमादेशोपि। इमस्सिं। इमस्स॥ बहुलाधिका
रादन्यत्रापिभवति॥ एहि। एसु। आहि॥ एभिः एषु आभिरित्यर्थः॥ ङेर्मेनहः॥ ७५॥ इदमःकृतेमादेशा
त्परस्यङेःस्थानेमेनसह ह आदेशोवाभवति॥ इह॥ पक्षे इमस्सिं। इमम्मि॥ नत्थः॥ ७६॥ इदमःपरस्यङेः
स्सिंम्मित्थाइतिप्राप्तस्त्थोनभवति॥ इह। इमस्सिं। इमम्मि॥ णोम्शस्टाभिसि॥ ७७॥ इदमःस्थानेऽम्श
स्टाभिस्सुपरेषुणआदेशोवाभवति॥ णं पेच्छ। णे पेच्छ। णेण। णेहिंकअं॥ पक्षे इमं। इमे। इमेण। इमेहिं॥

अमेणम् ॥ ७८ ॥ इदमोऽमासहितस्यस्थानेइणम्इत्यादेशोवाभवति॥ इणंपेच्छ॥ पक्षे। इमं॥ क्लीबस्य
मेदमिणमोच ॥ ७९ ॥ नपुंसकलिंगेवर्तमानस्येदमःस्यम्भ्यांसहितस्यइदम्इणमोइणम्चनित्यमादेशाभवंति॥
इदं इणमो इणं धणं चिट्ठइ पेच्छवा ॥ किमःकिम् ॥ ८० ॥ किमःक्लीबेवर्तमानस्यस्यम्भ्यांसहकिम्भव
ति॥ किं कुलंतुह। किंकिंतेपडिहाइ ॥ वेदंतदेतदोङसाऽऽम्भ्यांसेसिमौ ॥ ८१ ॥ इदम्तद्एतद्इत्येतेषां
स्थानेङस्आम्इत्येताभ्यांसहयथासंख्यं सेसिम् इत्यादेशौवाभवतः॥ इदम्॥ सेसीलम्। सेगुणा॥ अस्यशीलंगु
णावेत्यर्थः॥ सिंउच्छाहो। एषामुत्साहइत्यर्थः॥ तद्॥ सेसीलं। तस्यतस्यावेत्यर्थः॥ सिंगुणा। तेषांतासांवेत्यर्थः॥
एतद्॥ सेअहिअं॥ एतस्याऽहितमित्यर्थः॥ सिंगुणा। सिंशीलं। एतेषांगुणाः शीलंवेत्यर्थः॥ पक्षे। इमस्स। इमे
सिं। इमाण॥ तस्स। तेसिं। ताण॥ एअस्स। एएसिं। एआण॥ इदंतदोरामापि सेआदेशंकेचिदिच्छंति॥ वैत
दोङसेस्त्तोत्ताहे ॥ ८२ ॥ एतदःपरस्यङसेःस्थानेत्तोत्ताहेइत्येतावादेशौवाभवतः॥ एत्तो। एत्ताहे॥ पक्षे। एआ
ओ। एआउ। एआहि। एआहिन्तो। एआ॥ त्थेचतस्यलुक् ॥ ८३ ॥ एतदस्त्थेपरेचकारात्तोत्ताहेइत्येतयोश्च

परयोरतस्यलुग्भवति ॥ एत्थ । एत्तो । एत्ताहे ॥ एरदीतौम्मौवा ॥ ८४ ॥ एतदएकारस्यङ्यादेशेम्मौपरेअदीतौ
वाभवतः ॥ अअम्मि । ईअम्मि ॥ पक्षे । एअम्मि ॥ वैसेणमिणमोसिना ॥ ८५ ॥ एतदःसिनासह एस इणम्
इणमो इत्यादेशावाभवंति॥ सव्वस्सविएसगई ॥ सव्वाणविपत्थिवाणएसमही । एससहाओच्चिअससहरस्स ॥ ए
ससिरं । इणं । इणमो ॥ पक्षे । एअं । एसा । एसो ॥ तदश्चतःसोऽक्लीबे ॥ ८६ ॥ तदएतदश्चतकारस्यसौपरेऽ
क्लीबेसोभवति ॥ सोपुरिसो । सामहिळा । एसोपिओ । एसामुद्धा ॥ सावित्येव । एएधन्ना ॥ ता एआओ महिला
ओ ॥ अक्लीबइतिकिं ॥ तं एअं धणं ॥ वाऽदसोदस्यहोनोदाम् ॥ ८७ ॥ अदसोदकारस्यसौपरेहआदेशो
वाभवति तस्मिंश्चकृतेअतःसेर्डोरित्योत्वं शेषंसंस्कृतवदित्यतिदेशादादित्याप् क्लीबेस्वरान्म्सेरितिमश्चनभवति ॥
अहपुरिसो । अहमहिला । अहवणं । अहमोहो परगुणलहुआई । अहणेहिअएण हसइ मारुअतणओ ॥ असा
वस्मान्हसतीत्यर्थः ॥ अहकमलमुही ॥ पक्षे उत्तरेणमुरादेशः ॥ अमूपुरिसो । अमूमहिला । अमुंवणं ॥ मुःस्या
दौ ॥ ८८ ॥ अदसोदस्यस्यादौपरेमुरादेशोभवति ॥ अमूपुरिसो । अमुणोपुरिसा । अमुंधणं । अमूइंधणाइं । अ ॥ ४७ ॥

मूणिवणाणि । अमूमाला । अमूउ अमूओ मालाओ । अमुणा । अमूहिं ॥ ङसि ॥ अमूओ । अमूउ । अमूहिन्तो ।
भ्यस् ॥ अमूहिन्तो । अमूसुन्तो ॥ ङस् ॥ अमुणो । अमुस्स ॥ आम् । अमूण ॥ ङि ॥ अमुम्मि ॥ सुप् ॥ अमूसु ॥ म्मावये
औवा ॥ ८९ ॥ अदसोऽन्त्यव्यंजनलुकिदकारान्तस्यस्थानेङ्यादेशेम्मौपरतः अय इअ इत्यादेशौवाभवतः ॥ अ
यम्मि । इअम्मि ॥ पक्षे अमुम्मि ॥ युष्मदस्तंतुंतुवंतुहतुमंसिना ॥ ९० ॥ युष्मदःसिनासह तं तुं तुवं तुह तुमं इ
त्येतेपंचादेशाभवंति॥ तं तुं तुवं तुह तुमं दिट्ठो ॥ भेतुब्भेउज्झेतुम्हतुय्हेउय्हेजसा ॥ ९१ ॥ युष्मदोजसासह
भे तुब्भे उज्झे तुम्ह तुय्हे उय्हे चिट्ठह ॥ ब्भोम्हज्झौवेतिवचनात् ॥ तुम्हे । तुज्झे । एवंचाष्टरूपाणि ॥ तंतुंतुमंतुवंतुह
तुमेतुएअमा ॥ ९२ ॥ युष्मदोऽमासहएतेसप्तादेशाभवंति ॥ तं तुं तुमं तुवं तुह तुमे तुए वंदामि ॥ वोतुब्भे
उज्झेतुय्हेउय्हेभेशसा ॥ ९३ ॥ युष्मदःशसासहएतेषडादेशाभवंति ॥ वो तुब्भे उज्झे भे ब्भोम्हज्झौवेतिव
चनात् ॥ तुम्हे तुज्झे तुय्हे उय्हे भे पेच्छामि ॥ भेदिदेतेतइतएतुमंतुमइतुमएतुमेतुमाइटा ॥ ९४ ॥
युष्मदष्टाइत्यनेनसहएतेएकादशादेशाभवंति ॥ भे दि दे ते तइ तए तुमं तुमइ तुमए तुमे तुमाइ जंपि

अं ॥ भेतुब्भेहिंउज्झेहिंउम्हेहिंतुय्हेहिंउय्हेहिंभिसा ॥ ९५ ॥ युष्मदोभिसासहएतेषडादेशाभवंति ॥
भे । तुब्भेहिं । ब्भोम्हज्झौवेतिवचनात् ॥ तुज्झेहिं तुम्हेहिं उज्झेहिं उम्हेहिं तुय्हेहिं । उय्हेहिं भुत्तं ॥ एवं
चाष्टरूप्यं ॥तइतुवतुमतुहतुब्भाङसौ ॥९६॥ युष्मदोङसौपंचम्येकवचनेपरतएतेषांपंचादेशाभवंति॥ ङसेस्तुत्तो
दोदुहिहिन्तोलुकोयथाप्राप्तमेव॥तइत्तो। तुवत्तो। तुमत्तो। तुहत्तो। तुब्भत्तो। ब्भोम्हज्झौवेतिवचनात्॥तुम्हत्तो। तुज्झ
त्तो॥एवंदोदुहिहिन्तोलुक्ष्वप्युदाहार्यं ॥ तत्तोइतितुत्वत्तइत्यस्यवलोपेसति ॥ तुय्हतुब्भतहिन्तोङसिना ॥९७॥
युष्मदोङसिनासहितस्यएतेत्रयआदेशाभवंति ॥ तुय्ह तुब्भ तहिन्तो आगओ ॥ ब्भोम्हज्झौवेतिवचनात् ॥ तुम्ह ।
तुज्झ । एवंचपंचरूपाणि ॥ तुब्भतुय्होय्होम्हाभ्यसि ॥ ९८ ॥ युष्मदोभ्यसिपरतएतेचत्वारआदेशाभवंति ॥
भ्यसस्तुयथाप्राप्तमेव ॥ तुब्भत्तो। तुय्हत्तो । उय्हत्तो। उम्हत्तो। ब्भोम्हज्झौवेतिवचनात् । तुम्हत्तो। तुज्झत्तो ॥ एवं
दोदुहिहिन्तोसुन्तेष्वप्युदाहार्यं ॥तइतुंतेतुम्हतुहतुहंतुवतुमतुमेतुमोतुमाइदिदेइएतुब्भोब्भोय्हाङसा॥९९॥
युष्मदोङसाषष्ठ्येकवचनेनसहितस्यैतेअष्टादशादेशाभवंति॥ तइ । तुं। ते । तुम्ह । तुह । तुहं । तुव । तुम । तुमे । तु

मो। तुमाइ । दि । दे । इ । ए । तुब्भ । उब्भ । उय्ह धणं ॥ ब्भोम्हज्झौवेतिवचनात्॥ तुम्ह । तुज्झ । उम्ह। उज्झ । एवं
चष्टाविंशतिरूपाणि ॥तुवोभेतुय्हतुब्भउब्भतुब्भाणतुवाणतुमाणतुहाणतुम्हाणआमा॥१००॥ युष्मदआ
मासहितस्यएतेआदेशाभवंति॥तुवो । भे । तुय्ह। तुब्भ।उब्भ। तुब्भाण। तुवाण।तुमाण।तुहाण।तुम्हाण । क्त्वास्या
देर्णस्वोर्वेत्यनुस्वारे॥ तुब्भाणं। तुवाणं । तुमाणं । तुहाणं । तुम्हाणं॥ब्भोम्हज्झौवेतिवचनात् । तुम्ह । तुज्झ । उम्ह।
उज्झ।तुम्हाण । तुम्हाणं । तुज्झाण । तुज्झाणं॥एवंचत्रयोविंशतिरूपाणि ॥ तुमेतुमएतुमाइतइतएङिना ॥ १ ॥
युष्मदोङिनासप्तम्येकवचनेनसहितस्यएतेपंचादेशाभवंति ॥ तुमे तुमए तुमाइ तइ तए ठिअं ॥ तुतुवतुमतुह
तुब्भाङौ ॥ २ ॥ युष्मदोङौपरतएतेपंचादेशाभवंति ॥ ङेस्तुयथाप्राप्तमेव ॥ तुम्मि । तुवम्मि । तुमम्मि । तुहम्मि।
तुब्भम्मि । ब्भोम्हज्झौवेतिवचनात् ॥ तुम्हम्मि । तुज्झम्मि इत्यादि ॥ सुपि ॥ ३ ॥ युष्मदःसुपिपरतः तु तुव तुम
तुह तुब्भाभवंति । तुसु । तुवेसु । तुमेसु । तुहेसु । तुब्भेसु । ब्भोम्हज्झौवेतिवचनात् । तुम्हेसु। तुज्झेसु ॥ केचित्तुसुप्ये
त्वविकल्पमिच्छंति तन्मते । तुवसु । तुमसु । तुहसु । तुब्भसु । तुम्हसु । तुज्झसु ॥ तुब्भस्यात्वमपीच्छंति इत्यन्ये ॥

तुब्भासु । तुम्हासु । तुज्झासु ॥ ब्भोम्हज्झौवा ॥ ४ ॥ युष्मदादेशेषुयोद्विरुक्तोभस्तस्यम्हज्झइत्येतावादेशौवान्
वतः ॥ पक्षेसएवास्ते । तथैवचोदाहृतं ॥ अस्मदोम्मिअम्मिअम्हिहंअहंअहयंसिना ॥ ५ ॥ अस्मदःसिना
सहैतेषडादेशाभवंति ॥ अज्जम्मिहासिआ मामित्तेण ॥ उन्नमअम्मि कुविआ ॥ अम्हि करेमि ॥ जेण हं वि
द्धा । किंपम्हुट्ठम्हि अहं ॥ अहयं कयप्पणामो ॥ अम्हअम्हेअम्होमोवयंभेजसा ॥ ६ ॥ अस्मदोजसासहैते
षडादेशाभवंति ॥ अम्ह अम्हे अम्हो मो वयं भे भणामो ॥ णेणंमिअम्मिअम्हमम्हमंममंमिममहंअ
मा ॥ ७ ॥ अस्मदोऽमासहैतेदशादेशाभवंति ॥ णे णं मि अम्मि अम्ह मम्ह मं ममं मिमं अहं पेच्छ ॥
॥ अम्हेअम्होअम्हणेशसा ॥ ८ ॥ अस्मदःशसासहएतेचत्वारआदेशाभवंति ॥ अम्हे अम्हो अम्ह णे पेच्छ ॥
॥ मिमेममंममएममाइमइमएमयाइणेटा ॥ ९ ॥ अस्मदष्टासहएतेनवादेशाभवंति मि मे ममं ममए म
माइ मइ मए मयाइ णे कयं ॥ अम्हेहिंअम्हाहिंअम्हअम्हेणेभिसा ॥ १० ॥ अस्मदोभिसासहएतेपंचा
देशाभवंति ॥ अम्हेहि अम्हाहि अम्ह अम्हे णे कयं ॥ मइममममहमज्झाङसौ ॥ ११ ॥ अस्मदोङसौपंचम्ये

कवचनेपरतएतेचत्वारआदेशाभवंति ॥ ङसेस्तुयथाप्राप्तमेव ॥ मइत्तो ममत्तो महत्तो मज्झत्तो आगओ ॥
मत्तोइतितुमत्तइत्यस्य ॥ एवंदोदुहिहिन्तोलुक्ष्वप्युदाहार्यं ॥ ममाम्हौभ्यसि ॥ १२ ॥ अस्मदोभ्यसिपरतोमम
अम्हइत्यादेशौभवतः ॥ भ्यसस्तुयथाप्राप्तं ॥ ममत्तो । अम्हत्तो । ममाहिन्तो । अम्हाहिन्तो । ममासुन्तो । अम्हासु
न्तो ॥ ममेसुन्तो । अम्हेसुन्तो ॥ मेमइममममहमहंमज्झमज्झंअम्हअम्हंङसा ॥ १३ ॥ अस्मदोङसाषष्ठ्ये
कवचनेनसहितस्यएतेनवादेशाभवंति ॥ मे मइ मम मह महं मज्झ मज्झं अम्ह अम्हं धणं ॥ णेणोम
ज्झअम्हअम्हंअम्हेअम्होअम्हाणममाणमहाणमज्झाणआमा ॥ १४ ॥ अस्मदआमासहितस्यएते
एकादशादेशाभवंति ॥ णे णो मज्झ अम्ह अम्हं अम्हे अम्हो अम्हाण ममाण महाण मज्झाण धणं ॥ क्त्वा
स्यादेर्णस्वोर्वेत्यनुस्वारे ॥ अम्हाणं । ममाणं । महाणं । मज्झाणं ॥ एवंचपंचदशरूपाणि ॥ मिमइममाइमएमे
ङिना ॥ १५ ॥ अस्मदोङिनासहितस्यएतेपंचआदेशाभवंति ॥ मि मइ ममाइ मए मे ठिअं ॥ अम्हममम
मज्झाङौ ॥ १६ ॥ अस्मदोङौपरतएतेचत्वारआदेशाभवंति ॥ ङेस्तुयथाप्राप्तम् ॥ अम्हम्मि ममम्मि महम्मि

5

मज्झम्मि ठिअं ॥ सुपि ॥ १७ ॥ अस्मदः सुपिपरेअम्हादयश्चत्वारआदेशाजवंति ॥ अम्हेसु । ममेसु । महेसु ।
मज्झेसु ॥ एत्वविकल्पमतेतु ॥ अम्हसु । ममसु । महसु । मज्झसु ॥ अम्हस्यात्वमपीच्छंत्यन्ये ॥ अम्हासु ॥ त्रेस्ती
तृतीयादौ ॥ १८ ॥ त्रेःस्थानेतीइत्यादेशोजवतितृतीयादौ॥ तीहिंकअं । तीहिन्तो आगओ । तिण्हं धणं । तीसु ठि
अं ॥ द्वेर्दोवे ॥ १९ ॥ द्विशब्दस्यतृतीयादौ दो वे इत्यादेशौवाजवतः॥ दोहि वेहि कयं । दोहिन्तो वेहिन्तो आग
ओ । दोण्हं वेण्हं धणं ॥ दोसु वेसु ठिअं ॥ दुवेदोण्णिवेण्णिचजश्शसा ॥ १२० ॥ जश्शस्भ्यांसहितस्यद्वेःस्थाने
दुवे दोण्णि वेण्णि इत्येतेआदेशाजवंति ॥ चकाराद्दोवेइत्येतौजवतः ॥ दुवे । दोण्णि वेण्णि दो वे ठिआपेच्छवा॥
ह्रस्वःसंयोगइतिह्रस्वत्वे दुण्णि विण्णि ॥ त्रेस्तिण्णिः॥ २१ ॥ जश्शस्भ्यांसहितस्यत्रेःस्थानेतिण्णिइत्यादेशो
भवति ॥ तिण्णिठिआपेच्छवा ॥ चतुरश्चत्तारोचउरोचत्तारि ॥ २२ ॥ चतुरशब्दस्यजश्शस्भ्यांसहितस्य चत्ता
रो चउरो चत्तारि इत्येतेआदेशाजवंति॥चत्तारो । चउरो । चत्तारि चिट्ठंति पेच्छवा ॥संख्याया आमोण्हण्हं॥२३॥
संख्याशब्दात्परस्याऽऽमो ण्ह ण्हं इत्यादेशौजवतः ॥ दोण्ह । तिण्ह । चउण्ह । पंचण्ह । छण्ह । सत्तण्ह । अट्ठण्ह ॥

एवं दोण्हं । तिण्हं । चउण्हं । पंचण्हं । छण्हं । सत्तण्हं । अट्ठण्हं । नवण्हं । दसण्हं । पण्णरसण्हं दिवसाणं ॥ अट्ठार
सण्हं समणसाहस्सीणं । कतीनां । कइण्हं ॥ बहुलाधिकाराद्विंशत्यादेर्नजवति ॥ शेषेऽदंतवत् ॥ २४ ॥ उपयुक्ता
दन्यःशेषस्तत्रस्यादिविधिरदंतवदतिदिश्यते ॥येष्वाकारायंतेषुपूर्वकार्याणिनोक्तानितेषु जश्शसोर्लुगित्यादीन्यदं
ताधिकारविहितानिकार्याणिजवंतीत्यर्थः ॥ तत्रजश्शसोर्लुगित्येतत्कार्यातिदेशः ॥ माला गिरी गुरू सही वहू
रेहंति पेच्छवा ॥ अमोस्येत्येतत्कार्यातिदेशः ॥ गिरिं गुरुं सहिं वहुं गामणिं खलपुं पेच्छ । टाआमोर्णइ
त्येतत्कार्यातिदेशः ॥ हाहाण कअं । मालाण गिरीण गुरूण सहीण वहूण धणं॥ टायास्तु । टोणा ॥ टाङस्ङेर
दादिदेद्वातुङसेरितिविधिरुक्तः ॥ जिसोहिहिंहिंइत्येतत्कार्यातिदेशः ॥ मालाहि गिरीहि गुरुहि सहीहि वहूहिक
अं । एवंसानुनासिकानुस्वारयोरपि ॥ ङसेस्तोदोदुहिहिन्तोलुकइत्येतत्कार्यातिदेशः ॥ मालाओ । मालाउ । माला
हिन्तो ॥ बुद्धीओ । बुद्धीउ । बुद्धीहिन्तो ॥ धेणूओ । धेणूउ । धेणूहिन्तो आगओ ॥ हिलुकौतुप्रतिषेत्स्येते ॥ भ्य
सस्तोदोदुहिहिन्तोसुन्तो इत्येतत्कार्यातिदेशः ॥ मालाहिन्तो । मालासुन्तो ॥ हिस्तुनिषेत्स्यते ॥ एवंगिरीहिन्तो इ

52

त्यादि ॥ ङसस्सइत्येतत्कार्यातिदेशः ॥ गिरिस्स । गुरुस्स । दहिस्स । महुस्स ॥ स्त्रियांतुटाङस्ङेरित्याद्युक्तं ॥ ङेम्मि ङेरित्येतत्कार्यातिदेशः ॥ गिरिम्मि । गुरुम्मि । दहिम्मि । महुम्मि ॥ ङेस्तुनिषेत्स्यते ॥ स्त्रियांतुटाङस्ङेरित्याद्युक्तं ॥ जश्शस्ङसित्तोदोद्वामिदीर्घइत्येतत्कार्यातिदेशः ॥ गिरी गुरू चिट्ठंति ॥ गिरीओ गुरूओ आगओ ॥ गिरीण गुरूण धणं ॥ भ्यसिवेत्येतत्कार्यातिदेशोनप्रवर्तते ॥ इदुतोदीर्घइतिनित्यंविधानात् ॥ टाणशस्येत् भिस्भ्यस्सुपीत्येतत्कार्यातिदेशस्तुनिषेत्स्यते ॥ नदीर्घोणो ॥ २५ ॥ इदुदंतयोरर्थाज्जश्शस्ङस्यादेशोणोइत्यस्मिन्परतोदीर्घोनभवति ॥ अग्गिणो । वाउणो ॥ णोइतिकिं । अग्गी । अग्गीओ ॥ ङसेर्लुक् ॥ २६ ॥ आकारादिभ्योऽदंतवत्प्राप्तो ङसेर्लुग्नभवति ॥ मालत्तो । मालाओ । मालाहिन्तो आगओ ॥ एवंअग्गीओ । वाऊओ इत्यादि ॥ भ्यसश्च हिः ॥ २७ ॥ आकारांतादिभ्योऽदंतवत्प्राप्तोभ्यसोङसेश्चहिर्नभवति ॥ मालाहिन्तो । मालासुन्तो ॥ एवंअग्गीहिन्तो इत्यादि ॥ मालाओ । मालाउ । मालाहिन्तो ॥ एवंअग्गीओइत्यादि ॥ ङेर्डे ॥ २८ ॥ आकारांतादिभ्यो दंतवत्प्राप्तोङेर्डेर्नभवति ॥ अग्गिम्मि । वाउम्मि । दहिम्मि । महुम्मि ॥ एत ॥ २९ ॥ आकारांतादीनामर्थात्

टाशस्भिस्भ्यस्सुपरतोऽदंतवदेत्वंनभवति ॥ हाहाणकअं । मालाओ पेच्छ ॥ मालाहिकअं । मालाहिन्तो । मालासुन्तो आगओ ॥ मालासुठिअं ॥ एवंअग्गिणो । वाउणो इत्यादि ॥ द्विवचनस्यबहुवचनं ॥ १३० ॥ सर्वासांविभक्तीनांस्यादीनांत्यादीनांचद्विवचनस्यस्थानेबहुवचनंभवति ॥ दोण्णिकुणंति । दुवेकुणंति । दोहिं । दोहिन्तो । दोसुन्तो । दोसु । हत्था । पाया । नअणा ॥ चतुर्थ्याःषष्ठी ॥ ३१ ॥ चतुर्थ्याःस्थानेषष्ठीभवति ॥ मुणिस्स । मुणीणदेइ ॥ नमोदेवस्स । देवाण ॥ तादर्थ्यङेर्वा ॥ ३२ ॥ तादर्थ्यैविहितस्यङेश्चतुर्थ्येकवचनस्यस्थानेषष्ठीवा भवति ॥ देवस्स । देवाय ॥ देवार्थमित्यर्थः ॥ ङेरितिकिं ॥ देवाण ॥ वधाड्डाइश्च ॥ ३३ ॥ वधशब्दात्परस्यतादर्थ्यङेर्डिदाइःषष्ठीचवाभवति ॥ वहाइ । वहस्स । वहाय ॥ वधार्थमित्यर्थः ॥ क्वचिद्द्वितीयादेः ॥ ३४ ॥ द्वितीयादीनां विभक्तीनांस्थानेषष्ठीभवतिक्वचित् ॥ सीमाधरस्सवंदे । तिस्सामुहस्सभरिमो ॥ अत्रद्वितीयायाःषष्ठी ॥ धणस्सलुद्धो ॥ धणेणलुब्धइत्यर्थः ॥ चिरस्समुक्का ॥ चिरेणमुक्तेत्यर्थः ॥ तेसिमेअमणाइण्णं ॥ तैरेतदनाचीर्णमित्यर्थः ॥ अत्रतृतीयायाः ॥ चोरस्सबीहइ । चोराद्बिभेतीत्यर्थः ॥ इअराइंजाण लहुअरकराइं । पायंतिमिल्लसहिआण । पदांतेनस

ह्नितेभ्यइतराणीति ॥ अत्रपंचम्याः ॥ पिठ्ठीएकेसनारो । अत्रसप्तम्याः ॥ द्वितीयातृतीययोःसप्तमी ॥ ३५ ॥
द्वितीयातृतीययोःस्थानेक्वचित्सप्तमीनवति॥गामेवसामि । नअरेनजानामि। अत्रद्वितीयायाः॥ मइवेवरिएमलिआ
इं॥तिसु तेसु अलंकिआपुहवी॥ अत्रतृतीयायाः ॥ पंचम्यास्तृतीयाच ॥ ३६ ॥ पंचम्याःस्थानेक्वचित्तृतीयास
प्तम्यौनवतः॥चोरेणबीहइ । चोराद्बिनेतीत्यर्थः॥ अंतेउरेरमिउमागओराआ । अंतःपुराद्रंत्वागतइत्यर्थः ॥ स
प्तम्याद्वितीया ॥ ३७ ॥ सप्तम्याःस्थानेक्वचिद्द्वितीयानवति। विज्जुज्जोअंनरइरत्तिं ॥ आर्षेतृतीयापिदृश्यते ॥
तेणं कालेणं। तेणं समयेणं। तस्मिन्कालेतस्मिन्समये इत्यर्थः॥ प्रथमार्थेपिद्वितीयादृश्यते ॥ चउवीसंपिजिणव
रा। चतुर्विंशतिरपिजिनवराइत्यर्थः॥क्यङोयलुक्॥ ३८॥ क्यङंतस्य क्यजंतस्य क्यषंतस्य वा संबंधिनोयस्य
लुग्नवति॥ गरुआइ । गरुआअइ॥ अगुरुर्गुरुर्भवति गुरुरिवाचरतिवेत्यर्थः॥क्यच्। दमदमाइ। दमदमाअइ॥ ॥ ५२ ॥
क्यष्॥ लोहिआइ । लोहिआअइ ॥ त्यादीनामाद्यत्रयस्याद्यस्येचेचौ ॥ ३९ ॥ त्यादीनांविनक्तीनांपरस्मैप
दानामात्मनेपदानांचसंबंधिनःप्रथमत्रयस्य यदाद्यंवचनंतस्यस्थानेइच्एच्इत्येतावादेशौभवतः॥ हसइ। हसए।

वेवइ। वेवए॥ चकारौइचेच्इत्यत्रविशेषणार्थौ॥ द्वितीयस्यसिसे ॥ ४० ॥ त्यादीनांपरस्मैपदानामात्मनेप 55
दानांचद्वितीयस्यत्रयस्यसंबंधिनआद्यस्यवचनस्यस्थाने सि से इत्येतावादेशौभवतः॥ हससि। हससे। वेवसि। वे
वसे ॥ तृतीयस्यमिः ॥ ४१ ॥ त्यादीनांपरस्मैपदानामात्मनेपदानांचतृतीयस्यत्रयस्याद्यस्यवचनस्यस्थानेमि
रादेशोभवति॥ हसामि। वेवामि ॥ बहुलाधिकारात् मिवस्थानीयस्यमेरिकारलोपश्च॥ बहुजाणअरूसिओसक्कं ।
शक्नोमीत्यर्थः॥ नमरं। नम्रियेइत्यर्थः ॥ बहुष्वाद्यस्यन्तिन्तेइरे॥ ४२ ॥ त्यादीनांपरस्मैपदानामात्मनेप
दानांचआद्यत्रयसंबंधिनोबहुषुवर्तमानस्यवचनस्यस्थाने न्तिन्ते इरे इत्यादेशाभवंति॥ हसंति। वेवंति। हसिज्जंति।
रमिज्जंति। गज्जंतेखेमेहा। बीहंतेरक्खसाणंच। उप्पज्जंतेकविहियअसाअरेकवरअणाइं। दोण्णिविनपहुप्पिरेबा
हू॥ नप्रनवतइत्यर्थः॥ विच्छुहिरे। विक्षुभ्यंतीत्यर्थः॥ क्वचिदिरेएकत्वेपि। सूसइरेगामचिक्खल्लो॥ शुष्यतीत्यर्थः॥
॥ मध्यमस्येत्थाहचौ ॥ ४३ ॥त्यादीनांपरस्मैपदात्मनेपदानांमध्यमस्यत्रयस्यबहुषुवर्तमानस्यवचनस्यस्थाने इ
त्था हच् इत्येतावादेशौभवतः॥ हसित्था। हसह॥ वेवित्था। वेविह ॥ बाहुलकादित्थाऽन्यत्रापि॥ यद्यत्तेरोचते। जं

जंतेरोइत्था ॥ ह्चितिचकारइहहचोहस्येत्यत्रविशेषणार्थः ॥ तृतीयस्यमोमुमाः ॥ ४४ ॥ त्यादीनांपरस्मैपदा
त्मनेपदानांतृतीयस्यत्रयस्यसंबंधिनोबहुषुवर्तमानस्यस्थाने मो मु म इत्यादेशाभवंति॥हसामो। हसामु।हसाम॥तु
वरामो । तुवरामु । तुवराम ॥ अतएवैच्से ॥४५॥ त्यादेःस्थानेयौ एच् से इत्येतावादेशावुक्तौतावकारांतादेव
भवतोनान्यस्मात् ॥ हसए । हससे ॥ तुवरए । तुवरसे ॥ करए । करसे ॥ अतइतिकिं ॥ ठाइ । ठासि ॥ वसुआइ ।
वसुआसि ॥ होइ । होसि ॥ एवकारोऽकारांतादेच्सेएवभवतइतिविपरीतावधारणनिषेधार्थः ॥ तेनाकारांतादिच्
सिइत्येतावपिसिद्धौ ॥ हसइ । हससि ॥ वेवइ । वेवसि ॥ सिनाऽस्तेःसिः ॥ ४६ ॥ सिनाद्वितीयत्रिकादेशेनस
हास्तेःसिरादेशोभवति ॥ निठ्ठुरोजंसि ॥ सिनेतिकिं॥ सेआदेशेसति अत्थितुमं ॥ मिमोमैर्म्हिम्होम्हावा॥४७॥
अस्तेर्धातोःस्थानेमिमोमइत्यादेशैःसहयथासंख्यं म्हि म्हो म्ह इत्यादेशाभवंति॥एसम्हि । एषोस्मीत्यर्थः॥गयम्हो ।
गयम्ह ॥ मुकारस्याग्रहणादप्रयोगएवतस्येत्यवसीयते ॥ पक्षे । अत्थिअहं । अत्थिअम्हे । अत्थिअम्हो ॥ ननुचसि
द्धावस्थायां पक्ष्मश्मष्मस्मह्मांम्हइत्यनेनम्हादेशेम्होइतिसिध्यति ॥ सत्यं ॥ किंतुविभक्तिविधौप्रायःसाध्यमानाव

स्थांगीक्रियते॥अन्यथावच्छेण । वच्छेसु । सव्वेजेतेकेइत्याद्यर्थसूत्राण्यनारंभणीयानिस्युः॥अत्थिस्त्यादिना॥४८॥
अस्तेःस्थानेत्यादिभिःसहअत्थिइत्यादेशोभवति ॥ अत्थिसो । अत्थिते । अत्थिअम्हे ॥ णेरदेदावावे ॥ ४९ ॥
णेःस्थाने अत् एत् आव आवे एतेचत्वारआदेशाभवंति॥दरिसइ। कारेइ । करावइ।करावेइ॥हासेइ।हसावइ । ह
सावेइ ॥ उवसामेइ । उवसमावइ । उवसमावेइ ॥ बहुलाधिकारात् क्वचिदेन्नास्ति॥ जाणावेइ ॥ क्वचिदावेनास्ति॥
पाएइ । भावेइ ॥ गुर्वादेरविर्वा ॥ १५० ॥ गुर्वादेर्णेःस्थानेअविइत्यादेशोवाभवति ॥ शोषितं । सोसविअं ।सो
सिअं ॥ तोषितं । तोसविअं । तोसिअं ॥ भ्रमेराडोवा ॥ ५१ ॥ ॥ भ्रमेःपरस्यणेराडइत्यादेशोवाभवति ॥ भमा
डइ । भमाडेइ ॥ पक्षे । भामेइ । भमावइ । भमावेइ ॥ लुगावीक्तभावकर्मसु ॥५२॥ णेःस्थानेलुगाविइत्यादेशौ
भवतः क्तेभावकर्मविहितेचप्रत्ययेपरतः ॥ कारिअं । कराविअं ॥ हासिअं । हसाविअं ॥ खामिअं । खमाविअं ॥
भावकर्मणोः ॥ कारीअइ । करावीअइ । कारिज्जइ । कराविज्जइ॥हासीअइ । हसावीअइ।हासिज्जइ। हसाविज्ज
इ ॥ अदेल्लुक्यादेरतआः ॥ ५३ ॥ णेरदेल्लोपेचकृतेचआदेरकारस्यआभवति ॥ अति ॥ पाडइ । मारइ ॥ एति ।

कारेइ । खामेइ ॥ लुकि । कारिअं । खामिअं । कारीअइ । खामीअइ । कारिज्जइ । खामिज्जइ ॥ अदेल्लुकीतिकिं॥
करावीअं । करावीअइ । कराविज्जइ ॥ आदेरितिकिं ॥ संगामेइ ॥ इहव्यवहितस्यमाभूत् ॥ कारिअं ॥ इहांत्य
स्यमाभूत् ॥ अतइतिकिं ॥ दूसेइ ॥ केचित्तुआवेआव्यादेशयोरप्यादेरतआत्वमिच्छंति ॥ कारावेइ । हासाविओ
जणो सामलीए ॥ मौवा ॥ ५४ ॥ अतआइतिवर्तते ॥ अदंताद्धातोर्मौपरेअतआत्वंवाभवति ॥ हसामि । ह
समि ॥ जाणामि । जाणमि ॥ लिहामि । लिहमि ॥ अतइत्येव । होमि ॥ इच्चमोमुमेवा ॥ ५५ ॥ अकारांताद्धा
तोःपरेषुमोमुमेषुअतइत्वंचकारादात्वंवाभवति ॥ भणिमो । भणामो । भणिमु । भणामु । भणिम । भणाम । पक्षे
। भणमो । भणमु । भणम ॥ वर्त्तमानापंचमीशतृषुवाइत्येत्वेतुभणेमो । भणेमु । भणेम ॥ अतइत्येव ॥ ठामो ।
होमो॥क्ते॥५६॥ क्तेपरतोऽतइत्वंभवति ॥ हसिअं । पढिअं । नविअं । हासिअं । पाढिअं॥ गयंनयमित्यादिषुतुसि
द्धावस्थापेक्षणात् ॥ अतइत्येव ॥ झायं । लुअं । हूअं ॥ एच्चक्त्वातुम्तव्यभविष्यत्सु ॥५७॥ क्त्वातुम्तव्येषु
भविष्यत्कालविहितेचप्रत्ययेपरतोऽतएकारश्चकारादिकारश्चभवति ॥ क्त्वा । हसेऊण । हसिऊण ॥ तुम् ।

हसेउं । हसिउं॥तव्य। हसेअव्वं । हसिअव्वं॥भविष्यत् ।हसेहिइ।हसिहिइ॥अतइत्येव॥काऊण ॥ वर्तमानापंचमीशतृ
षुवा ॥ ५८ ॥ वर्तमानापंचमीशतृषुपरतअकारस्यस्थानेएकारोवाभवति ॥ वर्तमाना ॥ हसेइ । हसइ ॥ हसेम ।
हसिम ॥ हसेमु । हसिमु ॥ पंचमी ॥ हसेउ । हसउ ॥ सुणेउ । सुणउ ॥ शतृ॥हसेंतो । हसंतो ॥ क्वचिन्नभवति ॥ जय
इ ॥ क्वचिदात्वमपि ॥ सुणाओ ॥ज्जाज्जे ॥ ५९ ॥ ज्जाज्जइत्यादेशयोःपरयोरकारस्यैकारोभवति ॥ हसेज्जा ।
हसेज्ज ॥ अतइत्येव ॥ होज्जा । होज्ज ॥ ईअइज्जौक्यस्य ॥ १६० ॥ चिजिप्रभृतीनांभावकर्मविधिंवक्ष्या
मः ॥ येषांतुनवक्ष्यतेतेषांसंस्कृतातिदेशात्प्राप्तस्यक्यस्यस्थाने ईअ इज्ज इत्येतावादेशौभवतः ॥ हसीअइ । हसि
ज्जइ । हसीअंतो । हसिज्जंतो । हसीअमाणो । हसिज्जमाणो । पढीअइ । पढिज्जइ । होईअइ । होइज्जइ ॥ ब
हुलाधिकारात्क्वचित्क्योपिविकल्पेनभवति ॥ मएनवेज्ज । मएनविज्जेज्ज । तेणलहेज्ज । तेणलहिज्जेज्ज । तेण
अच्छेज्ज । तेणअच्छीअइ ॥ दृशिवचेर्डीसडुच्चं ॥ ६१ ॥ दृशेर्वचेश्चपरस्यक्यस्यस्थानेयथासंख्यं डीस डुच्च इ
त्यादेशौभवतः ॥ ईअइज्जापवादः ॥ दीसइ । वुच्चइ ॥ सीहीहीअभूतार्थस्य ॥ ६२ ॥ भूतेऽर्थेविहितोऽद्यत

न्यादि:प्रत्ययोभूतार्थस्तस्यस्थाने सी ही हीअ इत्यादेशाभवंति ॥ उत्तरत्रव्यंजनादीअविधानात्स्वरांतादेवायंवि
धिः ॥ कासी । काही । काहीअ ॥ अकार्षीत् । अकरोत् । चकारवेत्यर्थः ॥ एवंठासी । ठाही । ठाहीअ ॥ आर्षेदेविं
दोइणमब्बवीइत्यादौसिद्धावस्थाश्रवणात् ह्यस्तन्याःप्रयोगः ॥ व्यंजनादीअः ॥६३॥ व्यंजनांताद्धातोःपरस्य
भूतार्थस्याद्यतन्यादिप्रत्ययस्यईअइत्यादेशोभवति ॥ हुवीअ ॥ अभूत् । अभवत् । बभूवेत्यर्थः ॥ एवंअच्छीअ ।आ
सिष्ट । आस्त । आसांचक्रेवा ॥ गेण्हीअ । अग्रहीत् । अगृण्हात् । जग्राहवा ॥ तेनास्तेरास्यहेसी ॥ ६४ ॥ अ
स्तेर्धातोस्तेनभूतार्थेनप्रत्ययेनसह आसि अहेसि इत्यादेशौभवतः॥ आसिसो तुमं अहंवा । जे आसि । येआसन्नि
त्यर्थः ॥ एवंअहेसि ॥ ज्जात्सप्तम्याइर्वा ॥६५॥ सप्तम्यादेशात्ज्जात्परइर्वाभवति ॥ भवेत् ॥होज्जइ । होज्ज॥
॥ भविष्यतिहिरादिः ॥ ६६ ॥ भविष्यदर्थविहितेप्रत्ययेपरेतस्यैवादेर्हिःप्रयोक्तव्यः ॥ होहिइ ॥ भविष्यति । भ ॥ ५५ ॥
वितावेत्यर्थः॥ एवंहोहिसि। होहिसि । होहित्था। हसिहिइ । काहिइ ॥ मिमोमुमेस्साहानवा ॥ ६७ ॥ भविष्य
त्यर्थेमिमोमुमेषुतृतीयत्रिकादेशेषुपरेषुतेषामेवादी स्सा हा इत्येतौवाप्रयोक्तव्यौ॥हेरपवादौ ॥ पक्षेहिरपि ॥ होस्सा

मि । होहामि ॥ होस्सामो । होहामो ॥ होस्सामु । होहामु ॥ होस्साम । होहाम ॥ पक्षे । होहिमि । होहिमो । होहि
मु । होहिम ॥ क्वचित्तुहानभवति ॥ हसिस्सामो । हसिहिमो ॥ मोमुमानांहिस्साहित्था ॥ ६८ ॥ धातोःपरौभवि
ष्यतिकालेमोमुमानांस्थाने हिस्सा हित्था इत्येतौवाप्रयोक्तव्यौ ॥ होहिस्सा । होहित्था । हसिहिस्सा । हसिहित्था ।
पक्षे होहिमो । होस्सामो । होहामोइत्यादि ॥ मेस्सं ॥ ६९ ॥ धातोःपरेभविष्यतिकालेम्यादेशस्यस्थानेस्संवा
प्रयोक्तव्यः ॥ होस्सं । हसिस्सं । कित्तइस्सं ॥ पक्षे होहिमि । होस्सामि । होहामि । कित्तइहिमि ॥ कृदोहं॥१७०॥
करोतेर्ददातेश्चपरोभविष्यतिविहितस्यम्यादेशस्यस्थानेहंवाप्रयोक्तव्यः॥ काहं । दाहं ॥ करिष्यामि दास्यामीत्यर्थः॥
पक्षे काहिमि दाहिमि इत्यादि ॥ श्रुगमिरुदिविदिदृशिमुचिवचिछिदिभिदिभुजां सोच्छं गच्छं रोच्छं वेच्छं
दच्छं मोच्छं वच्छं छेच्छं भेच्छं भोच्छं ॥ ७१ ॥ श्वादीनांधातूनांभविष्यद्विहितम्यंतानांस्थानेसोच्छमित्याद
योवानिपात्यंते ॥ सोच्छं । श्रोष्यामि ॥ गच्छं । गमिष्यामि ॥ संगच्छं । संगंस्ये ॥ रोच्छं । रोदिष्यामि ॥ विदज्ञाने ।वे
च्छं । वेदिष्यामि ॥ दच्छं । द्रक्ष्यामि ॥ मोच्छं । मोक्ष्यामि ॥ वच्छं । वक्ष्यामि ॥ छेच्छं । छेत्स्यामि ॥ भेच्छं । भेत्स्या

मि ॥ नोच्छं । नोक्ष्ये ॥ सोच्छादयइजादिषुहिलुक्चवा ॥ ७२ ॥ श्रवादीनांस्थानेइजादिषुभविष्यदादिषुयथासं
ख्यंसोच्छादयोभवंति ॥ तेएवादेशान्त्यस्वराद्यवयववर्ज्याइत्यर्थः ॥ हिलुक्चवाभवति ॥ सोच्छिइ ॥ पक्षे । सोच्छिहिइ ।
एवंसोच्छिंति । सोच्छिहिंति । सोच्छिसि । सोच्छिहिसि । सोच्छित्था । सोच्छिहित्था । सोच्छिह । सोच्छिहिह । सोच्छिमि ।
सोच्छिहिमि । सोच्छिस्सामि । सोच्छिहामि । सोच्छिस्सं । सोच्छं । सोच्छिमो । सोच्छिहिमो । सोच्छिस्सामो । सो
च्छिहामो । सोच्छिहिस्सा । सोच्छिहित्था ॥ एवंमुमयोरपि ॥ गच्छिइ । गच्छिहिइ । गच्छिंति । गच्छिहिन्ति । गच्छिसि ।
गच्छिहिसि । गच्छित्था । गच्छिहित्था । गच्छिह । गच्छिहिह । गच्छिमि । गच्छिहिमि । गच्छिस्सामि । गच्छिहामि । गच्छिस्सं ।
गच्छं । गच्छिमो । गच्छिहिमो । गच्छिस्सामो । गच्छिहामो । गच्छिहिस्सा । गच्छिहित्था ॥ एवंमुमयोरपि ॥ एवंरु
दादीनामप्युदाहार्यं ॥ दुसुमुविध्यादिष्वेकस्मिंस्त्रयाणां ॥ ७३ ॥ विध्यादिष्वर्थेषूत्पन्नानामनेकत्वेर्थेवर्तमाना
नांत्रयाणामपित्रिकाणांस्थानेयथासंख्यं दु सु मु इत्येतेआदेशाभवंति ॥ हसउसा । हससु तुमं । हसामु अहं ॥ पेच्छ
उ । पेच्छसु । । पेच्छामु ॥ दकारोच्चारणंभाषांतरार्थं ॥ सोर्हिर्वा ॥ ७४ ॥ पूर्वसूत्रविहितस्यसोःस्थानेहिरादेशोवाभ

॥ ५६ ॥

वति ॥ देहि । देसु ॥ अतइज्जस्विज्जहीज्जेलुकोवा ॥ ७५ ॥ अकारात्परस्यसोः इज्जसु इज्जहि इज्जे इत्ये
तेलुकआदेशावाभवंति ॥ हसेज्जसु । हसिज्जहि । हसेज्ज ॥ हस ॥ पक्षे । हससु ॥ अतइतिकिं ॥ होसु । ठाहि ॥
॥ बहुषुन्तुहमो ॥ ७६ ॥ विध्यादिषूत्पन्नानांबहुष्वर्थेषुवर्तमानानांत्रयाणांत्रिकाणांस्थानेयथासंख्यं न्तुहमो
इत्येतेआदेशाभवंति ॥ न्तु । हसन्तु । हसंतु हसेयुर्वा ॥ ह ॥ हसह । हसत । हसेतवा ॥ मो ॥ हसामो हसाम ।
हसेमवा ॥ एवंतुवरन्तु । तुवरह । तुवरामो ॥ वर्तमानाभविष्यंत्योश्चज्जज्जावा ॥ ७७ ॥ वर्तमानायाभवि
ष्यंत्याश्चविध्यादिषुचविहितस्यप्रत्ययस्यस्थाने ज्ज ज्जा इत्येतावादेशौवाभवतः ॥ पक्षेयथाप्राप्तं ॥ वर्तमाना ॥ ह
सेज्ज । हसेज्जा । पढेज्ज । पढेज्जा ॥ सुणेज्ज । सुणेज्जा ॥ पक्षे । सहइ । पढइ । सुणइ ॥ भविष्यंती । पढेज्ज । पढेज्जा
पक्षे । पढिहिइ ॥ विध्यादिषुहसेज्ज । हसेज्जा । हसतु । हसेद्वाइत्यर्थः ॥ पक्षे । हसउ ॥ एवंसर्वत्र ॥ यथातृतीयत्रये । अ
इवाएज्जा । अइवायाविज्जा । नसमणुजाणामि । नसमणुजाणेज्जावा ॥ अन्येत्वन्यासामपीच्छंति । होज्जा ॥ भवति ।
भवेत् । भवतु । अभवत् । अभूत् । बभूव । भूयात् । भविता । भविष्यति । अभविष्यद्वेत्यर्थः ॥ मध्येचस्वरांताद्वा ॥ ७८ ॥

स्वरांताद्धातोःप्रकृतिप्रत्यययोर्मध्येचकारात्प्रत्ययानांचस्थाने ज्ज ज्जाइत्येतौवाभवतः॥वर्तमानाभविष्यंत्योर्विध्या
दिषुच ॥ वर्तमाना ॥ होज्जइ । होज्जाइ । होज्ज । होज्जा ॥ पक्षे । होइ ॥ एवं होज्जसि । होज्जासि । होज्ज । हो
ज्जा । होसि इत्यादि ॥ भविष्यंती ॥ होज्जहिइ । होज्जाहिइ । होज्ज । होज्जा ॥ पक्षे । होहिइ । एवंहोज्जहिसि ।
होज्जाहिसि । होज्ज । होज्जा । होहिसि । होज्जिहिमि । होज्जाहिमि । होज्जस्सामि । होज्जहामि । होज्जस्सं ।
होज्ज । होज्जा इत्यादि ॥ विध्यादिषु । होज्जउ ॥ होज्जाउ । होज्ज । होज्जा । भवतु भवेद्वेत्यर्थः ॥ पक्षे । होउ ॥
स्वरांतादितिकिं ॥ हसेज्ज । हसेज्जा । तुरवेज्ज । तुरवेज्जा ॥ क्रियाऽतिपत्तेः ॥७९ ॥ क्रियातिपत्तेःस्थानेज्ज
ज्जावादेशौभवतः ॥ होज्ज । होज्जा । अभविष्यदित्यर्थः ॥ जइहोज्जवण्णणिज्जो ॥ न्तमाणौ ॥ १८० ॥ क्रि
यातिपत्तेःस्थानेन्तमाणौआदेशौभवतः ॥ होन्तो । होमाणो । अभविष्यदित्यर्थः ॥ हरिणट्ठाणेहरिणंक जइसिहरि
णाहिवंनिवेसंतो ॥ नहसंतोच्चिअतोराहुपरिहवंसेजिअंतस्स ॥ शत्रानशः ॥ ८१ ॥ शतृआनइत्येतयोःप्रत्येकं
न्त माण इत्येतावादेशौभवतः ॥ शतृ ॥ हसन्तो । हसमाणो ॥ आनश ॥ वेवन्तो । वेवमाणो॥ईचस्त्रियां ॥८२॥

स्त्रियांवर्तमानयोःशत्रानशोःस्थानेईचकारात्न्तमाणौचभवतः॥हसई । हसन्ती । हसमाणी । वेवई । वेवन्ती । वेव
माणी ॥ ॥ इत्याचार्यश्रीहेमचंद्रविरचितायांसिद्धहेमचंद्राभिधानस्वोपज्ञशब्दानुशासनवृत्तौ अष्टमा
ध्यायस्यतृतीयःपादःसमाप्तः ॥ ३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
ऊर्ध्वंस्वर्गनिकेतनादपितलेपातालमूलादपित्वत्कीर्तिर्भ्रमतिक्षितीश्वरमणेपारेपयोधेरपि ॥ तेनास्याःप्रमदास्वभाव
सुलभैरुच्चावचैश्चापलैस्तेवाचंयमवृत्तयोपिमुनयोमौनव्रतंत्याजिताः ॥ १ ॥ ॥ इदितोवा ॥१ ॥ सूत्रेयेइदितोधा
तवोवक्ष्यंतेतेषांयेआदेशास्तेविकल्पेनभवंतीतिवेदितव्यं ॥ तत्रैवोदाह्रियते ॥ कथेर्वज्जरपज्जरोप्पालपिसुण
संघबोल्लचवजम्पसीससाहाः ॥ २ ॥ कथेर्धातोर्वज्जरादयोदशादेशाभवंति ॥ वज्जरइ । पज्जरइ । उप्पालइ।
पिसुणइ । संघइ । बोल्लइ । चवइ । जम्पइ । सीसइ । साहइ ॥ उब्बुक्कइ इतितूत्पूर्वस्य बुक्कभषणइत्यस्य ॥ प
क्षे । कहइ ॥ एतेचान्यैर्देशीषुपठिताअपिअस्माभिर्धात्वादेशीकृताविविधेषुप्रत्ययेषुप्रतिष्ठिताइति ॥ तथाच । व
ज्जरिओकथितः । वज्जरिऊण कथयित्त्वा । वज्जरणं कथनं । वज्जरंतो कथयन् । वज्जरिअव्वं । कथयितव्यमिति

रूपसहस्राणिसिध्यंति ॥ संस्कृतधातुवच्चप्रत्ययलोपागमादिविधिः ॥ दुःखेणिव्वरः ॥ ३ ॥ दुःखविषयस्यकथे
र्णिव्वरइत्यादेशोवाभवति ॥ णिव्वरइ। दुःखंकथयतीत्यर्थः ॥ जुगुप्सेर्झुणदुगुच्छदुगुंछाः ॥ ४ ॥ जुगुप्सेरेते
त्रयआदेशाभवंतिवा ॥ झुणइ। दुगुच्छइ। दुगुंछइ ॥ पक्षे। जुगुच्छइ ॥ गलोपे। दुउच्छइ। दुउंछइ। जुउच्छइ ॥
॥ बुभुक्षुवीजोर्णीरववोज्जौ ॥ ५ ॥ बुभुक्षेराचारक्विबंतस्यचवीजेर्यथासंख्यमेतावादेशौवाभवतः ॥ णीरवइ।
बुहुक्खइ। वोज्जइ। वीजइ ॥ ध्यागोर्झागौ ॥ ६ ॥ अनयोर्यथासंख्यंझागाइत्यादेशौभवतः॥झाइ। झाअइ।
णिज्झाइ॥ णिज्झाअइ। निपूर्वोदर्शनार्थः ॥ गाइ। गाअइ। झाणं। गाणं ॥ ज्ञोजाणमुणौ ॥ ७ ॥ जानातेर्जाण
मुणइत्यादेशौभवतः ॥ जाणइ। मुणइ ॥ बहुलाधिकारात्क्वचिद्विकल्पः ॥ जाणिअणाअं। जाणिऊण। णाऊण।
जाणणं। णाणं। णणइइतितुमन्यतेः॥ उदोध्मोधुमा ॥ ८ ॥ उदःपरस्यध्माधातोर्धुमाइत्यादेशोभवति ॥
उद्धुमाइ ॥ श्रदोधोदहः ॥ ९ ॥ श्रदःपरस्यदधातेर्दहइत्यादेशोभवति ॥ सद्दहइ। सद्दहमाणोजीवो ॥ पिबेः
पिज्जडुल्लपट्टघोट्टाः ॥ १० ॥ पिबतेरेतेचत्वारआदेशावाभवंति ॥ पिज्जइ। डुल्लइ। पट्टइ। घोट्टइ। पिअइ

॥ उद्वातेरोरुम्मावसुआ ॥ ११ ॥ उत्पूर्वस्यवाते रोरुम्मा वसुआ इत्यादेशौवाभवतः॥ओरुम्माइ। वसुआइ।
उव्वाइ ॥ निद्रातेरोहीरोङ्घौ ॥ १२ ॥निपूर्वस्यद्रातेः ओहीर ओङ्घ इत्येतावादेशौवाभवतः ॥ ओहीरइ। ओ
ङ्घइ। निद्दाइ ॥ आघ्रेराइग्घः ॥ १३ ॥ आजिघ्रतेराइग्घइत्यादेशोवाभवति ॥ आइग्घइ। आग्घाअइ ॥
स्नातेरब्भुत्तः ॥ १४ ॥ स्नातेरब्भुत्तइत्यादेशोवाभवति ॥ अब्भुत्तइ। ण्हाइ ॥ समःस्त्यःखा ॥ १५ ॥ सम्
पूर्वस्यस्त्यायतेःखाइत्यादेशोवाभवति ॥ संखाइ। संखाइयं ॥ स्थष्ठाथक्कचिट्ठनिरप्पाः ॥ १६ ॥ तिष्ठतेरेतेचत्वा
रआदेशाभवंति ॥ ठाइ। ठाअइ। ठाणं। पट्ठिओ। उट्ठिओ। पट्ठाविओ। उट्ठाविओ। थक्कइ। चिट्ठइ। चिट्ठिऊ
ण। निरप्पइ ॥ बहुलाधिकारात्क्वचिन्नभवति ॥ थिअं। थाणं। पत्थिओ। थाऊण ॥ उदष्ठकुक्कुरौ ॥ १७ ॥ उदः
परस्यतिष्ठतेः ठ कुक्कुर इत्यादेशौभवतः ॥ उट्ठइ। उक्कुक्कुरइ ॥ म्लेर्वापव्वायौ ॥ १८ ॥ म्लायते र्वा पव्वाय इत्या
देशौवाभवतः ॥ वाइ। पव्वायइ। मिलाइ ॥ निर्मोनिम्माणनिम्मवौ ॥ १९ ॥ निर्पूर्वस्यमिमीतेरेतावादे
शौभवतः ॥ निम्माणइ। निम्मवइ ॥ क्षेर्णिज्झरोवा ॥ २० ॥ क्षयतेर्णिज्झरइत्यादेशोवाभवति ॥ णिज्झ

रइ । पक्षेझिज्जइ ॥ छदेर्णेणुमनूमसन्नूमढक्कौम्वालपव्वालाः॥२१॥छदेर्ण्यंतस्यैतेषडादेशावाभवंति॥णुमइ। नूमइ॥णत्वे णूमइ।सन्नूमइ। ढक्कइ। ओम्वालइ। पव्वालइ।छाअइ ॥ निवृपत्योर्णिहोडः ॥ २२ ॥निवृगःपते श्चण्यंतस्यणिहोडइत्यादेशोवाभवति॥णिहोडइ ॥ पक्षे निवारेइ । पाडेइ ॥ दूडोदूमः ॥२३ ॥ दूडोण्यंतस्यदूम इत्यादेशोभवति ॥ दूमेइमज्झहिअअं ॥ धवलेर्दुमः ॥ २४ ॥ धवलयतेर्ण्यंतस्यदुमादेशोवाभवति॥ दुमइ। धवलइ ॥स्वराणांस्वराबहुलमितिदीर्घत्वमपि ॥ दूमिअं। धवलितमित्यर्थः॥ तूलेरोहामः ॥ २५ ॥ तूलेर्ण्यंत स्यओहामइत्यादेशोवाभवति॥ ओहामइ। तुलइ ॥ विरेचेरोलुण्डोल्लुण्डपहुत्थाः॥ २६ ॥ विरेचयतेर्ण्यंत स्यओलुण्डादयआदेशाभवंति॥ ओलुण्डइ। उल्लुण्डइ । पहुत्थइ । विरेअइ ॥ तडेराहोडविहोडौ ॥ २७ ॥ तडेर्ण्यंतस्यएतावादेशौवाभवतः॥ आहोडइ। विहोडइ॥ पक्षे । ताडेइ॥ मिश्रेर्वीसालमेलवौ ॥ २८ ॥ मिश्रय तेर्ण्यंतस्यवीसालमेलवइत्यादेशौवाभवतः॥वीसालइ। मेलवइ । मिस्सइ ॥ उद्धूलेर्गुण्ठः ॥ २९ ॥ उद्धूले र्ण्यंतस्यगुण्ठइत्यादेशोवाभवति॥गुण्ठइ॥ पक्षे । उद्धूलेइ ॥ भ्रमेस्तालिअण्टतमाडौ ॥ ३० ॥ भ्रमतेर्ण्यं ॥ ५९ ॥

तस्य तालिअण्ट तमाड इत्यादेशौवाभवतः॥ तालिअण्टइ । तमाडइ। भामेइ । भमाडइ । भमावेइ ॥ नशेर्विउड नासवहारवविप्पगालपलावाः॥ ३१ ॥ नशेर्ण्यंतस्यैतेपंचादेशावाभवंति ॥ विउडइ। नासवइ। हारवइ। वि प्पइ । गालइ । पलावइ। नासइ ॥ दृशेर्दावदंसदक्खवाः ॥ ३२ ॥ दृशेर्ण्यंतस्यएतेत्रयआदेशावाभवंति ॥ दावइ। दंसइ। दक्खवइ। दरिसइ ॥ उद्घटेरुग्गः ॥ ३३ ॥ उत्पूर्वस्यघटेर्ण्यंतस्य उग्ग इत्यादेशोवाभवति॥ उग्गइ। उग्घाडइ॥ स्पृहःसिहः॥३४॥ स्पृहेर्ण्यंतस्यसिहइत्यादेशोवाभवति ॥ सिहइ॥संभावेरासंघः॥३५॥ संभावयतेरासंघइत्यादेशोवाभवति ॥ आसंघइ। संभावइ ॥ उन्नमेरुच्छंघोल्लालगुलुगुंछोप्पेलाः ॥ ३६ ॥ उत्पूर्वस्यनमेर्ण्यंतस्यएतेचत्वारआदेशावाभवंति॥ उच्छंघइ। उल्लालइ। गुलुगुंछइ। उप्पेलइ । उन्नावइ ॥ प्र स्थापेःपट्ठवपेण्डवौ ॥ ३७ ॥ प्रपूर्वस्यतिष्ठतेर्ण्यंतस्य पट्ठव पेण्डव इत्यादेशौवाभवतः॥ पट्ठवइ । पेण्डवइ। पट्ठावइ॥विज्ञापेर्वोक्कावुक्कौ॥ ३८ ॥ विपूर्वस्यजानातेर्ण्यंतस्य वोक्क आवुक्क इत्येतावादेशौवाभवतः॥ वोक्कइ आवुक्कइ। विण्णवइ॥अर्पेरल्लिवचुप्पपणामाः॥ ३९॥ अर्पेर्ण्यंतस्यएतेत्रयआदेशावाभवंति ॥ अल्लिवइ ।

चवुप्पइ । पणामइ ॥ पक्षे । अप्पेइ ॥ यापेर्जवः ॥ ४० ॥ यातेर्ण्यंतस्यजवइत्यादेशोवाभवति ॥ जवइ । जावेइ ॥
॥ प्लावेरोम्वालपव्वालौ ॥ ४१ ॥ प्लवतेर्ण्यंतस्यएतावादेशौवाभवतः ॥ ओम्वालइ । पावेइ ॥ विकोशेःप
क्खोडः ॥ ४२ ॥ विकोशयतेर्नामधातोर्ण्यंतस्यपक्खोडइत्यादेशोवाजवति ॥ पक्खोडइ । विकोसइ ॥ रोमंथे
रोग्गालवग्गोलौ ॥ ४३ ॥ रोमंथेर्नामधातोर्ण्यंतस्यएतावादेशौवाजवतः ॥ ओग्गालइ । वग्गोलइ । रोमंथइ
॥ कमेर्णिहुवः ॥ ४४ ॥ कमेःस्वार्थेण्यंतस्यणिहुवइत्यादेशोवाभवति ॥ णिहुवइ । कामेइ ॥ प्रकाशेर्णुव्वः ॥ ४५ ॥
प्रकाशेर्ण्यंतस्यणुव्वइत्यादेशोवाजवति ॥ णुव्वइ । पआसेइ ॥ कम्पेर्विच्छोलः ॥ ४६ ॥ कम्पेर्ण्यंतस्यविच्छोलइ
त्यादेशोवाजवति ॥ विच्छोलइ । कंपेइ ॥ आरोहेर्वलः ॥ ४७ ॥ आरुहेर्ण्यंतस्यवलइत्यादेशोवाभवति ॥ वल
इ । आरोवेइ ॥ दोलेरंखोलः ॥ ४८ ॥ दुलेःस्वार्थेण्यंतस्यरंखोलइत्यादेशोवाजवति ॥ रंखोलइ । दोलइ ॥ रंजेरा
वः ॥ ४९ ॥ रंजेर्ण्यंतस्यरावइत्यादेशोवाजवति ॥ रावेइ । रंजइ ॥ घटेःपरिवाडः ॥ ५० ॥ घटेर्ण्यंतस्यपरिवा
डइत्यादेशोवाजवति ॥ परिवाडेइ । घडेइ ॥ ॥ वेष्टेःपरिआलः ॥ ५१ ॥ वेष्टेर्ण्यंतस्यपरिआलइत्यादेशोवाजवति ॥

परिआलेइ । वेढेइ ॥ क्रियःकिणोवेस्तुक्केच ॥ ५२ ॥ णेरितिनिवृत्तं ॥ क्रीणातेःकिणइत्यादेशोभवतिवेःपरस्य
तुद्विरुक्तःक्के चकारात्किणश्चजवति ॥ किणइ । विक्केइ । विक्किणइ ॥ भियोजाबीहौ ॥ ५३ ॥ बिभेतेरेतावादेशौ
भवतः ॥ भाइ । भाइअं । बीहइ । बीहिअं ॥ बहुलाधिकारात्जीआ ॥ आलीङोऽल्ली ॥ ५४ ॥ आलीयतेःअल्ली
इत्यादेशोभवति ॥ अल्लीअइ । अल्लीणो ॥ निलीङोणिलीअणिलुक्कणिरिग्घलुक्कलिक्कल्हिक्काः ॥ ५५ ॥
निलीङएतेषडादेशावाभवंति ॥ णिलीअइ । णिलुक्कइ । णिरिग्घइ । लुक्कइ । लिक्कइ । ल्हिक्कइ । निलिज्जिइ ॥ विली
ङोविरा ॥ ५६ ॥ विलीङोविराइत्यादेशोवाजवति ॥ विराइ । विलिज्जइ ॥ रुतेरुंजरुण्टौ ॥ ५७ ॥ रौतेरे
तावादेशौवाजवतः ॥ रुंजइ । रुण्टइ । रवइ ॥ श्रुतेर्हणः ॥ ५८ ॥ शृणोतेर्हणइत्यादेशोवाजवति ॥ हणइ । सु
णइ ॥ धूगेर्धुवः ॥ ५९ ॥ धुनोतेर्धुवइत्यादेशोवाजवति ॥ धुवइ । धुणइ ॥ भुवेर्होहुवहवाः ॥ ६० ॥ भुवो
धातो र्हो हुव हव इत्येतेआदेशावाजवंति ॥ होइ । होन्ति । हुवइ । हुवन्ति । हवइ । हवन्ति । पक्षे जवइ । परिहीणवि
हवो । जविउं । पजवइ । परिभवइ । संजवइ ॥ क्वचिदन्यदपि ॥ उब्भुअइ । भुत्तं ॥ अवित्तिहुः ॥ ६१ ॥ विद

जैंप्रत्ययेभुवोहुइत्यादेशोभवति॥हुन्ति। भवन्। हुन्तो। अविित्तिकिं ॥ होइ ॥ पृथकस्पष्टेणिव्वडः॥ ६२ ॥ पृथक्
भूतेस्पष्टेचकर्तरिभुवोणिव्वडइत्यादेशोभवति ॥ णिव्वडइ । पृथक्स्पष्टोवाजवतीत्यर्थः॥ प्रन्नोर्हुप्पोवा॥६३ ॥प्रभु
कर्तृकस्यभुवोहुप्पइत्यादेशोवाभवति॥प्रभुत्वंचप्रपूर्वस्यैवार्थः॥ अंगेच्चिअनपहुप्पइ॥पक्षे।पभवेइ ॥ क्तेहूः॥६४॥
भुवःक्तेप्रत्ययेहूरादेशोजवति ॥ हूअं । अणुहूअं । पहूअं॥कृगेःकुणः ॥ ६५ ॥ कृगेःकुणइत्यादेशोवाजवति ॥
कुणइ । करइ ॥ काणेक्षितेणिआरः ॥ ६६ ॥ काणेक्षितविषयस्यकृगेर्णिआरइत्यादेशोवाजवति ॥ णि
आरइ । काणेक्षितंकरोति ॥ निष्टम्नावष्टम्नेणिट्ठुहसंदाणं ॥ ६७ ॥ निष्टम्नविषयस्यावष्टम्भविषयस्य
चकृगोयथासंख्यं निट्ठुह संदाण इत्यादेशौवाभवतः ॥ णिट्ठुहइ । निष्टम्भंकरोति । संदाणइ । अवष्टंजंकरोती
त्यर्थः ॥श्रमेवावम्फः॥ ६८॥ श्रमविषयस्यकृगोवावम्फइत्यादेशोभवतिवा॥ वावम्फइ । श्रमंकरोति ॥ मन्यु
नौष्ठमालिन्येणिव्वोलः॥ ६९ ॥मन्युनाकरणेनयदोष्ठमालिन्यंतद्विषयस्यकृगोणिव्वोलइत्यादेशोवाभवति ॥ णिव्वो
लइ । मन्युनाओष्ठंमलिनंकरोति॥शैथिल्यलम्बनेपयल्लः॥७०॥शैथिल्यविषयस्यलम्बनविषयस्यचकृगःपयल्लइ

देशोवाभवति ॥ पयल्लइ । शिथिलीजवति लंबतेवा ॥निष्पताच्छोटेणीलुञ्छः॥ ७१ ॥ निष्पतनविषयस्यआच्छो
टनविषयस्यचकृगोणीलुञ्छइत्यादेशोजवतिवा ॥ णीलुञ्छइ । निष्पतति । आच्छोटयतिवा ॥क्षुरेकम्मः॥ ७२ ॥
क्षुरविषयस्यकृगोकम्मइत्यादेशोवाजवति॥कम्मइ। क्षुरंकरोतीत्यर्थः ॥ चाटौगुललः ॥ ७३ ॥ चाटुविषयस्यकृ
गोगुललइत्यादेशोवाभवति ॥ गुललइ । चाटुकरोतीत्यर्थः ॥स्मरेर्झरझूरभरभलढविम्हरसुमरपयरपम्ह
हाः॥ ७४ ॥ स्मरेरेतेनवादेशावाजवंति ॥ झरइ । झूरइ । भरइ । भलइ । लढइ । विम्हरइ । सुमरइ । पयरइ । प
म्हहइ । सरइ ॥ विस्मुःपम्हुसविम्हरवीसराः॥ ७५ ॥ विस्मरतेरेतेआदेशाजवंति ॥ पम्हुसइ ।विम्हरइ । वी
सरइ ॥ व्याहृगेःकोक्कपोक्कौ ॥ ७६ ॥ व्याहरतेरेतावादेशौवाजवतः ॥ कोक्कइ । पोक्कइ ॥ ऱ्हस्वत्वेतुकुक्कइ । प
क्षेवाहरइ ॥ प्रसरेःपयल्लोवेल्लौ ॥ ७७ ॥ प्रसरतेः पयल्ल उवेल्ल इत्येतावादेशौवाजवतः॥पयल्लइ । उवेल्लइ। प
सरइ ॥ महमहोगंधे ॥ ७८ ॥ प्रसरतेर्गंधविषयेमहमहइत्यादेशोवाभवति ॥ महमहइ मालइ ॥ मालइगंधो
पसरइ ॥गंधइतिकिं। पसरइ ॥निस्सरेर्णीहरनीलधाडवरहाडाः॥ ७९ ॥ निस्सरतेरेतेचत्वारआदेशावाभ

वंति ॥ नीहरइ । नीलइ । धाडइ । वरहाडइ । नीसरइ ॥जागेर्जग्गः ॥ ८० ॥ जागर्तेर्जग्गइत्यादेशोवाभव
ति ॥ जग्गइ । पक्षे । जागरइ ॥व्याप्रेराअड्डः ॥ ८१ ॥ व्याप्रियतेराअड्डइत्यादेशोवाभवति॥आअड्डेइ । वावा
रइ ॥ संवृगेःसाहरसाहट्टौ ॥ ८२ ॥ संवृणोतेः साहर साहट्ट इत्यादेशौवाभवतः ॥ साहरइ । साहट्टइ । संवरइ
॥आदृङःसन्नामः ॥ ८३ ॥ आद्रियतेःसन्नामइत्यादेशोवाभवति ॥ सन्नामेइ । आदरेइ ॥प्रहृगेःसारः॥८४॥
प्रहरतेःसारइत्यादेशोवाभवति ॥ सारइ । पहरइ ॥ अवतरेरोहओरसौ ॥८५॥ अवतरतेः ओह ओरस इत्या
देशौवाभवतः ॥ ओहरइ । ओरसइ । ओअरइ ॥ शकेश्चयतरतीरपाराः ॥ ८६ ॥ शक्नोतेरेतेचत्वारआदेशावा
भवंति ॥ चयइ । तरइ । तीरइ । पारइ । सक्कइ ॥ त्यजतेरपि । चयइ । हानिंकरोति ॥ तरतेरपि । तरइ ॥ तीरयतेर
पि । तीरइ ॥ पारयतेरपि । पारेइ । कर्मसमाप्नोति ॥ फक्कस्थक्कः ॥ ८७ ॥ फक्कतेस्थक्कइत्यादेशोभवति ॥ थक्क
इ ॥ श्लाघःसलहः ॥८८॥ श्लाघतेःसलहइत्यादेशोभवति ॥ सलहइ ॥ खचेर्वेअडः ॥८९ ॥ खचतेर्वेअड
इत्यादेशोवाभवति ॥ वेअडइ । खचइ ॥ पचेःसोल्लपउल्लौ॥ ९० ॥ पचतेः सोल्ल पउल्ल इत्यादेशौवाभवतः॥सो
ल्लइ । पउल्लइ । पअइ ॥मुचेश्छड्डावहेडमेल्लोसिक्करेअवणिलुञ्छधंसाडाः॥ ९१ ॥ मुंचतेरेतेसप्तादेशावाभवं
ति ॥ छड्डइ । अवहेडइ । मेल्लइ । उसिक्कइ ॥ रेअवइ । णिलुञ्छइ । धंसाडइ ॥ पक्षे । मुअइ ॥ दुःखेणिव्व
लः ॥९२॥ दुःखविषयस्यमुचोणिव्वलइत्यादेशोवाभवति ॥ णिव्वलेइ । दुःखंमुंचतीत्यर्थः ॥वञ्चेर्वेहववेलव
जूरवोमच्छाः ॥ ९३ ॥ वंचतेरेतेचत्वारआदेशाभवंति ॥ वेहवइ । वेलवइ । जूरवइ । उमच्छइ । वञ्चइ ॥ रचे
रुग्गहावहविडविड्डाः ॥ ९४ ॥ रचेर्धातोरेतेत्रयआदेशावाभवंति ॥ उग्गहइ । अवहइ । विडविड्डइ । रअइ ॥
॥ समारचेरुवहत्थसारवसमारकेलायाः ॥९५॥ समारचेरेतेचत्वारआदेशावाभवंति॥उवहत्थइ ।सारवइ ।
समारइ । केलायइ ।समारअइ॥ सिचेःसिञ्चसिम्पौ॥ ९६ ॥ सिचतेरेतावादेशौवाभवतः॥ सिञ्चइ । सिम्पइ ।
सेअइ ॥प्रच्छःपुच्छः ॥९७॥ प्रच्छेःपुच्छादेशोभवति ॥ पुच्छइ ॥ गर्जेर्बुक्कः ॥ ९८ ॥ गर्जतेर्बुक्कइत्यादेशो
वाभवति ॥ बुक्कइ । गज्जइ ॥ वृषेर्ढिक्कः ॥ ९९ ॥ वृषकर्तृकस्यगर्जेर्ढिक्कइत्यादेशोभवति ॥ ढिक्कइ । वृषभोगर्ज
तीत्यर्थः ॥ राजेरग्घछज्जसहरीररेहाः ॥ १०० ॥राजेरेतेपंचादेशाभवंति ॥अग्घइ । छज्जइ । सहइ । रीरइ ।

आउड्ड, णिउड्ड, बुड्ड, थुड्ड, खुप्प, मज्ज to sink

रेहइ । राग्धइ ॥ मज्जेराउड्डणिउड्डबुड्डथुड्डखुप्पाः ॥ १ ॥ मज्जतेरेतेपंचआदेशावाभवंति ॥ आउड्डइ । णिउड्डइ । बुड्डइ । थुड्डइ । खुप्पइ । मज्जइ ॥ पुंजेरारोलवमालौ ॥ २ ॥ पुंजेरेतावादेशौवाभवतः॥ आरोलइ । वमालइ । पुंजइ ॥लस्जेर्जीहः ॥ ३ ॥ लज्जतेर्जीहइत्यादेशोवाभवति ॥ जीहइ । लज्जइ॥ तिजेरोसुक्कः ॥ ४ ॥ तिजेरोसुक्कइत्यादेशोवाभवति ॥ओसुक्कइ।तेअणं॥ मृजेरुग्घुसलुंछपुंछपुंसफुंसपुसलुहहुलरोसाणाः॥५॥ मृजतेरेतेनवादेशावाभवंति॥ उग्घुसइ । लुंछइ । पुंछइ । पुंसइ। फुंसइ। पुसइ। लुहइ॥हुलइ। रोसाणइ॥ पक्षे। मज्जइ॥भंजेर्वेमयमुसुमूरमूरसूरसूडविरपविरञ्जकरञ्जनीरञ्जाः॥६॥भंजेरेतेनवादेशावाभवंति॥वेमयइ। मुसुमूरइ। मूरइ। सूरइ। सूडइ। विरइ। पविरञ्जइ। करञ्जइ। नीरञ्जइ। भंजइ॥अनुव्रजेःपडिअग्गः॥ ७॥ अनुव्रजेःपडिअग्गइत्यादेशोवाभवति ॥पडिअग्गइ । अणुवच्चइ ॥ अर्जेर्विढवः ॥ ८ ॥ अर्जेर्विढवइत्यादेशोवाभवति ॥विढवइ । अज्जइ॥ युजोजुंजजुज्जजुप्पाः॥ ९॥ युजेरेतेत्रयआदेशाभवंति॥जुंजइ। जुज्जइ । जुप्पइ॥ ॥ भुजोभुञ्जजिमजेमकम्माण्हसमाणचमढचडाः ॥ ११० ॥ भुजेरेतेऽष्टादेशाभवंति ॥ भुञ्जइ । जिमइ ।

जेमइ । कम्मइ । अण्हइ । समाणइ । चमढइ । चडइ ॥वोपेनकम्मवः ॥ ११ ॥ उपेनयुक्तस्य भुजेःकम्मवइत्यादेशोवाभवति ॥ कम्मवइ । उवहुंजइ ॥ घटेर्गढः ॥ १२ ॥ घटतेर्गढइत्यादेशोवाभवति । गढइ । घटइ ॥ समोगलः ॥ १३ ॥ सम्पूर्वस्यघटतेर्गलइत्यादेशोवाभवति ॥ संगलइ । संघडइ ॥ हासेनस्फुटेर्मुरः ॥ १४ ॥ हासेनकरणेनयस्फुटिस्तस्यमुरादेशोभवति ॥ मुरइ । हासेन स्फुटति ॥ मंडेश्चिंचचिंचयचिंचिल्लरीडटिविडिक्काः ॥ १५ ॥ मंडेरेतेपंचादेशावाभवंति ॥ चिंचइ । चिंचयइ । चिंचिल्लइ। रीडइ। टिविडिक्कइ। मंडइ ॥ तुडेस्तोडतुट्टखुट्टखुडोक्खुडोल्लुक्कणिल्लुक्कलुक्कोच्छूराः ॥ १६ ॥ तुडेरेतेनवादेशावाभवंति॥ तोडइ। तुट्टइ। खुट्टइ। खुडइ। उक्खुडइ। उल्लुक्कइ। णिल्लुक्कइ। लुक्कइ। उच्छूरइ। तुडइ ॥ घूर्णेर्घुलघोलघुम्मपहल्लाः ॥ १७ ॥ घूर्णेरेतेचत्वारआदेशाभवंति ॥ घुलइ। घोलइ। घुम्मइ। पहल्लइ ॥ विवृतेर्ढंसः ॥ १८ ॥ विवृतेर्ढंसइत्यादेशो वाभवति ॥ ढंसइ। विवट्टइ ॥ कथेरट्टः ॥ १९ ॥ कथेरट्टइत्यादेशोवाभवति॥अट्टइ। कढइ ॥ ग्रंथोगंठः॥ २०॥ ग्रंथेगंठइत्यादेशोभवति ॥ गंठइ । गंठी ॥ मंथेर्घुसलविरोलौ ॥ २१ ॥ मंथेर्घुसलविरोलइत्यादेशौभवतः॥

घुसलइ । विरोलइ ॥ ल्हादेरवअत्थः ॥ २२ ॥ ल्हादतेर्ण्यंतस्याण्यंतस्यचअवअत्थइत्यादेशोभवति ॥ अव
अत्थइ ॥ ल्हादते । ल्हादयतिवा॥इकारोण्यंतस्यापिपरिग्रहार्थः ॥नेःसदोमज्जः॥२३॥ निपूर्वस्यसदेर्मज्जइत्यादे
शोभवति॥अत्ताएत्थणुमज्जइ ॥छिदेर्दुहावणिच्छल्लनिज्झोडणिव्वरणिल्लूरलूराः ॥२४॥ छिदेरेतेषडादेशावाभवं
ति॥दुहावइ।णिच्छल्लइ । णिज्झोडइ । णिव्वरइ । णिल्लूरइ । लूरइ ॥ पक्षे । छिंदइ ॥ आङाओअन्दोद्दालौ॥२५॥
आङायुक्तस्यछिदे रोअन्द उद्दालइ त्यादेशौवाभवतः॥ओअन्दइ।उद्दालइ।आच्छिंदइ॥मृदेर्मलमढपरिहट्टखड्डचड्डमड्डपन्नाडाः॥२६॥ मृद्नातेरेतेसप्तादेशाभवंति॥ मलइ । मढइ । परिहट्टइ ।खड्डइ। चड्डइ।मड्डइ। पन्नाडइ
॥स्पंदेश्चुलुचुलः॥२७॥स्पंदेश्चुलुचुलइत्यादेशोवाभवति॥चुलुचुलइ । फंदइ ॥ निरःपदेर्वलः ॥२८॥ निर्पूर्वस्य
पदेर्वलइत्यादेशोवाभवति ॥ निव्वलइ। निप्पज्जइ॥ विसंवदेर्विअट्टविलोट्टफंसाः॥२९॥ विसंपूर्वस्यवदेरेतेत्र
यआदेशावाभवंति ॥ विअट्टइ । विलोट्टइ । फंसइ । विसंवअइ ॥ शदोज्झडपक्खोडौ ॥३०॥ शीयतेरेता
वादेशौभवतः॥ ज्झडइ । पक्खोडइ ॥ खिदेर्जूरविसूरौ॥ ३१ ॥ खिदेरेतावादेशौवाभवतः॥जूरइ । विसूरइ ।
खिज्जइ॥ रुधेरुत्थंघः ॥ ३२ ॥ रुधेरुत्थंघइत्यादेशोवाभवति॥उत्थंघइ । रुंधइ ॥ निषेधेर्हक्कः ॥ ३३ ॥निषेध
तेर्हक्कइत्यादेशोवाभवति ॥ हक्कइ । निसेहइ ॥ क्रुधेर्जूरः ॥ ३४ ॥ क्रुधेर्जूरइत्यादेशोवाभवति ॥ जूरइ॥कुज्झइ।
॥जनोजाजम्मौ॥३५॥जायते र्जा जम्म इत्यादेशौवाभवतः।जाअइ।जम्मइ॥तनेस्तडतड्डतड्डवविरल्लाः॥३६॥
तनेरेतेचत्वारआदेशावाभवंति ॥ तडइ । तड्डइ । तड्डवइ । विरल्लइ । तणइ ॥ तृपस्थिप्पः ॥ ३७ ॥ तृप्यतेस्थि
प्पइत्यादेशोभवति ॥ थिप्पइ ॥ उपसर्पेरल्लिअः॥ ३८॥उपपूर्वस्यसृपेःकृतगुणस्यअल्लिअइत्यादेशोवाभवति॥
अल्लिअइ। उवसप्पइ ॥ संतपेर्झंखः ॥ ३९ ॥ संतप्यतेर्झंखइत्यादेशोवाभवति ॥ झंखइ॥ पक्षे । संतप्पइ ॥
॥ व्यापेरोअग्गः ॥ ४० ॥ व्याप्नोतेरोअग्गइत्यादेशोवाभवति ॥ ओअग्गइ । वावेइ॥समापेःसमाणः ॥४१॥
समाप्नोतेःसमाणइत्यादेशोवाभवति ॥ समाणइ । समावेइ ॥ क्षिपेर्गलत्थाड्डक्खसोल्लपेल्लणोल्लछुहहुलपरीघत्ताः ॥४२ ॥ क्षिपेरेतेनवादेशावाभवंति॥गलत्थइ । अड्डक्खइ । सोल्लइ । पेल्लइ । णोल्लइ । न्हस्वत्वेणुल्लइ । छु
हइ । हुलइ । परीइ । घत्तइ । खिवइ ॥ उत्क्षिपेर्गुलगुञ्छोत्थंघाल्लत्थोब्भुत्तोस्सिक्कहक्खुप्पाः॥४३॥ उत्पूर्व

स्यक्षिपेरेतेषडादेशावाजवंति ॥ गुलुगुञ्छइ । उत्थंघइ । अल्लत्थइ । उब्भुत्तइ । उस्सिक्कइ । हक्खुप्पइ । उक्खिवइ ॥ आक्षिपेर्णीरवः ॥ ४४ ॥ आङ्पूर्वस्यक्षिपेर्णीरवइत्यादेशोवाजवति ॥ णीरवइ । अक्खिवइ ॥ स्वपेःकमठसलिसलोट्टाः ॥ ४५ ॥ स्वपेरेतेत्रयआदेशावाभवंति ॥ कमठसइ । लिसइ । लोट्टइ । सुअइ ॥ वेपेरायम्बयज्झौ ॥ ४६ ॥ वेपे रायम्ब आयज्झ इत्यादेशौवाजवतः॥आयम्बइ।आयज्झइ।वेवइ ॥ विलपेर्झंखवडवडौ ॥ ४७ ॥ विलपे झंख वडवड इत्यादेशौवाजवतः॥झंखइ।वडवडइ। विलवइ ॥ लिपोलिम्पः ॥ ४८ ॥ लिपतेर्लिम्पइत्यादेशोजवति ॥ लिम्पइ ॥ गुप्येर्विरणडौ ॥ ४९ ॥ गुप्यतेरेतावादेशौवाजवतः ॥ विरइ । णडइ ॥ पक्षे । गुप्पइ ॥ कृपोऽवहोणिः ॥ ५० ॥ कृपेःअवहइत्यादेशोण्यंतोभवति । अवहावेइ । कृपांकरोतीत्यर्थः ॥ प्रदीपेस्तेअवसंदुमसंधुक्काब्जुत्ताः ॥ ५१ ॥ प्रदीप्यतेरेतेचत्वारआदेशावाभवंति ॥ तेअवइ । संदुमइ । संधुक्कइ । अब्भुत्तइ । पलीवइ ॥ लुनेःसंजावः ॥ ५२ ॥ लुम्पतेःसंजावइत्यादेशोवाजवति ॥ संजावइ। लुब्जइ ॥ क्षुनेःखउरपडुहौ ॥ ५३ ॥ क्षुनेः खउर पडुह इत्यादेशौवाभवतः॥खउरइ । पडुहइ । खुब्भइ॥ आ

ङोरज्नेरम्भढवौ ॥५४ ॥ आङःपरस्यरज्ने रम्भ ढव इत्यादेशौवाभवतः॥आरम्भइ । आढवइ । आरजइ॥ उपालम्नेर्झंखपच्चारवेलवाः ॥ ५५ ॥ उपालम्नेरेतेत्रयआदेशावाजवंति ॥ झंखइ । पच्चारइ । वेलवइ । उवालंजइ ॥ अवेर्जृम्नोजंना ॥५६ ॥ जृंभेर्जनाइत्यादेशोजवतिवेस्तुनभवति॥ जंभाइ । जंनाअइ ॥ अवेरिति किं ॥ केलिपसरोविअंजइ ॥ जाराक्रांतेर्नमेर्णिसुढः ॥ ५७ ॥ भाराक्रांतिकर्तरिनमेर्णिसुढइत्यादेशोजवति ॥ णिसुढइ । भाराक्रांतोनमतीत्यर्थः ॥ विश्रमेर्णिव्वा ॥ ५८ ॥ विश्राम्यतेर्णिव्वाइत्यादेशोवाभवति ॥ णिव्वाइ । वीसमइ॥ आक्रामेरोहावोच्छारछुंदाः॥ ५९॥ आक्रमेरेतेत्रयआदेशावाजवंति ॥ ओहावइ । उच्छारइ । छुंदइ । अक्कमइ॥ भ्रमेष्टिरिटिल्लढुंढुल्लढंढल्लचक्कम्मजमडजम्माडजमाडतलअण्टझण्टझम्पभुमगुमफुमफुसढुमढुसपरीपराः॥ ६०॥ भ्रमेरतेऽष्टादशादेशावाभवंति॥टिरिटिल्लइ।ढुंढुल्लइ। ढंढल्लइ। चक्कम्मइ। भमडइ। भम्माडइ। जमाडइ। तलअण्टइ। झण्टइ। झम्पइ। भुमइ। गुमइ। फुमइ। फुसइ। ढुमइ। ढुसइ। परीइ। परइ। जमइ ॥ गमेरइअइच्छाणुवज्जावसज्जोकुसाकुसपच्चड्डपच्छंदणिम्महणीणीणणीलुक्कपदअरंजपरिअल्लवोलपरि

अलंगिरिणासणिवहावसेहावहराः ॥ ६१ ॥ गमेरेतेएकविंशतिरादेशावाभवंति॥अइइ। अइच्छइ। अणुव
ज्जइ। अवसज्जइ। उक्कुसइ। अक्कुसइ। पच्चड्डइ। पच्छंदइ। णिम्महइ। णीइ। णीणइ। णीलुक्कइ। पदअइ।
रंभइ। परिअल्लइ। वोलइ। परिअलइ। णिरिणासइ। णिवहइ। अवसेहइ। अवहरइ॥ पक्षे। गच्छइ॥हम्मइ
णिहम्मइ। णीहम्मइ। आहम्मइ। पहम्मइ इत्येतेतुहम्मगतावित्यस्यैवभविष्यंति॥ आङाअहिपच्चुअः॥ ६२॥
आङासहितस्यगमेःअहिपच्चुअइत्यादेशोवाभवति॥ अहिपच्चुअइ। पक्षे। आगच्छइ॥ समाअब्भिडः॥६३॥
समायुक्तस्यगमेःअब्भिडइत्यादेशोवाभवति॥ अब्भिडइ। संगच्छइ ॥ अभ्याङोम्मत्थः॥ ६४॥ अभ्याङ्
भ्यांयुक्तस्यगमेःउम्मत्थइत्यादेशोवाभवति॥ उम्मत्थइ। अब्भागच्छइ। अभिमुखमागच्छतीत्यर्थः ॥ प्रत्या
ङापलोट्टः॥ ६५॥ प्रत्याङ्भ्यांयुक्तस्यगमेःपलोट्टइत्यादेशोवाभवति॥ पलोट्टइ। पच्चागच्छइ॥ शमेःपडि
सापडिसामौ॥६६॥शमेरेतावादेशौवाभवतः॥पडिसाइ॥पडिसामइ।समइ ॥रमेःसंखुड्डखेड्डोब्भावकिलिकिं
चकोट्टुममोट्टायणीसरवेल्लाः॥ ६७॥ रमतेरेतेऽष्टादेशावाभवंति॥ संखुड्डइ। खेड्डइ। उब्भावइ। किलिकिंचइ।

कोट्टुमइ। मोट्टायइ। णीसरइ। वेल्लइ। रमइ॥ पूरेरग्घाडोग्घवोद्धुमांगुमाहिरेमाः॥६८॥पूरेरेतेपञ्चादेशा
वाभवंति॥ अग्घाडइ। उग्घवइ। उद्धुमइ। अंगुमइ। अहिरेमइ। पूरइ ॥ त्वरस्तुवरजअडौ॥ ६९॥ त्वर
तेरेतावादेशौभवतः॥ तुवरइ। जअडइ। तुवरंतो। जअडंतो॥ त्यादिशत्रोस्तूरः॥ ७०॥ त्वरतेस्त्यादौश
तरिचतूरइत्यादेशोभवति॥ तूरइ। तूरंतो ॥ तुरोऽत्यादौ॥ ७१॥ त्वरोऽत्यादौतुरआदेशोभवति॥ तुरिओ।
तुरंतो॥ क्षरःखिरज्झरपज्झरपच्चडणिच्चलणिट्टुआः॥ ७२॥ क्षरेरेतेषडादेशाभवंति॥ खिरइ। झरइ।
पज्झरइ। पच्चडइ। णिच्चलइ। णिट्टुअइ॥ उच्छलउच्छल्लः॥ ७३॥ उच्छलतेरुच्छल्लइत्यादेशोभवति॥ उ
च्छल्लइ॥ विगलेस्थिप्पणिट्टुहौ॥ ७४॥ विगलतेरेतावादेशौवाभवतः॥ थिप्पइ। णिट्टुहइ। विगलइ॥दलि
वल्योर्विसट्टवम्फौ॥ ७५॥ दलेर्वलेश्चयथासंख्यंविसट्ट वम्फ इत्यादेशौवाभवतः॥विसट्टइ। वम्फइ॥ पक्षे।
दलइ। वलइ॥ भ्रंशेःफिडफिट्टफुडफुट्टचुक्कभुल्लाः॥७६॥ भ्रंशेरेतेषडादेशावाभवंति॥ फिडइ। फिट्टइ। फु
डइ। फुट्टइ। चुक्कइ। भुल्लइ॥ पक्षे। भंसइ ॥ नशेर्णिरिणासणिवहावसेहपडिसासेहावहराः॥७७॥ नशे

रेतेषडादेशाजवंतिवा । णिरिणासइ । णिवहइ । अवसेहइ । पडिसाइ । सेहइ । अवहरइ ॥ पक्षे । नस्सइ ॥ अवा
त्काशोवासः ॥ ७८ ॥ अवात्परस्यकाशोवासइत्यादेशोजवति ॥ ओवासइ ॥ संदिशेरप्पाहः ॥ ७९ ॥
संदिशतेरप्पाहइत्यादेशोजवतिवा ॥ अप्पाहइ।संदिसइ॥दृशोनिअच्छपेच्छावयच्छावयज्झचज्जसव्वदेक्खो
अक्खाचक्खावअक्खपुलोएपुलअनिआवआसपासाः॥८०॥दृशेरेतेपंचदशादेशाजवंतिवा ॥निअच्छइ ॥ पे
च्छइ । अवयच्छइ । अवयज्झइ । चज्जइ । सव्वइ । देक्खइ । ओअक्खइ।अवक्खइ । अवअक्खइ।पुलोएइ।
पुलअइ।निअइ।अवआसइ।पासइ॥निज्झाअइ इतितुनिपूर्वस्यध्यायतेःस्वरादेत्यतेर्जविष्यति ॥ स्पृशःफास
फंसफरिसछिवछिहालुंखालिहाः ॥ ८१ ॥ स्पृशतेरेतेसप्तआदेशाभवंति ॥ फासइ । फंसइ । फरिसइ । छिव
इ । छिहइ । आलुंखइ । आलिहइ ॥ प्रविशेरिअः ॥ ८२ ॥ प्रविशेरिअइत्यादेशोवाभवति॥रिअइ।पविसइ
॥ प्रान्मृशमुषोर्म्हुसः ॥ ८३ ॥ प्रात्परयोर्मृशतिमुष्णात्योर्म्हुसइत्यादेशोभवति ॥ पम्हुसइ ।प्रमृशति। प्रमुष्णा
ति ॥पिषेर्णिवहणिरिणासणिरिणिज्जरोंचचड्डाः॥८४ ॥ पिषेरेतेपंचादेशाभवंतिवा ॥ णिवहइ । णिरिणासइ । ॥ ६७॥

णिरिणिज्जइ । रोंचइ । चड्डइ ॥ पक्षे । पीसइ॥ जषेर्भुक्कः ॥ ८५ ॥ जषेर्भुक्कइत्यादेशोवाजवति ॥ भुक्कइ । जस
इ ॥ कृषेःकड्डसाअड्ढाञ्चाणच्छायञ्छाइञ्छाः ॥८६॥ कृषेरेतेषडादेशावाभवंति॥कड्डइ। साअड्ढइ। अञ्चइ।
अणञ्छइ । अयञ्छइ । आइञ्छइ ॥ पक्षे । करिसइ ॥ असावक्खोडः ॥ ८७ ॥ असिविषयस्यकृषेरक्खोडइ
त्यादेशोजवति ॥ अक्खोडइ । असिंकोशात्कर्षतीत्यर्थः ॥ गवेषेर्ढुंढुल्लढंढोलगमेसघत्ताः ॥ ८८॥ गवेषेरेते
चत्वारआदेशावाभवंति ॥ ढुंढुल्लइ । ढंढोलइ । गमेसइ । घत्तइ ॥ गवेसइ ॥ श्लिषेःसामग्गावयासपरिअ
त्ताः ॥८९॥ श्लिष्यतेरेतेत्रयआदेशावाजवंति ॥ सामग्गइ । अवयासइ । परिअत्तइ । सिलेसइ ॥ म्रक्षेश्चोप्प
डः॥९०॥ म्रक्षेश्चोप्पडइत्यादेशोवाभवति॥चोप्पडइ।मक्खइ ॥कांक्षेराहाहिलंघाहिलंखवच्चवंफमहसिहविलुं
पाः ॥ ९१ ॥ कांक्षतेरेतेऽष्टादेशावाभवंति॥ आहाइ। अहिलंघइ। अहिलंखइ । वच्चइ । वंफइ । महइ ।सिहइ
विलुंपइ । कंखइ ॥प्रतीक्षेःसामयविहीरविरमालाः॥९२॥ प्रतीक्षेरेतेत्रयआदेशावाभवंति ॥ सामयइ । विही
रइ । विरमालइ। पडिक्खइ ॥ तक्षेस्तच्छचच्छरम्परम्फाः ॥९३॥ तक्षेरेतेचत्वारआदेशावाजवंति॥ तच्छइ।

चच्छइ । रम्पइ । रम्फइ । तक्खइ ॥ विकसेःकोआसवोसट्टौ ॥१९४॥ विकसेरेतावादेशौवाभवतः ॥ कोआसइ वोसट्टइ । विअसइ ॥ हसेर्गुंजः ॥ १९५ ॥ हसेर्गुंजइत्यादेशोवाभवति ॥ गुंजइ । हसइ ॥ स्रंसेर्ल्हसडिम्भौ ॥ १९६ ॥ स्रंसेरेतावादेशौवाभवतः ॥ ल्हसइ । परिल्हसइ । सलिलवसणं डिम्भइ । संसइ ॥ त्रसेर्डरवोज्जवज्जाः ॥१९७॥ त्रसेरेतेत्रयआदेशावाभवंति ॥ डरइ । वोज्जइ । वज्जइ । तसइ ॥ न्यसोणिमणुमौ ॥१९८॥ न्यस्यतेरेतावादेशौभवतः ॥ णिमइ । णुमइ ॥ पर्यसःपलोट्टपल्लट्टपल्हत्थाः ॥ १९९॥ पर्यस्यतेरेतेत्रयआदेशाभवंति ॥ पलोट्टइ । पल्लट्टइ । पल्हत्थइ ॥ निःश्वसेर्झंखः ॥ २०० ॥निश्वसेर्झंखइत्यादेशोवाभवति ॥ झंखइ । नीससइ ॥ उल्लसेरूसलोसुम्भणिल्लसपुलआअगुंजोल्लारोआः ॥ १ ॥ उल्लसेरेतेषडादेशावाभवंति॥ऊसलइ । ऊसुम्भइ । णिल्लसइ । पुलआअइ । गुंजोल्लइ । ह्रस्वत्वेतु । गुंजुल्लइ । आरोअइ।उल्लसइ ॥भासेर्भिसः॥२॥ भासेर्भिसइत्यादेशोवाभवति ॥ भिसइ । भासइ ॥ ग्रसेर्घिसः ॥ ३ ॥ ग्रसेर्घिसइत्यादेशोभवतिवा ॥ घिसइ । गसइ ॥अवात्गाहेर्वाहः॥४ ॥ अवात्परस्यगाहेर्वाहइत्यादेशोवाभवति ॥ उवाहइ । उगाहइ ॥ आरुहेश्चड

वलग्गौ ॥ ५ ॥ आरुहेरेतावादेशौवाभवतः ॥ चडइ । वलग्गइ । आरुहइ ॥मुहेर्गुम्मगुम्मडौ ॥६॥ मुहेरेतावादेशौवाभवतः ॥ गुम्मइ । गुम्मडइ । मुज्झइ ॥ दहेरहिऊलालुंखौ ॥ ७ ॥ दहेरेतावादेशौवाभवतः॥अहिऊलइ । आलुंखइ । डहइ ॥ ग्रहोवलगेण्हहरपङ्गनिरुवाराहिपच्चुआः ॥ ८ ॥ ग्रहेरेतेषडादेशाभवंति ॥ वलइ । गेण्हइ । हरइ । पङ्गइ । निरुवारइ । अहिपच्चुइ ॥ क्त्वातुमतव्येषुघेत् ॥ ९ ॥ ग्रहेःक्त्वातुमतव्येषु घेदित्यादेशोभवति ॥ क्त्वा ॥ घेत्तूण । घेत्तूआण । क्वचिन्नभवति । गेण्हिअ । तुम् ॥ घेत्तुं ॥ तव्य ॥ घेत्तव्वं ॥ ॥ वचोवोत् ॥ २१० ॥ वक्तेर्वोदित्यादेशोभवतिक्त्वातुमतव्येषु ॥ वोत्तूण । वोत्तुं । वोत्तव्वं ॥ रुदभुजमुचांतोऽन्त्यस्य ॥ ११ ॥ एषामंत्यस्यक्त्वातुमतव्येषुपरतःत्तोभवति ॥ रोत्तूण । रोत्तुं । रोत्तव्वं ॥ भोत्तूण । भोत्तुं । भोत्तव्वं ॥ मोत्तूण । मोत्तुं । मोत्तव्वं ॥ दृशस्तेनठः ॥ १२ ॥ दृशोंत्यस्यतकारेणसहद्विरुक्तठकारोभवति ॥ दट्ठूण । दट्ठुं । दट्ठव्वं ॥ आःकृगोभूतभविष्यतोश्च ॥ १३ ॥ कृगोऽन्त्यस्यआइत्यादेशोभवतिभूतभविष्यत्कालयोश्चकारात्क्त्वातुमतव्येषुच ॥ काहीअ । अकार्षीत् । अकरोत् । चकारवा॥काहिइ । करिष्यति कर्तावा ॥ क्त्वा॥

71

गम् इष् यम् आस्-आं

काऊण ॥ तुम् ॥ काउं ॥ तव्य ॥ काअव्वं ॥ गमिष्यमासांछः ॥ १४ ॥ एषामंत्यस्यछोभवति ॥ गच्छइ । इच्छइ ।
जच्छइ । अच्छइ ॥ छिदिभिदोन्दः ॥ १५ ॥ अनयोरंत्यस्यनकाराक्रांतोदकारोभवति ॥ छिन्दइ । भिन्दइ ॥
॥ युधबुधगृधक्रुधसिधमुहांज्झः ॥ १६ ॥ एषामंत्यस्यद्विरुक्तोझोभवति ॥ जुज्झइ । बुज्झइ । गिज्झइ । कुज्झ
इ । सिज्झइ । मुज्झइ ॥ रुधोन्धम्भौच ॥ १७ ॥ रुधोऽन्त्यस्य न्ध म्भ इत्येतौचकारात्झश्चभवति ॥ रुन्धइ ।
रुम्भइ । रुज्झइ ॥ सदपतोर्डः ॥ १८ ॥ अनयोरंत्यस्यडोभवति ॥ सडइ । पडइ ॥ कथवर्धांढः ॥ १९ ॥
अनयोरंत्यस्यढोभवति ॥ कढइ । वड्ढइ पवअकलअलो ॥ परिअड्ढइ लाअण्णं ॥ बहुवचनाद्वृधेःकृतगुणस्यवर्धेश्चावि
शेषेणग्रहणं ॥ वेष्टेः ॥ २२० ॥ वेष्टवेष्टनेइत्यस्यधातोःकगटडेत्यादिनाषलोपेऽन्त्यस्यढोभवति ॥ वेढइ । वेढिज्ज
इ ॥ समोल्लः ॥ २१ ॥ संपूर्वस्यवेष्टतेरंत्यस्यद्विरुक्तोलोभवति ॥ संवेल्लइ ॥ वोदः ॥ २२ ॥ उदःपरस्यवेष्टे
रंत्यस्यल्लोवाभवति ॥ उव्वेल्लइ । उव्वेढइ ॥ स्विदांज्जः ॥ २३ ॥ स्विदिप्रकाराणामंत्यस्यद्विरुक्तोजोभवति ॥ सव्वं
गसिज्जिरीए । संपज्जइ । खिज्जइ । बहुवचनंप्रयोगानुसरणार्थं ॥ व्रजनृतमदांच्चः ॥ २४ ॥ एषामंत्यस्यद्विरु

क्तश्चोभवति ॥ वच्चइ । नच्चइ । मच्चइ ॥ रुदनमोर्वः ॥ २५ ॥ अनयोरंत्यस्यवोभवति ॥ रुवइ । रोवइ । नव
इ ॥ उद्विजः ॥ २६ ॥ उद्विजतेरंत्यस्यवोभवति ॥ उव्विवइ । उव्वेवो ॥ खादधावोर्लुक् ॥ २७ ॥ अनयोरं
त्यस्यलुग्भवति ॥ खाइ । खाअइ । खाहिइ । खाओ ॥ धाइ । धाअइ । धाहिइ । धाओ ॥ बहुलाधिकाराद्वर्तमानाभ
विष्यद्विध्याद्येकवचनएवभवतितेनेहनभवति ॥ खादन्ति । धावन्ति ॥ क्वचिन्नभवति ॥ धावइपुरओ ॥ सृजोरः ॥ २८ ॥
सृजोधातोरंत्यस्यरोभवति ॥ निसिरइ । वोसिरइ । वोसिरामि ॥ शकादीनांद्वित्वं ॥ २९ ॥ शकादीनामंत्यस्यद्वित्वं
भवति ॥ शक् । सक्कइ ॥ जिम् । जिम्मइ ॥ लग् । लग्गइ ॥ मग् । मग्गइ ॥ कुप् । कुप्पइ ॥ नश् । नस्सइ ॥ अट् ।
परिअट्टइ ॥ लुट् । पलोट्टइ ॥ तुट् । तुट्टइ ॥ नट् । नट्टइ ॥ सिव् । सिव्वइ इत्यादि ॥ स्फुटिचलेः ॥ २३० ॥ अन
योरंत्यस्यद्वित्वंवाभवति ॥ फुट्टइ । फुडइ ॥ चल्लइ । चलइ ॥ प्रादेर्मीलेः ॥ ३१ ॥ प्रादेःपरस्यमीलेरंत्यस्यद्वि
त्वंवाभवति ॥ पमिल्लइ । पमीलइ ॥ निमिल्लइ । निमीलइ ॥ संमिल्लइ । संमीलइ ॥ उम्मिल्लइ । उम्मीलइ ॥ प्रादे
रितिकिम् ॥ मीलइ ॥ उवर्णस्यावः ॥ ३२ ॥ धातोरंत्यस्योवर्णस्यअवादेशोवाभवति ॥ न्हुङ् । निण्हवइ । निह

वइ ॥ च्युङ् । चवइ ॥ रु । रवइ ॥ कु । कवइ ॥ सू । सवइ । पसवइ ॥ ऋवर्णस्यारः ॥ ३३ ॥ धातोरंत्यस्यऋव
र्णस्यअरादेशोभवति ॥ करइ । धरइ । मरइ । वरइ । सरइ । हरइ । तरइ । जरइ ॥ वृषादीनामरिः ॥ ३४ ॥
वृषइत्येवंप्रकाराणांधातूनांऋवर्णस्यारिइत्यादेशोभवति ॥ वृष् । वरिसइ । कृष् । करिसइ ॥ दृष् । दरिसइ ॥ मृष् ।
मरिसइ ॥ हृष् । हरिसइ ॥ येषामरिरादेशोदृश्यतेतेवृषादयः रुषादीनांदीर्घः ॥ ३५ ॥ रुषइत्येवंप्रकाराणांधा
तूनांस्वरस्यदीर्घोभवति ॥ रूसइ । तूसइ । सूसइ । दूसइ । पूसइ । सीसइ इत्यादि ॥ युवर्णस्यगुणः ॥ ३६ ॥
धातोरिवर्णस्योवर्णस्यचक्ङित्यपिगुणोभवति ॥ जेऊण । नेऊण ॥ नेइ । नेंति ॥ उड्डेइ । उड्डेंति ॥ मोत्तूण । सोऊण ।
क्वचिन्नभवति ॥ नीओ । उड्डीणो ॥ स्वराणांस्वराः ॥ ३७ ॥ धातुषुस्वराणांस्थानेस्वराबहुलंभवंति ॥ हवइ । हि
वइ ॥ चिणइ । चुणइ ॥ सद्दहणं । सद्दहाणं ॥ धावइ । धुवइ । रुवइ । रोवइ । क्वचिन्नित्यं । देइ । लेइ । विहेइ ।
नासइ ॥ आर्षे । बेमि ॥ व्यंजनाददंते ॥ ३८ ॥ व्यंजनांताद्धातोरंतेऽकारोभवति ॥ भमइ । हसइ । कुणइ ।
चुम्बइ । भणइ । उवसमइ । पावइ । सिंचइ । रुंधइ । मुसइ । हरइ । करइ ॥ शवादीनांचप्रायःप्रयोगोनास्ति ॥

॥ स्वरादनतोवा ॥ ३९ ॥ अकारांतवर्जितात्स्वरांताद्धातोरंतेऽकारागमोभवतिवा ॥ पाइ । पाअइ । धाइ । धा
अइ ॥ जाइ । जाअइ ॥ झाइ । झाअइ ॥ जंभाइ । जंभाअइ ॥ उव्वाइ । उव्वाअइ ॥ मिलाइ । मिलाअइ ॥ विक्केइ ।
विक्केअइ ॥ होऊण । होइऊण ॥ अनतइतिकिं ॥ चिइच्छइ । दुगुच्छइ ॥ चिंजिश्रुहुष्टुलुपूधूगांणोन्हस्वश्च ॥ २४० ॥
च्यादीनांधातूनामंतेणकारागमोभवति एषांस्वरस्यचदीर्घस्यन्हस्वोभवति ॥ चि । चिणइ । जि । जिणइ ॥ श्रु । सुणइ
हु । हुणइ ॥ ष्टु । थुणइ ॥ लू । लुणइ ॥ पू । पुणइ ॥ धूग् । धुणइ ॥ बहुलाधिकारात्क्वचिद्विकल्पः ॥ उच्चिणइ । उच्चेइ ॥ जे
ऊण । जिणिऊण ॥ जयइ । जिणइ ॥ सोऊण । सुणिऊण ॥ नवाकर्मभावेव्वःक्यस्यचलुक् ॥ ४१ ॥ च्यादी
नांकर्मणिभावेवर्तमानानामंतेद्विरुक्तोवकारागमोवाभवति तत्सन्नियोगेचक्यस्यलुक् ॥ चिव्वइ । चिणिज्जइ ॥ जिव्व
इ । जिणिज्जइ ॥ सुव्वइ । सुणिज्जइ ॥ हुव्वइ । हुणिज्जइ ॥ थुव्वइ । थुणिज्जइ ॥ लुव्वइ । लुणिज्जइ ॥ पुव्वइ । पुणि
ज्जइ ॥ धुव्वइ । धुणिज्जइ ॥ एवंभविष्यति ॥ चिव्विहिइ इत्यादि ॥ म्मश्चेः ॥ ४२ ॥ चिगःकर्मणिभावेचांतेसंयुक्तोमो
वाभवति तत्सन्नियोगेचक्यस्यलुक् ॥ चिम्मइ । चिव्वइ । चिणिज्जइ ॥ भविष्यति । चिम्मिहिइ । चिव्विहिइ चिणिहिइ

॥ हन्खनोंऽत्यस्य ॥ ४३ ॥ अनयोः कर्मभावेंऽत्यस्यद्विरुक्तोमोवाभवतितत्सन्नियोगेक्यस्यचलुक् ॥ हम्मइ । हणिज्जइ ॥ खम्मइ । खणिज्जइ ॥ भविष्यति । हम्मिहिइ ॥ हणिहिइ ॥ खम्मिहिइ । खणिहिइ ॥ बहुलाधिकाराद्धन्तेः कर्तर्यपि ॥ हम्मइ । हंतीत्यर्थः ॥ क्वचिन्नभवति ॥ हंतव्वं । हंतूणं । हओ ॥ भोदुहलिहवहरुधामुच्चातः ॥ ४४ ॥ दुहादीनामंत्यस्यकर्मभावेद्विरुक्तोभोवाभवति तत्सन्नियोगेक्यस्यचलुक् वहेरकारस्यचोकारः ॥ दुब्भइ । दुहिज्जइ ॥ लिब्भइ । लिहिज्जइ ॥ वब्भइ । वहिज्जइ । रुब्भइ । रुंधिज्जइ ॥ भविष्यति । दुब्भिहिइ । दुहिहिइ इत्यादि ॥ दहो ज्झः ॥ ४५ ॥ दहोंऽत्यस्यकर्मभावेद्विरुक्तोज्झोवाभवतितत्सन्नियोगेक्यस्यचलुक् ॥ डज्झइ । दहिज्जइ ॥ भविष्यति । डज्झिहिइ । डहिहिइ ॥ बंधोन्धः ॥ ४६ ॥ बंधेर्धातोरंत्यस्यन्धइत्यस्यावयवस्यकर्मभावेज्झोवाभवति तत्सन्नियोगेक्यस्यचलुक् ॥ बज्झइ । बंधिज्जइ ॥ भविष्यति । बज्झिहिइ । बंधिहिइ ॥ समनूपाद्रुधेः ॥ ४७ ॥ समनूपेभ्यः परस्यरुधेः कर्मभावेज्झोवाभवति तत्सन्नियोगेक्यस्यचलुक् ॥ संरुज्झइ । अणुरुज्झइ । उवरुज्झइ ॥ पक्षे । संरुंधिज्जइ । अणुरुंधिज्जइ । उवरुंधिज्जइ ॥ भविष्यति । संरुज्झिहिइ । संरुंधिहिइ इत्यादि ॥ गमादीनांद्वित्वं ॥ ४८ ॥

गमादीनामंत्यस्यकर्मभावेद्वित्वंवाभवति तत्सन्नियोगेक्यस्यचलुक् ॥ गम् । गम्मइ । गमिज्जइ ॥ हस् । हस्सइ । हसिज्जइ ॥ भण् । भण्णइ । भणिज्जइ ॥ छुप् । छुप्पइ । छुविज्जइ । रुदनमोर्वइतिकृतवकारादेशोरुदिरत्रोच्यते ॥ रुव् । रुव्वइ । रुविज्जइ ॥ लभ् । लब्भइ । लहिज्जइ ॥ कथ् । कत्थइ । कहिज्जइ ॥ भुज् । भुज्जइ ॥ भुंजिज्जइ ॥ भविष्यति । गम्मिहिइ । गमिहिइ इत्यादि ॥ हृकृतृज्रामीरः ॥ ४९ ॥ एषामंत्यस्यईरइत्यादेशोवाभवति तत्सन्नियोगेक्यस्यचलुक् ॥ हीरइ । हरिज्जइ ॥ कीरइ । करिज्जइ ॥ तीरइ । तरिज्जइ ॥ जीरइ । जरिज्जइ ॥ अर्जेर्विढप्पः ॥ २५० ॥ अंत्यस्येतिनिवृत्तं ॥ अर्जेर्विढप्पइत्यादेशोवाभवति तत्सन्नियोगेक्यस्यचलुक् ॥ विढप्पइ ॥ पक्षे । विढविज्जइ । अज्जिज्जइ ॥ ज्ञोणव्वणज्जौ ॥ ५१ ॥ जानातेः कर्मभावे णव्व णज्ज इत्यादेशौ वाभवतः तत्सन्नियोगेक्यस्यचलुक् ॥ णव्वइ । णज्जइ ॥ पक्षे । जाणिज्जइ । मुणिज्जइ ॥ म्नज्ञोर्णइतिणादेशेतु । णाइज्जइ ॥ नञ्पूर्वकस्य । अणाइज्जइ ॥ व्याहृगेर्वाहिप्पः ॥ ५२ ॥ व्याहरतेः कर्मभावेवाहिप्पइत्यादेशोवाभवति तत्सन्नियोगेक्यस्यचलुक् ॥ वाहिप्पइ । वाहरिज्जइ ॥ आरभेराढप्पः ॥ ५३ ॥ आङ्पूर्वस्यरभेः कर्मभावे

आढप्पइत्यादेशोवाभवति क्यलुक्च ॥ आढप्पइ । पक्षे । आढवीअइ ॥ स्नेहसिचोःसिप्पः ॥ ५४ ॥ अन
योःकर्मभावेसिप्पइत्यादेशोभवति क्यलुक्च ॥ सिप्पइ ॥स्निह्यते । सिच्यतेवा ॥ ग्रहेर्घेप्पः ॥ ५५ ॥ ग्रहेःक
र्मभावेघेप्पइत्यादेशोवाभवति क्यलुक्च ॥ घेप्पइ । गेण्हिज्जइ ॥ स्पृशेश्छिप्पः ॥ ५६ ॥ स्पृशतेःकर्मभावे
छिप्पादेशोवाभवति क्यलुक्च ॥ छिप्पइ । छिविज्जइ ॥ क्तेनाप्फुण्णादयः ॥ ५७ ॥ अप्फुण्णादयःशब्दाआ
क्रमिप्रभृतीनांधातूनांस्थानेक्तेनसहनिपात्यंते ॥ अप्फुण्णो । आक्रांतः ॥ उक्कोसं । उत्कृष्टं ॥ फुडं । स्पष्टं ॥
वोलीणो । अतिक्रांतः ॥ वोसट्टो । विकसितः ॥ निसुट्टो । निपातितः ॥ लुग्गो । रुग्णः ॥ ल्हिक्को । नष्टः ॥ पम्हुट्ठो ।
प्रमृष्टः प्रमुषितोवा ॥ विढत्तं । अर्जितं ॥ छित्तं । स्पृष्टं ॥ निमिअं । स्थापितं ॥ चक्खिअं । आस्वादितं ॥ लुअं ।
लूनं ॥ जढं । त्यक्तं ॥ झोसिअं । क्षिप्तं ॥ निच्छूढं । उद्वृत्तं ॥ पल्हत्थं पल्लोट्टंच । पर्यस्तं ॥ हीसमणं । हेषितमित्यादि
॥ धातवोऽर्थांतरेपि ॥ ५८ ॥ उक्तादर्थादर्थांतरेपिधातवोवर्तंते । बलिःप्राणनेपठितःखादनेपिवर्तते ॥ बलइ ।
खादति प्राणनंकरोतिवा ॥ एवंकलिःसंख्यानेसंज्ञानेपि ॥ कलइ । जानाति संख्यानंकरोतिवा । रिगिर्गतौप्रवेशे

